१४ लघुनि चङ्परेऽनग्लोप इति सर्वमिहानुवर्तते तेन च सूत्रद्वयं द्वेधा व्याख्येयं तदाह सन्वद्भावविषये इति एतेन हलादेरिति प्राचोक्तं निर्मूलत्वादुपेक्ष्यमित्यपि ध्वनयति
न हि सुनित्रयोक्तिं विना हलादेरिति पूरयितुं शक्यं तेन वा वृत्तिकारादिभिः प्रयुक्तं यत्तु नत्वत्रेणाम्... हलादिरित्यर्वाचीनमतेनोक्तमिति यच्च तेनैव हेतुमस्तो
औदिदत् आड्डिडत् इत्यादि व्याख्यावसरे उक्तं हलादेरित्युक्तेरर्वाचीनमते दीर्घो न स्वमते तु दीर्घो भवत्येवेति तत्तुच्छं औदिददित्यादौ आलघ्वोरुभयोरपि
णिचं प्रति विशेष्यत्वे दीर्घस्याप्राप्तेः चङ्परे यदङ्गं उन्द इति न तदीयोऽभ्यासः नवा चङ्परणिच्यरं पत्त्र घुतस स्वमते दीर्घो भवत्येवेत्युक्तिरसंगतैव आटि
टदित्यादिभाष्यादिसकलग्रंथविरुद्धा च एतेन भाष्योदाहरणमेव हलादेरित्यस्य पूरणे प्रमाणमिति केषांचिदुक्तेरपास्ता अपि प्रत्युक्ता दीर्घोप्राप्त्येक उदाहरणसौष्ठव
स्योक्तत्वात् यदपि वदंति हलादेरिति सामर्थ्याल्लभ्यते तथाहि चङ्परे णौ यदङ्गं तस्य योऽभ्यासः तस्य दीर्घो विधीयते अजादेस्तु अजादेर्द्वितीयस्येति वचनादङ्गाव
वयवस्याभ्यासो नत्वङ्गस्य नचावयवावयवः समुदायस्यावयव इति निर्वाहः तस्यासार्वत्रिकत्वादिति अत्रेदं वक्तव्यं षाष्ठद्वित्वं तावत् द्विःप्रयोग एवेति स्थि
तमाकरे अस्तु वा स्थाने द्विर्वचनं उभयथाप्यङ्गावयव एव किलाभ्यासः स च नाङ्गावयव इति व्याहतमेव एवं चावयवावयव इत्यादावपि भ्रमोक्तिमात्रं अवय
व एव स्थयं न तु तस्याभ्रमः येन तदीयमसार्वत्रिकत्वं प्रकृते उपन्यासार्हं स्यात् यदपि स्वोक्तेऽर्थे माधवसंवादकथनं तदपि भ्रममात्रमिति समनन्तरमेव माधवमत
विवेचने स्फुटीभविष्यति लघोः किं अविक्षणात् संज्ञायाः इत्यादि अयं भावः सन्वद्भावे घुनि दीर्घो लघोरिति सूत्रद्वयस्यैवेत्यनुवर्तते अभ्यासस्येति च अत्राभ्याससं
ज्ञाकार्यकालात्तेनैकाचो द्वे तयोः पूर्वस्येति फलितं ढे इत्यत्र च उच्चारणो इति विशेष्यसमर्पकमध्याह्रियते तच्च कृदन्तं न योगाद् अङ्गस्येति कर्मणि षष्ठी तेनाङ्गं यत्र द्वि
रुच्यते तत्र पूर्वस्य दीर्घसन्वद्भावौ विधीयमानावेकाच्येव फलितौ किंचास्मिन्पक्षे एकाच इत्यङ्गविशेषणं शब्दतोपि सुलभं एकाचो द्वे इत्यधिकारात् तदिदं मा
धवमतं श्लोकद्वयेनोपनिबद्धं तथा च ऊर्णु धातौ माधवेनोक्तं और्णुनवत् दीर्घो लघोरित्यभ्यासस्य दीर्घो न भवति चङ्परे णौ यदङ्गं तस्य योऽभ्यास इति सूत्रार्थात् अ एम.
त्वङ्गावयवस्याभ्यासो नत्वङ्गस्येति युक्तं चैतत् अङ्गस्येति षष्ठ्याः कारकविभक्तित्वसंभवेन तदुपेक्ष्य शेषषष्ठीत्वकल्पनाया अन्याय्यत्वात् स्यादेतत् उक्तरीत्या ॥ १४

ह्रस्वहलादिशेषचुत्वादीन्यप्यनेकास्युनस्युः नचेष्टापत्तिः दिदरिद्रासति जिगमिषति यियिषतीत्यादिलक्ष्यस्य सर्वसंमतत्वात् तन्निर्वाहार्थं यथोद्देशपक्ष आश्रीयत इति चेन्न।
हीहापि स एवोचितः अर्थाधिकारपक्षस्यैवाभ्यर्हितत्वात् वृत्त्यादिषु स्वीकृतत्वाच्चेत्यभिप्रेत्याह वस्तुत इति ऊर्णोदीर्घ इति स्यादित्यनुषज्यते सन्वद्भावस्त्विह।
नोपयुज्यते णौ कृतं स्थानिवद्भावेन नु शब्दद्वित्वे सत्यभ्यासे ऽवर्णाभावादिति भावः अर्थोपयताविति अर्थमाचष्टे इत्यर्थे णिचि आपुगागमे चेत्यर्थः अर्थ उपयाञ्चा।
यामित्यस्य तु यद्यपि वोपदेवेनार्थापयत इति स्वीकृतं प्राचा तत्र्यांरुत्यात् भिश्चत देवपुरस्कृतं तथापि तत्सर्वं चुरादिगणे भाष्यादिविरोधोद्भावनेन दूषयिष्यते व्यवस्थये।
ति चङ्परे णौ यत्र घु इति व्याख्याने हि येन नाव्यवधानन्यायेन एकवर्णव्यवाये अपीपचदित्यादावेव भाव्यं न त्वनेकव्यवायेन चैवमचिक्षणदित्यादौ सन्वदित्वं न स्यात्
त् न्यायसाम्येन लघौ योभ्यास इत्यत्राप्येकेनैव व्यवायस्य स्वीकार्यत्वादिति वाच्यं अत्स्मृदृत्वरेत्यात्वापवादेनात्ववचनेन तुल्यजातीयापेक्षेण संयोगव्यवधानेपीत्वस्य
ज्ञापितत्वात् अत एव दीर्घो लघोरिति सूत्रे लघोरिति सार्थकं एतच्च वृत्त्यादिषु स्पष्टं माधवोपि जागृधातावित्थमेवाह एवं च वदन् यथोद्देशपक्षमेवाशिश्रियत्
तथा चोर्णोतौ पक्षे नोक्तं तत्र तस्यापि निमित्तनाशीति गम्यते अत एव [illegible]का त्वावचीचकासदित्युदाजहार तथा च मतभेदाभिप्रायेण पूर्वापरस्वग्रन्थविरोधः समाधे
यः यत्तु कातन्त्रे इत्त्वदीर्घयोर्जा[illegible] बाहुपेक्ष्यं माधवोप्येवं जागर्तावाह व्यवस्थामेव विष्टणोति संनिहितमिति हेतुगर्भविशेषणं
अगमेवक्वेति तस्य प्रत्ययांशे ऽस्थितत्वात् [illegible] भावः कैयटेनैवेति तथा च एके हरदत्तमतमपरं तु कैयटमतमिति विषयविभागः केश्चिदुक्तो।
नातीवादर्त्तव्य इति भावः चङ्परे [illegible] योजितं तस्य फलमाह णेरिति अगितामिति पचिकुमिशकिप्रभृतीनामित्यर्थः नहीत्सं
ज्ञकानां लोपो णिचं प्रतीक्षते [illegible] दितः ष्ठिवुक्लमुचमाशिति वृत्तिकृत्तु वार्तिकस्थमाङ् ग्रहणं सूत्रे प्रचिक्षेप जिमिं केचिदिति।
तथा च जेमनमिति भोजने प्रयुं[illegible] लब्धं [illegible] स्यन्विधायके प्रकृतसूत्रे पि तथैव वोपदेवस्तु दंसां तत्रावाह
प्राचापि स एवानुसृतः अमुच[illegible] दिः पुषादिः शमादिः तत्र भ्वादेः भ्राम्यति भ्रमति शमादेस्तु दीर्घं भ्राम्यतीति

उ.
म·ति· त्रे रूप्यंक्रमु पादविक्षेपे क्लमुग्लानौ त्रसीउद्वेगे· त्रुटछेदने लष कांतौ श्यन्वेति उभयत्र विभाषेयं ... अनवस्थानार्थो भ्रमिः क्लमिस्त्रसी च दिवादयः तेभ्यो नित्यं प्राप्ते त्रु
९५ टिः तौदादिकत्वादितरेषां च भौवादिकत्वादप्राप्ते विधानात् यत्तु प्राचा ष्ठिवुक्लम्वितिसूत्रे त्र दैवात् केचित् क्रमो ग्रहणमित्युक्तं पच्च दिवादिगणे भौवादिकस्य तु क्रमो
मतौ त्युक्तं तत्त्रामादिकं म्वादिषु क्रमेरपाठादिति बोध्यं क्रमः परस्मै ष्ठिवुक्लमु चमां शितीति पूर्वसूत्रात् शितीत्यनुवर्ततइत्याह शितीति यत्तु प्राचा शपीति व्या
ख्यायक्रम्यतिश्यनिदीर्घरहितमुदाहृतं तत्त्रामादिकमिति भावः यत्तु परिष्कुर्वंतिइषुगमियमांछइत्यत्रानुदित्याठपक्षेइष्यतेरिष्यातेश्चव्यावृत्त्यर्थं क्रमस्याचीत्य
तोचीत्यनुवर्त्यशित्यचीति काशिकायांव्याख्यातं एवं च संदंशपठितेक्रमः परस्मैपदेष्वित्यत्राप्यचि शितीति संबंधाच्छ्यन्येव भवितुं युक्तमिति· तन्न अचीति
हि पक्षेनुवर्त्यमानमपि छत्वविधावेव मंडूकप्लुत्या संबध्यते न तु ततः प्रागपि लुग्वा दुहेत्यत्र संबंधेदंत्यइवाजादावपि तङि· क्सस्य लुक्प्रसंगात् किंच अचीत्य
स्यानुवृत्तिरिष्टेतिकृतोक्तेतिकिमपूर्वभाष्यकृतैवोक्तत्वात् किंतु न तावता भवदभिमतसिद्धिः अनुवृत्तेः पाक्षिकत्वस्य तत्रैवोक्ततया पक्षद्वयेफलैकरूप्यार्थम
श्येः संबंधस्यैव वक्तव्यत्वात् वृत्तिकारादिभिरेवश्यनिदीर्घस्योदाहृततया तद्विरुद्धतदाशयकल्पनाया असंभवाच्च यदपि वदंति ष्ठिवुक्लम्वितिसिद्धे क्लमःशमा
दौपाठः श्यन्येषामेवाष्टानांदीर्घइतिनियमार्थः तेन क्रमः श्यनि न भवतीति· तदपि न सिद्धे सत्यारंभो हि नियमार्थः न चैषां सर्वेषां श्यनि दीर्घः सिद्धोस्ति येन
श्यन्येषामेवेति नियमः स्यात्· अथोच्येत श्यनि क्लमएवेति नियमः इति तदपि न क्लमेः साक्षादपाठात् अष्टानामित्युक्तेश्च मदिसंग्रहार्थतयोपक्षीणत्वात् शमादिषु मदेः पाठ
स्य घिनुणर्थतयोपक्षयाच्च नन्वेवं क्लमिं मदेरनंतरमुक्त्वा श्यशमां सप्तानामित्येव ब्रूयादिति चेन्न एवमपि अक्षरसंनिवेशे लाघवाभावात् प्रत्युतार्द्धमात्राधिक्यात् मकारांत
संदर्भसौष्ठवमात्रार्थं मदेः पूर्वं क्लमेः पाठसंभवाच्च· यत्तु क्लमेः शमादिषु पाठश्चिन्त्यप्रयोजन इति हरदत्तेनोक्तं तदपि नातिप्रयोजनताभिप्रायमिति दिक् भाष्यविरुद्धमिति एम·
यदि हि द्वौ धातू समनतौ स्यातां तर्हि षोपदेशलक्षणो स्त्यायतिरिवायमपि पर्युदस्येतेति भावः स्नुतगतिरितियत्तु केचित् स्नवेति धात्वंतरमित्याहुः तन्न तथाहि सति तस्माद्धत्वा ९५

आप्लावश्च्वेऽसिद्धे तदर्थं विभाषाडि रुप्लुवोरिति प्लुवः पक्षे घञ्विधानमनर्थकं स्यात् तथा स्रवतिश्रृणोतीत्यादिसूत्रे णप्लुवते रुकारस्येत्वविधानं व्यर्थं स्यात् तद्धि
पक्षे अपि प्लवदिति रूपसिद्ध्यर्थं क्रियते सति चास्मिन्ननेनैवाभिमतरूपसिद्धौ किं तेनेति दिक् मव्य बंधने ममव्येति यस्य हल इति लोपस्तु न भवति यस्येति सं।
घातग्रहणमिति निर्सिद्धांतात् अत एव तत्रार्थवत् परिभाषापि प्रवर्तते तेन पुत्रकाम्येत्यादौ लोपो नेति दिक् आशिषि मव्यात् हलोयमामिति वा यलोपः सूर्क्ष्या।
त्यादि णलः सुषूर्क्ष्ये ईर्क्ष्यो ञ्च कार ईर्ष्यो ञ्च कार एभ्यः क्विपि वलि लोपे स्कोरिति कलोपे जष्त्वचर्त्वयोः सूर्ट् ईर्ट् णत्वस्येति नियमान्न संयोगांतलोपः ऊष्मांत आ
दरे वंस्यनेन स्यात्प्रतदेवरूपं अपदांते तु भेदः सूर्क्षौ सूर्क्षो विति एवं ईर्क्षौ ईर्क्ष्यते श्च क्विपि ईः ईर्क्षौ ईर्क्षो वित्यादि हयगतौ [illegible] शब्दयोरपीति केचित् शिथिलीकरणमि
ति सो मम भिषुणोमीत्यादौ दर्शनात् सुएयाइति तत्सकरणे संधानं स्यादभिषव इत्यमरोक्तेः स्नानमिति वा तांस्त्रीन भिषुण्वतेइत्यादौ दर्शनात् स्नानपरतया चांद्रै व्या
ख्यातत्वाच्च अतोल्रांतस्य यद्यवयववचनेनांतशब्देन बहुव्रीहिः अगं चान्यपदार्थः तर्ह्येतग्रहणमनर्थकं विशेषणेन तदंतविधेः सिद्धत्वात् अथ समीपवा।
ची नांतशब्देन षष्ठीसमासः रेफलकारयोः समीपभूतस्यातो वृद्धिरिति तर्हि लपिरणि श्वक्षि प्रभृतिष्वपि स्यात् अथ लश्च सौ अंतश्चेति कर्मधारयः तर्हि अंतश
ब्दस्य विशेषणत्वात्तस्य पूर्वनिपातः स्यात् [illegible] सप्तमीसमीप [illegible] इति एतेन अतइत्यस्य तत्राद्यत्यादि [illegible] नं अतः किं अखोरीत् त्वांतस्यांग
स्येति किं श्वल्क आशुगमने अश्वल्कीत् [illegible] कारसमीपभूत [illegible] णस्यांतः द्वितीयस्तु नाकारसमीपः नेटीत्य [illegible] प्राप्तं सर्वं बाध्यते बाध्य
सामान्यचिंतायां पुरस्तादपवादन्याय [illegible] विशेषचिंतायां तु नेटीत्येव बाध्येत न तु विकल्पोपीतिभावः यत्तु प्राचा नेटीत्य [illegible] इत्युक्तं तद्विकल्पस्या ।
प्युपलक्षणमिति व्याख्यातुमुचितं यत्तु [illegible] विकल्पे वापवाद इति [illegible] बाध्यसामान्यचिंतायामवधारणायोग [illegible] विशेषचिंतायां तु पुरस्तादपवादन्या।
येन वैपरीत्यापत्तेः न च येन नाप्राप्ति न्याये [illegible] त्र हल [illegible] त्वेन विकल्पस्याप्राप्ते [illegible] दिक् तृफलेत्येत्वमिति यद्यप्यभ्या
से चर्त्वस्यासिद्धत्वादत इत्येद फलभ [illegible] पोसिद्धे तथापि तयो [illegible] विधिमिति सिद्धत्वज्ञापनार्थं तेन [illegible] तुः बभणुरित्यादि सिद्धं न तु फलनि

ष्फ्ताविस्य स्येवतत्रग्रहणमुचितेनिरनुवंधकत्वादित्निचेत्मैवं निरनुवंधकपरिभाषायाः प्रत्ययग्रहणविषयकत्वात् साहित्रामदेवाङ्ग्पङ्गाविति ड्प्रत्ययस्यटित्वे।
नज्ञाप्यते ज्ञापकंचसजातीयापेक्षंकेचित्तुपरिभाषायाः सार्वत्रिकतामन्वानास्तृफलेतिसूत्रेचशब्देनसानुवंधकममुंसमुच्चिन्वंति तत्रहश्चव्रीहिकालयोरित्यत्र।
सामान्यग्रहनिर्वाहार्थंक्रियमाणंजहातेः किंत्वंपरिभाषायाः सार्वत्रिकत्वेमूलमितिध्येयं मीलश्मीलेत्यादि ५२६ सर्वेदीर्घोपधाःमिलश्लेषणइतिह्रस्वोपधस्तुदा
दौ नीलवर्णेणिलगताविति ह्रस्वोपधस्तुदादौ शीलसमाधौउपधारणइतिचुरादौशिलउञ्छइतिह्रस्वोपधस्तुदादौ ञिलगतौ ५४० स्नेहनइतिचुरादौ खोलृखोर्ऋ।
धोर्ऋ ५५६ त्रयाणामपिक्रादित्वान्नोपधाह्रस्वः अचुखोलत् अचुखोरत् अदुधोरत् धोरितकं अश्वानांगतिविशेषः निष्ठान्तात्संज्ञायांकन् ष्ठिवुनिरसने ५६५
ष्ठेवनंत्सुट् पृषोदरादित्वात्पक्षेदीर्घः तथाचचान्द्रसूत्रेष्ठिवुसिवोर्दीर्घश्चेति अयंदिवादावपिसन्लिटोःसन्लिड्निमित्तइति यदित्तुसनिलिटिचपरइतिप्राचोव्या।
ख्यानमाद्रियेततदायङ्लुगंतात्सनिकुत्वंस्यात् नचेष्टापत्तिः माधवादिग्रंथविरोधापत्तेरितिभावः हिविदिविधिवि ५९० प्राक्त्नुधिन्विकृण्वीस्वादिगणेपठितौ॥
तदयुक्तंतथाहिपाणिनीयमतेतौवदिमौभ्वादीएवनतुस्वादी किंचस्वादित्वाभ्युपगमेतत्सामर्थ्यात्पक्षेश्नुःस्यात् तथाचवस्यऊठिअनिष्टस्यष्टमेववोपदेवेनतुविक
रणलोभात् तनादित्वंस्वीकृतंतथाचप्राचोग्रंथोनिरालंबनएवेत्यास्तांतावत् अतोलोपइति नचोपदेशेऽकारांतत्वंनास्तीतिवाच्यं आर्द्धधातुकोपदेशेइतिव्याख्या
तत्वात् इहचधिन्विकृण्व्योरचेतिश्रुतत्वादकारादेशेकृतेचानुकृष्टस्यप्रत्ययस्यपश्चाद्विधानादितिभावः लोपश्चास्यान्यतरस्यांम्वोः संयोगपूर्वोयइतिप्रत्ययस्यविशेषणंतुनकृतं।
अश्नुवहेइत्यादावतिव्याप्तेः उतश्च इहापिप्रत्ययस्यविशेष्यत्वेआश्नुहीत्यादावतिव्याप्तिःअतएवाहप्रत्ययोकारइतिकृवि ६०१ अयमितिकृणोतिरित्यर्थःनतुकृ
णिवरितिभ्रमितव्यं स्वादौहिकृञ्हिंसायामितिपठ्यते तस्यच शब्विषयेपरस्मैपदेकृणिवनातुल्यानिरूपाणि आत्मनेपदेतुकृणुतेइत्यादि लिडादौतुकरोतिवत् एवं
स्थितेअयंस्वादावितियथाश्रुतोधातुवृत्तिग्रंथएवप्राचोभ्रमेमूलमितिबोध्यं अवरक्षणे ६०२ हिंसादानेस्त्वत्रहिंसाचआदानंचेतिविग्रहः एकोनविंशतिरर्थाः त
थाचवोपदेवः अवरक्षणगतौकांतौप्रीतौतृप्त्यौयुतौश्रुतौ प्राप्त्याश्लेषयोर्नेनेवेशभागेवृद्धौग्रहेवधे स्वाम्यर्थेवगमेकामेकृतावितिभिक्ष ६१२ भिक्षायामितियाच्ञाया

मित्यर्थः त्रयोर्थाः क्लेश अत्रस्वामी क्लेशे अव्यक्तायां वाचि चेति पठित्वा इमावपि पूर्वधातोरर्थाविति मन्यते धात्वंतरमिति तु बहवः क्लिश उपताप इति दिवादौ क्लिश्रूबा
धन इति क्र्यादौ ईष गतिहिंसादर्शनेषु दाने च्छिति पाठांतरं वोपदेवादीनां सम्मतं ईषामनस ईषामनीषा शकंध्वादिः पृषोदरादिर्वा मनीषामभिनिविष्टं मनीषितं प्रा
तिपदिकाद्धात्वर्थे बहुलमिति णिजंतात्क्तः मनीषितं घोरापपेन दुग्धेति रघुकाव्ये अयमुंछार्थः परस्मैपदिषु द्वावपि दीर्घादी ह्रस्वादयस्तु त्रयः गत्यर्था दिवादौ इ
छार्थस्तुदादौ आभीक्ष्ण्यार्थः क्र्यादौ वर्षस्नेहने वृषु सेच नह्सग्रे परस्मैपदी शक्त्यर्थश्चुरादौ वृकशब्द इत्यादि यदाह केशवस्वामी कौस्रेकर्द इति पंदते गुदरवे रेषे
तुवाक्ताहसे वुक्के चेश्व खेभयेच हयजेह्रेषे तु हेषेतथेति तथा हेषाह्रेषा च निस्वन इत्यस्य प्रकरणे ऽमरः कासांचक्र इति ६२९ कासृ प्रत्यये स्याम् भासृ दीप्तौ ६३० अस्य
ऋदित्वं तञ्जात्रफलेकं भ्राजभासेत्यादिना उपधाह्रस्वस्य विकल्पात् उभयोरप्यनुबंधांतगकारणं तु प्रकरणानुरोधात् आङः शसि शंसस्तु ताविस ग्रे परस्मैपदि
षु ग्रसु ग्लसु ग्रसित्वा ग्रस्त्वा ग्रस्तः ग्रसिष्णुरिति हेलाराजीये लिंगनिर्देशप्रयुक्तं भुवश्चेति चकारस्य अनुक्तसमुच्चयार्थतापाः वृत्तिकृतोक्तत्वात्समर्थनीयं एते
नभ्राजिष्णुक्षयिष्णू व्याख्यातौ वहि महि ६४० मुह पूजायामित्यग्रे परस्मैपदिषु महोरि [illegible] षु वहेवल्हप्राधान्ये इमौ भाषार्थौ कुत्सी आघो हिंसायामपि तत्रैव वृह
वृहिवृद्धाविति [illegible] परस्मैपदिषु केचित् [illegible] वादयः [illegible] रितोषवीजवैदिकप्रयोगविरोधः तथा च बह्वृचब्राह्मणः प्रवल्हिकांशंसति प्रवल्हिकाभिर्वै देवा।
असुरान्प्रवल्ह्याथैनानात्यायन् व्याख्यातं [illegible] मिना प्रवल्ह्य अनंतं [illegible] न्त्विति यजुरौष्ठ्यादेर्वेह श [illegible] दयं तस्य नेनेस्यर्यानुगमो हि इती
यपर्यायपठित [illegible] आदित्वे प्रमाणं [illegible] सर्वेष्ववयवेषु प्रधानं भक्तीति व्युत्पादनात् एतेन स्तोत्रं [illegible] व्यातं एवं च मणिप्रवर्हो इ
त्यत्रापि प्राधान्य [illegible] आदित्वं न्याप्य [illegible] वर्ह [illegible] आयइति उष्मांत [illegible] पदंते इति हिषद्वृत्त च ब्राह्मण [illegible] अश्ववेहते रति प्रत्यये निपातित इ
तिभावः [illegible] इति वा शब्दस्य भुजपर्णा [illegible] भावः गण [illegible] पीति [illegible] जहमानं पतत्री त्यत्र सर्वैर्वेदभा
ष्यकारैस्तथैव व्याख्यातत्वादिति भावः [illegible] इह पठितः ६५० अनुत्तमप्यूह इति प [illegible] प्रयोगस्तु अनुदात्तेत्वलक्षणमा।

उ
म·ति·
१७

त्मनेपदमनित्यमितिसमाधेयः केचित्तु ओहाङ्गतौ इत्यस्य पूर्वं पठित्वा उपसर्गादस्यत्यूह्योरिति परस्मैपदमाहुः अगाढेति झलो झलीति सलोपः ढत्वधत्वष्टुत्वढलोपाः सिज
लोपात्पूर्वं भष्भावस्तु न असिद्धत्वात् ननु [illegible] लोपे प्रत्ययलक्षणेन सादिप्रत्ययपरत्वात् भष्भावोऽस्त्विति आशंक्य सिज्लोपस्य प्रत्ययलक्षणे पूर्वत्रासिद्धत्वादिति
माधवः अत्रेदं वक्तव्यं शंका तावदसंगता वर्णाश्रये प्रत्ययलक्षणाभावात् ननु यत्र वर्णमात्रमाश्रीयते तत्र मा भूत् यथा गवे हितं गोहितमित्यत्रावादेशो न यत्र तु व।
र्णविशिष्टः प्रत्ययः आश्रीयते तत्र स्यादेव यथा तृणेढि ईमागम इति चेन्न भष्भावेपि वर्णस्यैवाश्रयणात् प्रत्ययस्याप्रकृतत्वात् किंच स्थानिवत्सूत्रेणासिद्धे प्र
त्ययलक्षणसूत्रं नियमार्थमिति भाष्ये स्थितं स्थानिवद्भावश्च विशेषणत्वेनाप्यलाश्रयणे निषिद्धः अन्यथा प्रपठ्यत्र इडागमापत्तेः अत एव तृणहइमृ इत्यत्र अ
च्चिनेत्यनुवर्तते तेन तु हलीति कैयटादौ स्पष्टं तस्मादिह शंकामंदैव असिद्धत्वेन समाधानमपि मंदमेव स्थानिवत्सूत्रं प्रत्यसिद्धत्वं नास्तीति प्रागेव प्रपंचितत्वात् अन्यथा
गमइत्यत्र विसर्गो न सिद्ध्येदिति दिक् णिक्षचुंवने प्रणिक्षतीति उपसर्गादसमासेपीति निःसंयोणत्वं वानिंसनिंक्षनिंदामिति विकल्प[illegible]हत्येव धातुत्वेपि तिङं तेन दुदाहर
णं प्राचः प्रामादिकमेव आकरविरोधादिति भावः अवश्वेत्यादि सूत्रग्रहणमादरः ततोन्यदसूत्रणमित्यमरग्रंथार्थः कल्पसूत्रेष्वेव दृश्यते सोमेनयक्ष्यमाणो नर्त्तू सूत्रेन्न
नक्षत्रमिति तैत्तिरीयब्राह्मणे च तत्तु न सूत्रं द्राक्षि ध्राक्षि ध्वाक्षि ६७८ एभ्यो गुरोश्च हल इत्यप्रत्यये द्राक्षा ध्राक्षा ध्वांक्षा आघयोरनुनासिकलोपो यवादिगणे निपातना
त् मतोर्वत्वं तु द्विभ्योपि न अयवादिभ्य इत्युक्तेः द्राक्षामान् ध्राक्षामान् ध्वाक्षामान् मूष स्तेये ६८२ संज्ञायां क्वुन् मूषकः अपं ह्रस्वोपधः आदौ जूष चेति ६८६ जु
षी प्रीतिसेवनयः इति तुदादौ जुष परितर्कणे इति चुरादौ ह्रस्वोपधो भूष अलंकारे चुरादावपि कृष रुष शिषेति ७०० एषु तृतीयो निरुद्धः शिषिं पिषिं सुष्यति पुष्यती।
त्विषिमिति व्याघ्रभूतिवचनात् न च तत्र रुधादेरेव ग्रहणं संकोचे प्रमाणाभावादिति मैत्रेयपुरुषकारमाधवादयः तदनुरोधेनोदाहरति शेष्टेत्यादि वोपदेवादय।
स्तु अमुं सेट्कमाहुः तन्मते शेषितेत्यादि वोध्यं जिषु विषु मिषु ७५ इह द्वितीयो निरुद्धः श्लिषिं विविषिं तुष्यति दुष्यति द्विषिमिति क्वचनात् वोपदेवस्त्वमुं सेट्कमाह कैयटा गम १८
दय इति आदिशब्दान्न्यासकारहरदत्तवर्द्धमानस्वामिसंमताकाराः धस्लृ अदने ७२१ आशिषीति आशीर्लिङि स्यर्थः एतच्च कर्तरि प्रयोग। सम्भिप्रेत्योक्तं कर्मणि

तुयग्विषयेऽयोगो नेति बोध्यं पुषादिद्युतादि पुषधातुर्गणचतुष्टये पठ्यते भ्वादौ दिवादौ क्र्यादौ चुरादौ च· तत्र नेह भ्वादिर्गृह्यते द्युतादीनां पृथक्करणाज्ज्ञापकात् ते
हि तत्र पुषेः परिपठ्यन्ते नापि क्र्यादिः तत्र हि पुषेः परि चत्वार एव धातवः यदि च तत एव निघृष्सिताः स्युस्तर्हि ऌदित एव क्रियेरन् न चानेकानुबन्धासङ्गगौरवं त्रयाणां
निरनुबन्धकत्वाग्रहेः स्वरितेत्त्वेपि ऌकारोऽगौरवतन्निर्वाहात् यत्तु हरदत्तादिभिरुक्तं स्वरितेत्त्वादेरपि तेनैव सिद्धत्वादिति तत्रादिशब्दग्राह्यं किमिति तत एव प्रष्टव्याः
न च त्रुटे· वत्तथा· अपिशब्दसमुच्चयस्य दुर्वचत्वादिसामन्तातावत् नापि चुरादिः णिचा व्यवधानेन ततोऽनन्तरस्य ऌत्वस्यासंभवात् अतः परिशेषाद्दिवादय एव गृह्यन्ते ते
दाह श्यन्विकरणात्पुषादेरिति· नन्दिग्रहिपचादिभ्य इतिवत् पुष स्फुतादीसेक एवादिशब्दः सूत्रे पठितुमुचितः ननु पुषादयो द्युतादयश्च ऌदित एव कुतो न कृता इति।
चेत्· मैवं प्रत्येकं ऌकारपाठे विपरीतगौरवापत्तेः न चानुबन्धान्तरेणालंकारेण निर्माणं तु शक्यं· तत्तत्कार्यानिर्वाहप्रसङ्गात्· आदितामीदितामुदितामूदितां च तत्र स
त्वात् तद्यथा पुषादिषु ञिष्विदा मदी· षिधु शमु· द्युतादिष्वपि ञिश्विता ञिमिदा· ञिष्विदा· स्रन्सु· ध्वन्सु स्यन्दू· कृपू इति पठ्यन्ते· यत्तु पुषादिषु षिधूसंराध्यविस्मृ
दि स्वरूपत इति· तत्प्रामादिकं ऊदित्त्वे तस्या निष्ठायामिट् सुपाठस्य वैयर्थ्यापत्तेः तस्माद्ध्रस्व एव सिध्यतेरनुबन्धो बोध्यः जर्ज चर्च झर्झ एषां च वर्गीयान्तेषु पाठ उचितः न त्वि।
होष्मान्तेषु शशब्दत्वे गर्तो शो शातुरिति· इत्यश्च तुरिति प्राचीनोंगणः प्रामादिक इत्युक्तं चह· अचहीत इति· हान्तत्वान्न वृद्धिः रल्यागे· अयं कथादौ मित्त्वकरणे च चु
रादौ अनिट्कारिकास्विति· अत्र च व्याख्यानमेव शरणं· अथ भ्वादेरन्तर्गणानाह द्युतादीतौ ञिमिदा· मिदेर्गुणः शि[illegible]त्यनुवर्तनेमाच्च कर्मधारयात्सप्तमी अंगा।
क्षिप्तश्च प्रसक्तयो विशेष्यः तेन यस्मि[illegible]वर्ति· तदेतदाह इत्संज्ञ कणाकाभादाविति· इत्थं व्याख्याय[illegible] इति शितीति बहुव्रीहौ तु मि।
[illegible] भावः पपेत[illegible] स्युरिति बोध्यं अयं दिवादिश्चुरादिश्च ञिष्विदा [illegible] भविष्यति स्विद्यतीति स्नेह
नमोहनयो[illegible] ७५४ [illegible] ७५५ आयोग[illegible] तृतीयान्तः द्वावेव धातू द्वितीयान्तौ
चे[illegible] संचलन[illegible] मः चतुर्ग[illegible] यमिति व्याचख्युः तन्न· तत्रापि
[illegible] स्यन्दतो सुधीभवि[illegible] हिक[illegible] समिटि

प्राप्ते निषेधोयं अत्र गमेरिडित्यतः परस्मैपदेष्विति सनुवर्त्तते · तच्चास्मिन्सूत्रे तङानयोरभावं लक्षयति इहापि तथैवार्थाधिकारात् तेनासत्यपि परस्मैपदेष्विति सनुवर्त्त
ते · तच्च तस्मिन्सूत्रे तङानयोरभावं लक्षयति इहापि तथैवार्थाधिकारात् तेनासत्यपि परस्मै[illegible]तिहे लुकि च निषेधः सिध्यति विवृत्सिता · विवृत्सत्वमिति तदेतदा
हितङानयोरिति अत्र भाष्यवार्त्तिकयोः वृत्तादीनामात्मनेपदेन समपदस्थयो[illegible]निषेध इति स्थितं · तेन विवृत्सिष्यत इत्यत्रात्मनेपदाप्राप्तेः पूर्वं तत्स।
मानपदस्थत्वाभावादंतरंगो निषेधः प्रवर्त्तते स च कृतेऽपि तङि · न निवर्त्तते चतुर्थे हणा[illegible]दिति वक्तव्यं तस्तु पंचम्य इति वक्तुमुचितं · एवं हि तासि चेत्येवास्तु ·।
क्लृप इत्यर्थे · न च वृत्तादिष्विति व्याप्तिः परस्मैपदाभावात् · तङानयोः सत्वाच्च · अनुविपर्य[illegible]निभ्यः प्राणिषु नेत्युक्ताविति न चैतदेव सूत्रेभिप्रेतमिति वाच्यं प्र
सज्यप्रतिषेधेऽसमर्थसमासापत्तेर्वाक्यभेदापत्तेश्चेति भावः कृपो र इति सर्वाचीनानां पाठः मुपेस्य भाष्यारूढं पाठमाह कृपो रो ल इति रेफस्य ऋश इति · वर्णैकदेशानां व।
र्णग्रहणेनाग्रहणमिति सिद्धांतात् पूर्ववाक्येनाप्राप्ते आवृत्तिसिद्धेन द्वितीयवाक्येन सामर्थ्याद्विधीयते · लुटि च क्लृप इत्यादिसौत्रनिर्देशो भाष्यकारव्याख्या।
नं चेह प्रमाणमिति भावः क्लृप्सीष्टेति लिङ्सिचावात्मनेपदेष्विति कित्वान्न गुणः · वृतुवृत्त इति वृतु वर्त्तन इत्यस्मात् क्विप् घटचेष्टायामित्येपे धातवोऽन्यत्राधीता इ
ह पठ्यंते तेषामर्थे नियमः ये त्विहैव पठ्यंते तेषामुपसर्गादिनार्थांतरत्वेपि मित्त्वमस्त्येवेति न्यासधातुवृत्त्यादिषु स्थितं तदेतद्ध्वनयन्नुदाहरति विघटयतीति व्य
थो लिटि हलादिशेषापवाद इति अभ्यासांतर्गतस्य यकारस्य निवृत्तेरपवाद इत्यर्थः अत एवाह व्यथस्येति ञित्वरा [illegible] आदित्वमात्मनेपदमात्रफलकं रूप्या।
म त्वरेति निष्ठायामिटो विकल्पितत्वादिति मैत्रेयहरदत्तादयः दृ भये ८११ आभरणकारमतमाह केचिदिति माधव इति तस्यायं भावः सूत्रे दीर्घोच्चारणपाठस्तावद
विगीतः व्याख्यातारोपि द्विविदारणे इति व्याचख्युः युक्तं चैतत् ह्रस्वानाभ्युपगमे हि दृदृप्रां ह्रस्वो वेति दृणातेर्विकल्पेन ह्रस्वविधानमनर्थकं स्यात् धातुद्वयेन दद्रतुः
ददरतुरिति रूपद्वयसिद्धेः न चार्थभेदः धातूनामनेकार्थत्वादिति · लुग्विकरणेति स्वरतिसूतिसूयतीति सूत्रे सूङिति वक्तव्ये सूतिसूयत्योः पृथग्ग्रहणमस्याः परिभाषायाः ।
ज्ञापकं परिभाषाभ्यामिति · उक्तपरिभाषयोः परस्परविरोधे सति उभयोरप्यप्रवृत्तिः अथवा अवधारणांशपरित्यागेनाविरोधे समुच्चय इति भावः मारणतोषणाः

माधवइतिशमलक्षस्यालोच नइत्यस्यहिनिशामनमितिरूपं आलोचनंचक्षुर्जन्यंज्ञानमेव·पश्यार्थेश्चानालोचनइत्यादौवृत्तिकारादिभिस्तथैवव्याख्यातत्वा
दितिभावःज्ञापनमात्रमितिश्लाघह्नुङ्‌स्थेतिसूत्रेज्ञीप्स्यमानइतिप्रयोगादितिभावः एष्वर्थेष्विति·पशुंसंज्ञपयति·मारयतीत्यर्थः विज्ञपयतिसंतोषयतीत्यर्थः
मतांतरेतुवोधयतीत्यर्थः प्रज्ञपयतिशरंतीक्ष्णीकरोतीत्यर्थः स्यादेतत्माधव मतेज्ञीप्स्यमानोवोधयितुमभिप्रेतइतिवृत्तिग्रंथस्यकागतिस्तत्राहज्ञ·पमिच्चेति
ज्ञापनमिति तथाचवोधनेधातुभेदेनरूपद्वयंफलितमितिभावः यदाहदेवःजानातीतिश्रिसिध्येत् ज्ञपयतितुपुनर्मारणादौघटादेर्गौणमित्वेपीदमेवज्ञपमि
दितिपदंज्ञापनेमारणादौ·तेनार्थोज्ञापनेर्थेज्ञपयतिपदवत्ज्ञापयेदित्यपिस्यादिति कपनेचलिःधातुनिर्देशइक् एवंकुदिहजेने जिद्धोन्मथनेलडिरि
सत्रापिवोध्यं घटादयोमितः माधवादीनांव्याख्यामाह मित्संज्ञाइति मकारानुबंधाइत्यन्ये·ज्वलह्वलएषांमित्वमिति मितइत्यनुवृत्तंश्लेशेनव्याख्येयमि
तिभावः ज्वलह्वलह्मलनमोनुपसर्गाद्वेतिपाठांतरं·तत्रनदश्चिल्लेशःप्राप्तविभाषेति। ज्वलादीनांपूर्वत्रपाठात् नमेस्त्वमंतत्वादितिभावःकथंसंक्रामयतीति य
त्सुधाकरेणोक्तं·इहापिघ[illegible]दोत्तोपदे[illegible]तिवृद्धिनिषेधादितिभावः वृत्तिन्यासादीति तथाहि नपादम्येतिसूत्रेआयामयतइत्युदाहृत्य।
यमोपरिवेषणइतिमित्त्वंप्राप्त[illegible]म्यमिचमामिस्यतेनेत्यनु[illegible]तेइत्युक्तं तथामैत्रेयादयोपि·नेत्यनुवर्त्यव्याचख्युःएवंहिनिषेधानंतरंपा
ठउपपद्यते अन्यथानकमीसत[illegible]दिति·तपरकरणलभ्यं[illegible]वधारणंह्रस्ववत्सुचरितार्थं·दीर्घवत्तुवाधात्पज्यतइतिभावः ८४९
ट्वम[illegible]मितिपठन्ति[illegible]नाकरं तथाहि[illegible]दित्तश्चेतिचकारस्यानुक्तसमुच्चयार्थत्वमाश्रित्यवातइत्यत्रेडभा
[illegible]त्वपस्यविभाषे[illegible]त्यवसाधुःसुधाकरइति अन्येतूदरमा इतिसगुणमेवपठंतिभागवृत्तौत्विति
[illegible]समददेतिसूत्रे[illegible]कारांतसंघातग्रहणेनेष्टसिद्धेःएवं[illegible]ग्रहणमौपदेशिकत्वप्रतिपत्त्यर्थं अनुबंधाश्चेकांताःपद्य

वमेगदौयकारोलुप्तनिर्दिष्टः तथाचउपदेशेवादित्वाभावात् निषेधोन वेमुश्चकेचिद्बुधिरंइत्यादिप्रयोगाश्च हानुकूलाइति रमक्रीडायांत्र्ययमुदिदितिमन्वा
नावोपदेवादयोरमित्वारंत्वेत्युदाजहुस्तन्नाहानौनमिहन्तइतिमाधवः पाघ्राध्मा· पापाने· पारक्षणाइतितुनगृह्यते लुग्विकरणत्वात्· दृशीतिसौत्रोनिर्दे
शः दृश्यतीतिपाठस्तुचिंतएव इतंसंज्ञकशकारादाविति तेनपयेइत्यादौनशितीतिकर्मधारयस्योक्तत्वात्तबहुव्रीहौतुस्यादेवदोषः अतएवार्त्तिसर्त्तीजौहोत्यादि
कयोर्नेहग्रहणंशपः श्लुनापहारात् चानशः संभवेपिशकारादित्वाभावात्· पत्वाकुः शित्यचीतिव्याख्यानात्चानशिनेतितन्नउक्तरीत्याकर्मधारयस्यावश्य
कत्वेऽचीत्यस्यवैयर्थ्यात् सदेः परस्यमदिस्वंज्योरितिपाठस्तत्स्पष्टत्वात्स्वप्नेहपिभाष्यानुगुणत्वादूपेक्ष्यः शल्दृशातने विशीर्णेजायांमितितथातैत्तिरीयेश्रूयते यद
श्वशीयतेति शातनंत्वितिशदेरेवहिणिचिशदेरगताविति तत्त्वेल्युटिचशातनमितिरूपं· तथाचास्यैवधातोरिदंरूपंप्रसिद्धमितितन्निर्देशः गम्लृगतौइपचा
ष्याकइत्यादिवदितिभावः कुचसंपर्चनेत्यादि ८४४ कुचशब्देतारइतिपठितस्येहपुनःपाठः संपर्चनादावेवज्वलादित्वप्रयुक्तोणोपथास्यात् मेधृसंगमेच·
८६२ प्रजायेगृहमेधिनामितिलक्ष्यं गृहैर्मेधंतेसंगच्छंतेइतिविग्रहः बुधिरवोधनेपूर्वोत्तरेतिदैवादिकेनित्यात्मनेपदिभिश्चसाहचर्यात्तथाभूतस्यैवग्रहणमि
त्यर्थः यत्तुमाधवेनोक्तं अकर्मकैःसाहचर्यादितितदुपेक्षितं सकर्मकादपिचिणदर्शनात् तथाचमाघः· अबुद्धनारदइत्यबोधिसःश्रीहर्षोपि· अबोधितज्ञा
गरदुःखसाक्षिणीति उबुंदिर् बुंदित्वा· बुंत्वानिष्ठायांबुन्न· निशामनेचाक्षुषंज्ञानं· वेणृ८७१ वादित्रस्यवाद्यभाण्डस्यवादनार्थमादानंवादित्रग्रहणं नातोपी
ति उतमातामहिषमन्ववेनदित्यत्रभाष्यकारैस्तथोक्तत्वादितिभावः व्ययगतौ ८७४ वित्तत्यागेतुनित्यमात्मनेपदीगतः अयंतुचुरादावदंतःस्पश ८८० बाधन
स्पर्शनयोः अपस्पशत् अत्स्मृदृत्वरप्रथेत्यादिनाअभ्यासस्यात्वंसन्वदित्वापवादः स्वामीतुपषइत्येकेइत्याह अत्रपाठेपतोव्रतानिपस्पशेइत्यादयःप्रयोगाः
प्रतिकूलाःपस्पशा·यङंतादचिटाप् संज्ञापूर्वकस्यविधेरनित्यत्वान्नाभ्यासस्यदीर्घइतिमाधवः पसेतिदंत्यांतःसौत्रोधातुःपसतीत्यादि यङ्लुकोलुक्जपजभेत्या

दिनाभ्यासस्यनुक्·पंपस्यते·पंपसीति·पंपसइतिकंड्वादि· पंपस्यति·हञ् ८९२ भारंहरति ग्राममं प्रापयतीत्यर्थः अंशंहरतिस्वीकरोति स्वर्णंहरतिचोरयति पापं
हरतिनाशयति आदेचउप लिटिधातोरित्यतोधातोरित्यनुवृत्तमेचाविशिष्यतेतदाह उपदेशे एजंतस्येतिधातोः किंगोभ्यां नौभ्यां अस्तिह्यत्रापिगमेर्डोग्लौनु।
दिभ्यांडौस्त्युपदेशे एच् उपदेशे किं चेनास्तोना·लाक्षणिकत्वादेवात्रनभविष्यतीतिचेत् एवंतर्हिवर्णग्रहणेलक्षणप्रतिपदोक्तपरिभाषानाश्रीयतइतिज्ञा
पनार्थमिदंतेनक्रापयतोत्यादौकृतात्वानांपुक्सिध्यति अशितीतिपर्युदासेवहवोदोषाः तथाहि· सुग्लःसुग्लासुग्लानः आकारांतलक्षणःकाङ्सुचोना
सुःप्रत्ययनिमित्तत्वात्वं आदंताच्चप्रत्ययइत्यन्योन्याश्रयात् किंच जग्लेइत्यत्राभ्यासेइकारः श्रूयेतद्विर्वचनेचीतिवचनात् त स्मात्प्रसज्यप्रतिषेधएवायं विषयसप्त
म्यां तुपर्युदासेपिनक्षतिः अत्रवक्तावामश्चेतिसूत्रेणकवाधनार्थपुनरणिविधानंज्ञापकं तदाहुः अनैमित्तिकमात्वं शिति तुप्रतिषेधइतितदेतदाह ननुशितीतिइत्से
ज्ञकशकाराद्दौप्रत्ययेपरेनेत्यर्थः धातुग्रहणाच्छित्तस्यप्रत्ययस्यशितीतिकर्मधारयेणविशेषणात् यदितु शितीतिवहुव्रीहिःस्यात्तर्हिजग्लेइत्यादिनसिध्येत् एशः
शित्वात् आतोलोपइटिच अजाद्योःकिंग्लायतेयक् जाग्लायते यङ् दासीयः इट् आर्द्धधातुकयोः किंयाति·व्यत्यरोपदानेकर्मव्यतिहारेतङ्·लङ् तमेकवचनमिट्
चेत्यकारणे ध्यायतिदधौ घुमास्थेत्यत्रेति व्याख्यानात् तंत्रांतरेस्यतिजहातीतिश्यनानिर्देशाच्चेतिभावः विभाषाघ्रेति श्यविकरणाभ्यांशाच्छाभ्यांसाहचर्यादितिभावः
एवंशाच्छासेतिपुग्विधावपिवोध्यं तेनास्य [illegible] तिप्रागेवमापयतिऋतश्चसंयोगादेर्गुणः ऋच्छत्यॄतांइहसूत्रद्वयेपिप्राचान्त्र [illegible] मितेलिखितिस्यात्तंतत्सूत्रा
ननुगुणं दयते र्दिगिलिटीतिहिप्रकांतं [illegible] इतिकुतस्त्यननुस्वविषये द्विर्वाधिकेतिचेन्न·परत्वेनगुणस्यैवन्याय्यत्वात्· यत्तुपूर्वविप्रतिषेधेनदृ।
द्विरितितन्निर्मूलंनिष्फलंच तदेतदाहगुण [illegible] गुणार्त्ति· अर्त्तीतिम्वादिह्वाद्योः छांदसेनलुकानिर्देशः ऋग्रहणमेवंतुसुकरमितिहरदत्तः तत्रपंङ्·लुक्
व्याहृत्यर्थत्वात्·श्नम्निर्देशस्य अंको [illegible] हणंचिस्यप्रयोजनं अयङ्·पिङ्गितीति [illegible] यीत्यनुवर्ततेतच्चलिङ्गविशेषणं तदाहयादीति तेनेहनसंस्क
षीष्ट सर्त्तिशास्त्यर्त्तिभ्यश्च भ्वाद्योरर्द्व [illegible] नादौयदुदाहतंतत्राकरवि [illegible] भावः [illegible] ऽभ्यनुज्ञानमितिसवितुःप्रसवेइत्यादौतथादर्शनात् हुश्नु

वोः सार्वधातुके ह्रस्ववोः किं योयुवति नोनुवति असंयोगपूर्वेति किं अस्नुवन्ति असंयोगपूर्वग्रहणमो विशेषणं न तु प्रत्ययस्य तेनाप्नुवंतीत्य त्रापि यणेनेति भावः स्या
देतत् ह्रस्वग्रहणं व्यर्थं योयुवतीति यङ्लुगंतस्य प्रकारांतरेणैव वारणात् तथा हि छांदसो यङ्लुक् प्रत्ययस्यार्द्धधातुकत्वादेव यण भविष्यतीति चेत् सत्यं ह्रस्वग्रहणादे
वज्ञापकात् भाषायामपि क्वचिद्यङ्लुग्भवतीति भाष्यकारैः चांद्रास्तु यङ्लुको भाषाविषयत्वं निःसंकोचमेवेच्छंति ज्ञापकतामेव ध्वनयितुमिहानेकाच इत्यस्यानुवृत्तिः
प्रदर्शिता तेन युवंति नुवंतीत्यादेर्व्यावृत्तौ सत्यां हि ह्रस्वग्रहणस्य ज्ञापकतां निर्वहति अन्यथा सार्वधातुकपरयोः ह्रस्ववोरनेकाच्त्वाव्यभिचारात् किं तदनुवृत्त्येति दिक्
इवर्णादेशस्यैवेति न त्वास्यापि ग्रहणमस्त्विति वाच्यं गानेङ इत्यादौ तङ्प्रवर्तस्य ङकारस्य चरितार्थत्वात् आदेशङकारस्तु न चरितार्थः स्थानिवद्भावेन ङित्वादेव गाङः सिद्धः।
त्वादिति भावः कुङ् वङ इति कुहोश्चुरिति ङस्य जः ९५० कुङ इति असमासश्चाय विविक्लवः ववयोरभेदात् विक्लवदिति माधवः रुङ् ९५८ रेषणं हिंसेति रिषेर्हिंसायां पठित।
त्वात् प्रेपदेवोप्याह सङ्कुधेगत्यामिति प्राचां तु भाषणे चेति पठितं व्याख्यात भिश्च रोषणे चेति पाठान्तरमुपन्यस्य रोषणं कोपोत्पादनमिति व्याख्यातं तत्सर्वं माधवादि विसं
वादादुपेक्षितं मेङ् प्रणिमयत इति नन्विह नेर्गदेति कथं स्यात् शिद्विषये आत्वाभावेन मारूपाभावात् किंच अशिद्विषये कृतात्वेप्यस्मिन्सूत्रे त्वं दुर्लभं प्रतिप
दोक्तस्यैव माधातोर्ग्रहणौचित्यात् गामादाग्रहणेष्वविशेष इति चेत् मीनाति मिनोत्योरपि कृतात्वयोरतिप्रसंगः इत्यत आह तत्रेति इष्टत्वादिति अयं भावः
दाधाघ्वितिसूत्रे प्रणिदापयते प्रणिधयतीत्यत्र णत्वसिद्धये भाष्यकारैरित्थं सिद्धांतितं णत्वविधौ घुमेत्यस्य स्थाने घुप्रकृतिमाङिति पठनीयं घुश्च प्रकृतिश्च मा
ङ् चेति द्वंद्वः प्रकृतिश्च कस्येत्याकांक्षायां सन्निधानात् पूर्वोत्तरयोरेव अतो न कापि व्याप्तिः नापि मामानइत्यत्र मीनाति मिनोत्योश्चातिव्याप्तिः माङो ङकारानुवं।
धस्यैवोपात्तत्वादिति दिग्यादेशेनेति दयतेर्लिटि द्वित्वं प्राप्तं दिग्यादेशश्च तत्र विशेषविहितेन दिग्यादेशेन द्वित्वशास्त्रस्य बाधः पीख्यात्भ्यां द्वित्वं न बाध्यते वि
षयसप्तमीमाश्रित्य लिङ्सिचोः प्रागेव तयोः प्रवृत्तत्वात् दिग्यादेशविधौ तु परसप्तम्येव न तु विषयसप्तमी लक्ष्यानुरोधात् तदेतत्सूचयति इष्यत इति स्थाघ्वोरिच्च।
इहात्मनेपदेष्विति नानुवर्तितं परस्मैपदेषु गातिस्थेति लुकः प्रवृत्तेः डीङ्। विहायसा आकाशेन वा तु पुंस्याकाशविहायसी इत्यमरः विहायसाभिस नाकरः पाठः मान्वध।

अभ्यासस्याविकारः अभ्यासः सचत्वमेव तथाहि दाघश्चुसाश्च इत्युपास्थित· नचमानादीनामभ्यासस्य विकारभूताच्चु इकारादन्यः सम्भवति· यादनुहृस्वइत्यवगृह्यत
तर्हि तद्धितनिर्देशो व्यर्थः स्यात् सदित्यभ्यासे ईकार अवर्णार्थे क्रियते· अन्यथा अजंतस्याभ्यासस्य विधीयमानो दीर्घः हलादिशेषमात्रं प्रतीक्षेत न तु सन्वद्भाव
मपि तदेतदाह इकारस्येति· अत्र न्यासकारः धातोः कर्मणः इति सूत्रे वाग्रहणं विभज्य त्रिसूत्रीशेषतया संबध्यते साच व्यवस्थित विभाषा तेनेह सूत्रद्वये अर्थविशे
षोपहिते भ्य एव सन्निति स च विशेषो मुनित्रयेण साक्षादनुक्तोपि वृत्तिकारादिभिरुपनिबद्धः तं दर्शयति गुपेर्निंदायामित्यादिना सन्नंतस्येत्यादि यत्तु प्राचा
सन्यङोरिति सप्तमीमाश्रित्य सनि यङि च परे इति व्याख्यातं तन्न प्रतीक्षिषति· अटाट्यते इत्यादौ सन्यङोः प्रकृतिभागस्यैव द्वित्वापत्तेः आट आट तु [illegible]दौ लि
ट्प्रकृतेर्यथा· न हि निमित्तत्वाविशेषे लिटो न द्वित्वं सन्यङोस्तु तदिति संभवति यत्त्वत्र प्राचोक्तं शपोऽकारेऽपि सिद्धे सन्यङोरकारोच्चारणमजादेरिति द्वित्वार्थं ते
न यसनोर्द्वित्वमिति तन्न· निमित्तस्य कार्यित्वायोगात्· न चाकारोच्चारणस्य सामर्थ्यमिति युक्तं· अकारफलानां बहूनां सत्वात् तथाहि पापच्यक इत्यादावल्लो
पस्य स्थानिवत्वादत उपधाया इति वृद्धिर्न भवति [illegible] दित्सधित्सलिप्सादिभ्य एकाच्त्वाभावाद्घञ् अपिच दित्स्यधित्स्यमित्यत्र अचो यतिकृते यतो नाव इ
त्याद्युदात्तः सिध्यति तथाच प्राचाप्युक्तं अनेनामुत पूर्वोद पिपत् दित्स्यं धित्स्यमिति किंच पिपठिषिब्राह्मणकुलानी संत्रोटिते मस्य स्थानिवत्वाज्झलंतलक्ष
णो नुम्न अपिच· यस्य हल इत्यत्र यस्येति संघातग्रहणं· अहर्यीदित्यादौ यलोपव्यावृत्त्यर्थमिति सिद्धांतः तथाच अपापचिष्टेत्यादौ यलोपोऽप्यकारफलं।
अपिच· पापच्यतेरचो यत्· पापच्यः [illegible] कथंचिद्यलोपे णित्युपधावृद्धौ चजोरिति कुत्वे पापाक्य इति स्यात् अपिच· अपापचिषेत्स्वयमेव
अपापचिष्ट वेति यङंतस्यानंतरे [illegible] विकल्पः सिध्यति तस्मात् सन्यङोरिति सप्तम्येव युक्ता अत एव यङ्लुकि प्रत्ययलक्षणेन यङंत।
त्वात् द्वित्वं सिध्यति परस्मैपदं त्वेकाचो [illegible] नुमन्तेति निषेधः प्रवर्त्तते ति [illegible] नशानौ चेति आर्जवनिश्चला [illegible] भावः अर्थांतरे त्विति· गोपना
दिरूपे धातुपाठोपात्त इत्यर्थः चुरादयः [illegible] मात्रसाम्येपि भ्वादयो [illegible] त्वे इत्यर्थः भेदाभ्युपगमस्य फलमाह अनुबंधस्येत्यादिना अभेदे तु स

 न्तन्तादिवाकर्तृगफलास्यंतादपितङ्स्यादिति नौकः इङुणाविति यस्यपिहलं ताच्चेतिसनः किंत्वेनापिगुणः सुपरिहरस्तथापिङभावायउक्तहेतुरेवानुसर्त्तव्यः एवं
 चगुणप्रसंगस्यैवाभावात् किंकित्वान्वेषणेनेति भावः मीमांसतइति कात्तरंतंत्रेवाचस्पत्यादौ मीमांसशब्दोमाङ्मानइत्यस्माद्युत्पन्नइत्युक्तं तद्यदिसमर्थनी
यमितिसाग्रहस्तर्हीत्यमाशयः कल्प्यः इहमानप्रकृतिकत्ववत् आत्मनेपदार्हाचुरादिकाङ्गित्वैवेतिस्थितं मानपूजायामित्यादिवृत्तिकारग्रंथोपि भक्त्याव्याख्येय
एवनहितस्मादयंसन् एवंस्थितेसन्प्रकृतिरनुदात्तेतश्चेत्यत्र मानाभावात् ङि देवसात्क नुक्मसूत्रेनिपात्यतांमुंडमिश्रादिसूत्रेहलकलयोरदंतत्ववत् नचवै
याकरणानामुपायेष्वाग्रहः उपेयप्रतिपत्त्यर्था उपायाअव्यवस्थिताइत्युक्तेः नचैवंसनिमीमेतिइसप्रसंगः घ्वादिसाहचर्यान्मेच्छामन्येवतद्विधानादितिरभ
रभस्ये ९६० रभस्यमुपक्रमः वेः स्कंदेरनि अशेषोपदेशत्वादप्राप्तेविभाषेयं यत्तुसास दाघोरितिनिषेधेप्राप्तेइति तन्न नेषेधस्यप्राप्तिपूर्वत्वात् क्तस्येवेद
मितिएतच्चमाधवादिग्रंथेस्पष्टं प्राचातुविष्कंदतीत्युदाहृतंतन्नेतिभावः नसंवध्यतइति तथाचपर्युदासाविषयत्वासरेतृतरस्यतिङंते पिषत्वंभवत्येवेतिभा
वः अतएवाहपरिष्कंदतीति नमपद्धत्वेअस्यक्वचिदुदित्पाठः प्रामादिकः असृपदितिलृदित्वादङ् प्राचातु असृपत् असर्पीदितिसिजप्युदाहृतः तस्मा
मादिकंरुषमृषेतिवार्तिकमध्येसृपेः प्रक्षेपोपि प्रामादिकएवेत्यवधेयं यमउपरमे केचिदमुमुदितंपठन्ति कितनिवासे चिकित्सतीतिरोगमपनयतीत्यर्थः शत्रुंचि
कित्सतिनिगृह्णातिक्षेत्रेतृणंचिकित्सति अपनयतिनाशयतिचेत्यर्थः स्वाश्रयंकश्चिकित्सत्विति खंडनं तद्व्याख्यावसरेचिकित्सतामितितुयुक्तमितिवर्द्धमानः
तत्रवर्द्धमानस्यप्रमादइतिशब्दकौस्तुभेप्रपंचितं तदेतद्धनयति कश्चिदिति भजसेवायां ९८६ भक्ष्यति भक्ष्यतइतियत्तुहिरण्यपदाश्च मृतत्वंभजंतइतिमंत्रेभजिर्भ
तइत्यर्थइतिवेदांतग्रंथेषुक्वचिद्दृश्यतेतल्लेखकप्रमादात् डुवप् ञितःक्तिः उप्त्रिमं ट्वविति क्वाचित्कः पाठः प्रामादिकश्चेत्येवंविधः इकारइति नत्वित्संज्ञकः नु
माप्तेरिति भावः वयत्तासावभावादितिनहितासौविद्यमानत्वंस्थानिवद्भावेनलभ्यमशास्त्रीयत्वात् नचाचस्तास्वदितिनिषेधस्यशास्त्रीयत्वादतिदेशोस्त्विति
वाच्यं अचइत्युक्तेरल्विधित्वात् वदव्यक्तायांवाचि उवदिथेति कूलेपद्वदिथवचस्पनात्मजायाइतितुपल्लवस्यप्रमादएव वयप्रेरः पररूपमिति अतोलोप

स्फेन भवति आर्धधातुकोपदेशे यदकारान्तमिति व्याख्यातत्वात् अश्वघीदिति नन्विहान्तरंगत्वाद्गुणायादेशयोः कृतयोः यान्तत्वादेव वृद्धिनिषेधोस्तु किं णिश्विग्रहणेनेति चेत्सत्यं।
न सिध्यन्तरंगमस्तीति ज्ञापनार्थं णिश्विग्रहणं तेन विरिणोति जिरिणोत्योर्येङ्लुगन्तानां विनीप्रभृतीनां च सिचि अचिरायीत् अजिरायीत् अचेचायीत् अनेनायीत् इत्यादि सिध्य
ति चुलुम्पतीति लुम्पतीत्यर्थः उक्तं हि कविकल्पद्रुमे चुलुम्पलोपे इति कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमिति वार्त्तिके व्यवहृतोयं इति भाष्यः ऋतेरीयङ् ऋतिः सौत्र इति तत्तीयं धा
तुरिकानिर्दिष्टः वंचिलुंच्यृतश्चेत्यनुवादात् यत्तु वदन्ति ईयङो दीर्घोच्चारणात्तान्तोयं इदं तत्त्वे हि सवर्णदीर्घेणैव सिद्धे रियङमेव कुर्यादिति तन्न एरनेकाच इति यणापत्तौ सवर्णदी
र्घस्य दुर्लभत्वात् नन्वयङ् वास्तु अकृत्सार्वेति दीर्घोपपत्तेरित्युत्सर्गोचितासन्यङोरिति ङित्त्वापत्तेः कृपायां चेत्येके इति ऋतीयत इति कृपापर्यायेषु ऋतीयते स्यात् घृणायाः
रिति नानार्थवर्गे च भट्टमल्लेनाभिधानात् अर्त्तनं च ऋतीया च हृणीया च घृणार्थकाः इति जुगुप्साकरुणाभयवाचिना घृणाशब्देनार्त्तनादेरर्थनिर्देशं कुर्वन्नमरोपि ऋतीय
तेर्घृणार्थतायां प्रमाणमिति धातुचन्द्रोदये उक्तत्वाच्चेति भावः शेषादिति यत्तु प्रसादकृता ईयङ्भावे आर्त्तिष्टेत्याद्यात्मनेपदमुदाहृतं तत्प्रामादिकमिति भावः हुझल्भ्यो घसि
भसोर्हलि चेत्यतो हलीत्यनुवृत्तेरिडादे[illegible] अन्तादिति धित्वास्य रत्वात्तातङः स्थानिवद्भावेन पुनर्द्वित्वं तु न सकृद्गताविति न्यायात् यद्वा हेर्धिरिति स्थान्यादेश
योर्द्वयोरपि इकार उच्चारणार्थः हकारस्य धकार आदेशः [illegible] नेह हलीत्यपि नानुवर्त्यं नापि तातङः प्रसंगः अनुदात्तोपनतीतरेषामिति वनतेरव्यभिचारान्न विशेषणमिति भा
वः यत्तु प्राचा एषामनुनासिकस्य लोप इत्युक्तं तन्न त्रुखिमन्योः मिहनहमुचमस्जादीनामनन्तस्यापि लोपप्रसंगात् अनुदात्तोपदेश इति अननुनासिकान्ता इति भावः तनो
त्यादय इति अत्रापि प्राग्वत् वधादेशो [illegible] सत्रातो हलादेरिति वृद्धिर्नेति भावः चक्षिङ् दर्शनेपीति विश्वारूपाभिचक्ष्व शर्वोभिरित्यादौ तथा व्याख्यातत्वा।
दिति भावः अन्तोदित इति नुम्विधौ [illegible] ग्रहणानुवृत्तेरिति भावः एवं च चक्षिङ इकारस्थाने अकार एवास्तु मुक्तितः ख्यशादिरिति तत्फलं तु प्रागेवोपपादि
तं अस्यतिवक्तीति ख्यातीत्यत्र विधिर्नाम [illegible] तत्र स्याख्याते सार्व[illegible] विषये [illegible] आर्धधातुकमात्रे [illegible] ईशःसे ईडजनोर्ध्वे च अत्र से ध्वे इत्येदन्तयोरनुक
रणं अविभक्तिकश्च निर्देश इत्याकरः यत्तु प्राचा [illegible] रितीड्जजनि [illegible] इति [illegible] करविरोधादुपेक्ष्यं यद्यपि जनेः श्यना भाव्यं तथापि छान्दसः।

उ·
म·ति· त्वात् श्पनो लुकि उपधालोपाभावे च जनिषे जनिध्व इति बोध्यं णिसिचुंबने· बभ्रामेति उदंसेतवेति मंत्रे निंसानं जुह्वो मुखे इति दंत्यांतस्यैव प्रयोगादिति भावः किंच ।
२२ नुम्विसर्जनीयशर्व्यवायेपीति सूत्रे वृत्तिन्यासपदमंजर्यादयः सर्वे ग्रंथा अस्य तालव्यांतत्वे असंगताः स्युः तत्र हि नुमादिभिः प्रत्येकं व्यवायेषत्वमिष्यते तेन निंसे निं
स्वेत्यत्र नेत्युक्तं अस्य तालव्यांतत्वे तु अश्वादिषत्वे षढोः कः सीति कत्वे कवर्गात्परत्वेन षत्वं दुर्वारमिति कथं प्रत्युदाह्रियेत णिजिर्श्रु द्धौ मेद्‌व्याघ्रभूतिना णिजिसिद्धिमिति ।
निस्तु षंगस्य पठितत्वेन जौहोत्यादिकस्य इति एव तत्र ग्रहणात् शिजि अव्यक्ते तालव्यादिः योषेवशिंक्ते वितताधिधन्वन्निति दर्शनात् क्तप्रत्यये शिंजितं आवश्य ।
क णिन्यंतान्ङीपि शिंजिनी भूषणानां तु शिंजितमित्यमरः मौर्वी ज्या शिंजिनी गुण इति च· तारैः शिंजद्वलयसुभगैरित्यत्रानुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्य ।
त्वाच्छता बोध्यः पृङ् सुखुविषइति· स्वरतावुक्तेन न्यायेनेह निस्यमिट् सोतासविनेति । स्वरति सूतीतिवेट् गुरुत्सु शम्यमः अपिदर्थे इति यत्तु प्राचा· एतस्याः पर स्मैपितः सा
र्वधातुकत्वस्येति व्याख्यातं तत्प्रामादिकमिति भावः स्मरंतीति न्यासकारवर्द्धमानादयः यत्तु पदमंजर्यां उत्तवी तीत्यत्र वहुलंछंदसीति शपो लुगिति दृश्यते तन्न छस्य
मोर्वश्यमाणलेखकप्रमादात्पूर्वं पतितमिति माधवः आपिशलास्तु तुरुस्तु शम्यमः सार्वधातुके छंदसीति पठंति इणागतौ· भौवादिकस्येति· आशीर्लिङीति ।
भावः विध्यादौ तु समीयादिति न भवत्येव के चित्तु वीगतीत्यत्र दीर्घमीकारं प्रश्लिष्टमाहुरित्यनुपदं वक्ष्यते तन्मते विध्यादावपि भवत्येवेत्यवधेयं· वार्त्तिकमते ।
नाह त्वावश्याममिति· भाष्यमतेनाह विवक्षितइति· उभयथापि द्विर्वचने चीति सूत्रं नेह प्रवर्त्तते आद्ये त्विन्निमित्तत्वाभावात्· द्वितीये त्वनैमित्तिकत्वादिति भावः
वः वीगति एकदेशिमतमाह अत्रेकारोपीति· तथा च दीर्घप्रक्रमेकविकल्पद्रुमः ईलकांतिगतिव्याप्तिक्षेपप्रजनखादनेइति· लडइत्सदादेः संज्ञा प्रयुंजते च· न
हितरणिरुदीतेदिकूपराधीनवृत्तिरिति कर्मव्यतिहारेतङ् न च नगतिहिंसार्थेभ्य इति निषेधः उत्पूर्वस्याविर्भावार्थकत्वात् ख्याप्रकथने सनेति शर्प्परे विस
र्जनीयइत्युक्तेः यद्यस्मादप्याई धातुकं स्यात्तर्हि सस्थानो दुर्वार इति भावः मामानेनास्येतिङितः एव तत्र ग्रहणमिति मेङ् धातौ निरूपितत्वादिति भावः विदांकुर्वे एऋ·
लोटो लुगिति आम इति सूत्रे लेरित्यनुवर्त्तयतां मतेनेदमुक्तं निष्कर्षे तु नैव लुगित्यवधेयं उपसर्ग· प्रादुस श्चेति प्रादुस इति सांतमव्ययं प्रादुष्षश्चेति तु प्राश्वाग्रे २२

येषु मृडईत्यपाठः प्रामादिकः मृजूरुद्धौ केचिदमुं षितं पठंति तत्तदनाकरं भिदादिपाठानर्थक्यापत्तेः क्रित्यजादाविति एतच्चेको गुणवृद्धी इति सूत्रे अस्माभिरर्थतउक्तं हृ
दि धित्वेनेति सकृद्गतिन्यायात् प्रागुक्तरीत्यापि द्वेधा समाधानं स्मर्त्तव्यं जक्षभ वश्रामेति जक्षक्रीडनेऽमुमागणइत्यादौ जशादित्वस्य निर्विवादत्वात् सकलधातुवृ
त्तिकारैस्तथास्वीकाराच्चेति भावः जुसि च अजादाविति कस्याचीत्सं तोः चीत्यनुवर्त्तते इति भावः यत्तु प्राचा शृणुपुरित्यादौ यासुटो ङित्वान्न गुण इत्युक्तं तन्न जुसि गु
णस्य निषेधापवादत्वात् भंक्तव्याख्यानं तु क्लिष्टत्वादुपेक्षितं भाष्यारूढस्य स्पष्टसमाधानस्यैव लाभात् दरिद्रा प्राचोक्तमत्र वुइति यत्त्विति निर्मूलमेवेति यत्तु व्याख्या
तृभिरुक्तं आमो भावे आतो लोपे कृते आत औ णल इत्यौत्वं नेत्यादि तद्व्याहतं तथाहि आत औ णल इत्यत्र प्राप्यमादौ कारिकतं मे औकारवचनं दरिद्रातेरालोपे पि श्र
वणार्थं सदाम भावे लिंगमिति पारायणिकहरदत्तमाधवादिभिरुक्तं स्वयमप्युपन्यस्तं च तत्कथमौत्वस्याप्रवृत्तिः यदपि ददरिद्र इत्यस्य समर्थनार्थमुक्तमुच्चारणे वि
शेषाभावादौकारविधानमिति तदपि भ्रमात् तस्मिन् पक्षे आमो दुर्वारत्वात् विवक्षिते इति तेन दरिद्र इत्यत्र श्याद्व्यधेत्यादंतलक्षणो णो न किंतु पचाद्यजेवेति
भावः अदरिद्रुरिति सिजभ्यस्तेति झेर्जुस् लङः शाकटायनस्यैवेत्यादंतलक्षणो विकल्पस्तु न भवति परत्वाच्छ्नाभ्यस्तयोरित्यालोपे आकारान्तस्यैवाभावादिति
माधवः नच दरिद्रा णिङ् इति स्थिते आल्लोपस्य [illegible]वादत्वाच्च ईहल्यघोरितीत्वं स्यादिति वाच्यं अकृतव्यूहा इति न्यायात् ईत्वे हि हलादित्वं निमित्तं तच्च विना
शान्मुखं जुसो भावित्वात् वशकांतौ भाषायामस्य प्रयोगो दृश्यते जयाय सेनान्यमुशन्ति देवा इति इसदादयः चत्वारः परस्मैपदिन इति होव्यइत्यादयस्त
केषांचिन्नयोगाः प्रामादिका एव कथं तर्हि [illegible] उद्धानाः सुरभिघृतधाराहुतिशतैरिति सौंदर्यलहरी नायं शानच् किंतु चानश् डुभृञ् ड्वितः क्त्रिः भृत्रिमं
चांद्रास्तु द्वितं पठित्वा भरथुरित्युदाहरंति [illegible] यत्तु प्राचो ग्रंथं व्याचक्षाणैरुक्तं मिमीते घुमास्थेतीत्वमिति तन्न मङादिकं तत्रार्द्धधातुक इत्यनुवृत्तेः तथा च
काशिका आर्द्धधातुक इत्यधिकारो न त्वपवदति [illegible] भावदिति अत एव मानः माथ्यः गातेगाथे इत्यादौ सार्वधातुके एतेन घुमास्थेति सूत्रे क्ङितीति किं ददातीति यन्त् प्र
त्युदाजहुस्तदपि प्रत्युक्तं अत एव तत्र वृत्तिकाराः [illegible] धातेति प्रत्युदाहृतं दधत्त दधातेः कृत्वाभ्यासकार्यस्य धात्वोनुकरेणा ननु दधधारणे इत्यस्येति व्याचष्टे

धु॰
म॰ति॰
२३

ह्रिहन्तस्येति रुषंतस्येतितेन दधातीत्यत्र न भवति यद्येवं धत्तेइत्यादावपि न स्यात् आत्रोपसर्गस्थानिवत्वेनारुषंतत्वादत आह वचनसामर्थ्यादिति॰ किंच सत्यपिस्था
निवत्वे श्रुतिकृतं रुषंतत्वमाश्रयिष्यते अपि च पूर्वत्रासिद्धेन स्थानिवदित्यपीह परिहारो बोध्यः यत्तु वदंति नायं परिहारः साधुः सवर्णादिषु निषेधारंभेणास्याप्राप्ति।
कत्वादिति तन्न॰ वरेयलोपस्वरवर्जे द्विर्वचनादीनि न वक्तव्यानीति वदता भाष्यकारेण सवर्णादीनां प्रत्याख्यातत्वात् धेनधान्येदधंतइति ह्रस्वमुदाहरंति अ
नुनासिकस्य क्विझलोः क्ङिति दीर्घस्तु छांदसत्वान्नेति भावः सति त्वभिधाने दीर्घो भवत्येवेति बोध्यं॰ इति जुहोत्यादयः षिवु॰ परिषिषेवेति स्थादिष्वेवाभ्यासस्ये
ति नियमो नेह प्रवर्त्तते तत्र प्राक्सितादित्यनुवृत्तेः अस्य चाप्राक्सितीयत्वात् तेनाभ्यासस्य षत्वं भवत्येव परस्य तु आदेशप्रत्यययोरिति षत्वं न्यषेवीदिति सि
वादीनां वाड्व्यवायेपीति विकल्पः ष्णुषदा दंत्योष्ठ्यादिर्मूर्द्धन्यांतः तथा च वैद्यके त्रिकटुकपर्यायो व्योषशब्दः पठ्यते नृतीइदित्करणं यस्य विभाषितस्य स्थानिसत्त्व।
ज्ञापनार्थं तेन धाविन्नमिभ्राजधियेत्यादि सिद्ध्यति पुष्प विकसने॰ ओष्ठ्यान्तः अकर्मकः तथा नभः पुष्यन्तु कोरकेणेति श्रीहर्षः कालात्साधु पुष्पत्स्यम् मा
ने ष्विति सूत्रे अव् पुष्पंसं ज्ञायांकन्॰ पुष्पकं तिमष्टिमस्तीम अत्र केचित्तीमेत्यपि पठंति व्रीड चन्॰ व्रीडः व्रीडमावहति मे स संप्रति इति कालिदासः व्रीडादिवा
भ्याशगतैर्विलिल्ये इति माघः गुणेश्वेत्यकारः व्रीडामंदाक्षह्रीस्त्रपा व्रीडे समरः षह षुह अत्र सहेः पाठो हलंतादीनामनभिमत इति माधवः तदापाततः श।
कि सहेश्चेति सूत्रे षह मर्षणे इति वृत्तिमुपादाय न नु षह षुह च कार्थे इत्यस्यैव परस्मैपदिनोः न नु बंधकस्य ग्रहणं प्राह शिमुत्याशंक्यानुबंधपरिभाषायाः प्रत्ययविष
यत्वादुभयोरपीह ग्रहणमिति हरदत्तोक्तेः अत्रात्रेयः परिनिविभ्य इति षत्वं परिषह्यति तोषसहेतौ द्विकल्पस्तु नास्ति भवति सहेतिशवंतनिर्देशादित्याह अत्रे
दं वक्तव्यं षत्वविधावपि शवंतनिर्देशस्तुल्यः तथा च षत्वमपि माभूत् तत्राकारउच्चारणार्थ इति चेदिड्विकल्पेपि तथास्तु॰ तस्मादुभयमस्तु मास्तु वा नत्वर्द्धजर
तीयं युक्तमाकरग्रंथास्तु सर्वेप्यत्रोदासीनाः तदिह तत्त्वमहद्भिर्निर्णेयमिति नपुंसके भावे क्तः सुहितं तृप्तिः जेरनुरिति ऋच्छत्यृतामिति गुणे कृते वाच्छन्नमुत्त्वा एम॰
मिसेत्त्वविकल्पः षूङ्॰ नित्यमिति एवंच प्राचोग्रंथं व्याचक्षाणैर्यदुक्तं सुषु विवहे सुषूवहे इत्यादि तत्सामादिकमिति भावः दीङ्॰ दिदीयेइति यंरमेपि यणेवाधित्वा २३

नित्यत्वाद्दादौ पुट्मीनातिएञ्त्रिमित्तइति विषयसप्तमी तेनोपदायइत्यत्र घञ्सिध्यति अन्यथाएञ्चस्यात् अदासेति स्या घ्वोश्चियतत्तुनर्भवति दोङोनुकरणे
दारूपासंभवेनाघुत्वात् अतएवप्रनिदातेत्यादौनेर्गदेतिणत्वमपिनभवति डीङ् डीनः डीनवान् स्वादिषुपाठसामर्थ्यान्निष्ठायामिणन इट्हिमतिव्यवधानादा
दितश्चेतिनत्वस्याप्रसंगः डयितशब्दस्तुभौवादिकस्य निष्ठाशीङ्स्यत्रनिष्ठेतियोगविभागादकित्वमितिसीरदेवादयः गीङ् हिंसायेति अतएवाकर्मकमि
तिभावः मीञ्तितिक्र्यादौडुमिञ्तिहृस्वातःस्वादौमीगतावितिचुरादौ रीङ् रिये रेतारेष्यते लीङ् यकेति सार्वधातुकेयगितिविहितेन व्रीङ्ः दत्सोष्पादिः।
व्रीवरणइतिक्र्यादौ प्रीङ् प्रीतौप्रेताप्रेष्यते प्रीङ् तर्प्पणेक्र्यादौयुजादौचषांतक अभिष्यतीति उपसर्गात्सुनोतीतिषत्वं अभिससावितिस्थादिष्वेवाभ्यास
स्यषत्वमितिनियमादभ्यासस्यनषत्वं नापिद्वितीयस्यस्थादिष्वितिसूत्रेणस्थादिष्वेवतद्विधानात् धूरीगूरी गूरउद्यमने आकुर्म्मीयः गुरइतिलघूपधा।
स्तदादौ पाठांतरमिति इमिलाचार्य्येनिरुक्तकारादिबहुसम्मतमेतत् अत्रमंत्रप्रयोगमुदाहरतिजुतया मेतिहिरण्यपाणिः सवितेतिवर्गस्यप्रथमचर
ममंत्रयोरपिपस्यमानशब्दोऽत्रोदाहर्त्तव्यः ननइतिनडोधइतिधत्वं उदाहरणमाहेतिअकर्मकत्वप्रयोजकस्यकस्यचिदर्थस्येतिभावः शुषशोषणेशोष्टा
शोक्ष्यतीत्यादि श्लिषआलिंगने अनिटोयं नतु दाहार्थकभौवादिकवत्सेदुइतिदर्शयति श्लेष्टेति शलइगुपधादितिक्सात्तदनंतरं श्लिषआलिंगनेइतिसू।
त्रितं तच्चएकयोगेनैवप्राचा व्याख्यातंतथाचसतिइदंसूत्रमडोवाधनार्थस्यात् अङ्तुअर्थांतरेसावकाशः एवंचकर्तरिपरस्मैपदेसिद्धमिष्टं कर्मणितुतशब्दे।
समाश्लेषिकन्यादेवदत्तेनेति चिणिष्यते अप्रिषस्त्वातिद्धः तथासमाश्लिक्षातांकन्यंइत्यादौक्सः किंतुकर्मणि आतांप्रभृतिषुअनालिंगनेशलइगुपधेतिक्सः।
प्राप्नोतिइष्यतेचसिचुसमाश्लिक्षतजतुकाष्ठमिति तमिमं दोषमुद्धर्त्तुंयोगविभागेनव्याचष्टेश्लिषइति अनिटः किंश्लिषुदाहेइतिसेटोमाभूत् सामर्थ्यादिति।
पदिहिश्लिषइतिप्राप्तएवनियम्येततर्हिएकदेशानर्याविधिरेवास्तु ... स्यतुल्यत्वादितिभावः शलइगुपधादित्यप्रेति तेनात्मनेपदेऽनालिंगनेचिणिवष।
यादन्यत्रसिजेवनतुक्सः इतिभावः ... विति आलिंगनंहिउप... नपरिष्वंगापरपर्य्यायआणिकर्त्तृकमेवेतिभावः योगविभागफलंदर्शयतिकर्मणी

स्यादिना· अश्विस्मातामित्यादौ क्वसिचोर्विशेषाभावात् अश्विस्मताश्विषाः इत्युदाहृतं उभयपदीत्यर्थ इति तंत्रांतरे विभाषितशब्दस्योभयपदिषु प्रसिद्धेरिति
भावः एक इति चंद्रगोमिप्रभृतय इत्यर्थः क्षुध· तस्यालमेषा क्षुधितस्य तृप्त्यै इत्यादिप्रयोगाणां गतिं पृच्छति· कथमिति· षिधु· संराद्धिर्निष्पत्तिः सिधित्वा सेधि
त्वा सिध्वा उदितो वेति वेट् इट् परस्येरलो व्युपधादिति किंत्वविकल्पः दीर्घानुबंधपाठं दूषयति ऊदित्पाठ इति अनुदात्तेषु पाठस्यैवेयर्थ्यापत्तेरिति भावः रध।
हिं· रध्यतीति पचतीत्यर्थः अरधदिति प्राचो ग्रंथे तु अरंधदिति नुमनुषक्तं पठ्यते तत्सामादिकं नलोपस्यावश्यकत्वादिति भावः णाशप्रनंष्टेति· यत्तु मा चास्म भ
नंग्धेत्युदाहृतं तदपाणिनीयमित्युपेक्षितं न हि नशेर्वेति कुत्वमिह लभ्यते पदांते एवं तद्विधानात् किंच कुत्वेन खः स्यात् तथापि ष्णंतत्वाभावात्तथा ईत्वं दुर्ल
भमेव नष्टं· नष्टिरित्यादिप्रयोगाश्च लोकवेदप्रसिद्धा विरुध्येरन्निति भावः पुषादयस्त्विति केचित्तु· इदं ष्ठ लकारणांर धादीनामेव पुषादीनामपि समाप्त्यर्थमिति
व्याचक्षते तज्ज्ञाप्यकैयटादिविरोधादुपेक्ष्यमिति भावः भ्रमु अनव·शेषमिति· श्यनि दीर्घो लुङि च अङ् विशेष उक्तः ततोन्यदित्यर्थः चक्षरोवति भ्वाश्चेति न
त्वे कृते णत्वं देवकृतं श्लोकार्द्धमुदाहरति· अषितः ष्णाम्यतेः क्षांतिरिति इति दिवादयः वृञ्वरणे वभृथा विद्मातमुत्संयत आवभृथ येनांतरिक्षमुर्वीततं
थ जगृभ्मा ते दक्षिणमिंद्रहस्तं यस्यमदे अपगोत्राववर्थ· अवारीदिति अवारिष्टां अवारिषुः वृतो वेति दीर्घस्य सिचि च परस्मैपदेष्विति निषेधः हेरच। अच।
ङीति किं· अजीहयत्· यद्यपि णयंतस्य धात्वंतरत्वादवयवस्याभ्यासनिमित्तप्रत्ययपरत्वाभावात्प्राप्तिरेव हनात्ति तथापि णयधिकस्यापि कुत्वं भवतीति ज्ञा
पनार्थमिदं तेन जिघायपिषतीति सिद्धं णधोहिं एतत्सूत्रं प्राचा दिवादावुपन्यस्तं इहैव तु चितमकर्मकस्यैव दिवाद्धित्वे मिति णधोः कर्मकादित्यत्र निर्णीत
त्वादिति भावः ञिधृषा प्रागल्भ्ये न धृष्णोति प्रगल्भते श्लूल धृक् श्लूलधृषौ दधृगिति· ऋत्विगादिसूत्रे णकिनो विधानादन्यत्रापि पदांतविषये कुत्वं तृपप्रीणन
इत्येक इति सेद्धः अनुदात्तेषु श्यनानिर्देशात् इति स्वादयः भ्रस्ज· भ्रस्जोइत्यपपाठः भृष्टः भृष्टवान् इत्यत्र निष्ठायाञ्चोदितश्चेति नत्वप्रसंगात् स्थानषष्ठीति·
स्थाने हि प्रसंगः तेन रोपधयोः प्रसंगे रमप्रयुज्यते रोपधेन प्रयुज्येत इत्यर्थः प्रयुज्यमानो रम् मित्वादंत्यादचः पर एव· यस्य देशांतरे विधानं नास्ति स स्थानिर्देश

एवंच सुचितंदेशविशेषएव स्थानिनः प्रसक्तत्वेनोपस्थितं परित्यज्यानुपस्थितकल्पनायोगात् इहतु मित्त्वेनन्यायो वाध्यते· स्थानषष्ठीनिर्देशसामर्थ्यात्तु देशांतरे प्रयुज्य
मानोपिरोपधीनवर्त्तयतितदिहरमः आदेशत्वागमत्वेह्यत्र पीठेयथा स्रमः प्रसपृत्वागमत्वेइतिस्थितं भारद्वाजीयास्तुपठंति भ्रस्जोरोपधयोर्लोपश्चागमोरम्विधीय
तेइति अस्यार्थः सनः क्विचीत्यतो लोपग्रहणमनुवर्त्तते रमतु आगमएवेति अत्रेहरदत्तः भ्रस्जोरमरन्यतरस्यामित्येव सूत्रमस्तु रमइतियः संघातः तस्य ऋ इत्यादे।
शः स्यादित्यर्थः तत्राक्ङिति गुणेकृते भर्जनमित्यादि सिद्ध्यति· अकाराभावपक्षेतु भ्रज्जनमित्यादि· क्ङितितु अकारपक्षे भृष्टिरित्यादि· तदभावे संप्रसारणे तदेवरूपं
एवंच पूर्वविप्रतिषेधोनवक्तव्योभवतीति महल्लाघवं· किंच यथान्यासे वरीभृज्यते इत्यत्रीकोरेफस्यनिवृत्तिं वारयितुं पुनरुपदेशग्रहणमनुवर्त्यं इदानीं तु तदपि।
मास्त्विसपरंलाघवं तथानुनरकृतमित्येवेत्ति अत्रेदंवक्तव्यं एषाकल्पनातावद्वार्त्तिकारूढैव रसोर्ववचनात्सिद्धमितिहरदत्तारसइत्यस्याप्युक्तप्रायत्वात् किंतुभा
ष्यकृतागूढाभिसंधिनासूत्रेमियतेइत्युक्तोपेक्षितंतथानुनकृतमित्येतावन्मात्रंतुहरदत्तीयंतच्चभाष्याभिसंधिपर्य्यालोचनेविरहप्रयुक्तं तथाहिरसश्चेद
पिस्त्रिटूसन् लिङ्·सिच्चङ्·परेणिस्तुतेदोषाभ्रस्जेर्भृजौचैवंदोषोयङ्·लुकिचाधिकः साभ्यासस्यहिभृज्भावोभवेद्वंतेर्वधिर्यथा· हित्वंपुनर्नैलभ्येत स्थानिवत्त्वा
द्धयेरिव तस्मादस्तुयथान्यासंस्वातंत्र्येम [illegible] अयंहिभगवतोगूढाभिसंधिः रसस्याभावेपंचदोषाः अपिस्त्रिटिवभर्जतुः वभर्जुरित्यादीष्यतेवभृजतुः वभृ
जुरित्यादिस्यात् सनीवंतेतीड्विकल्पाद्बिभक्ष [illegible] ते विभृक्षतीत्यादिस्यात् हलंताच्चेतिसनः कित्त्वात्· लिङ्सिचोरात्मनेपदेषु भर्क्षीष्ट अभर्ष्टेत्यादीष्यते भृक्षीष्ट
अभृष्टेत्यादिस्यात् लिङ्सिचावात्मनेपदे [illegible] चङ्परेणौ अवभर्जदितीष्यते अवीभृजदित्यपिस्यात् उर्ऋदिति ऋत्त्वप्रवृत्तेः इररारामपवादः सइ।
तिहिसिद्धान्तः स्यादेतत् उर्ऋदितिवै [illegible] अवभर्ज्जदित्यपिभविष्यति अवीभृजदित्यनिष्टमितिचेन्न· ऋजभृजीभर्जन
इतिभ्वादौपाठेनतत्ररूपद्वयस्यदुर्वारत्वात् [illegible] परेणौदोषोयन्यासइतिचेत् [illegible] दादिविषयत्वयाभर्जनस्यचतद्व्यावृत्ततयाअर्थांतरार्थभेदमभिप्रेत्य।
तिग्रहणअर्थैक्याभ्युपगमेतुप्राचीना [illegible] नहितेपिधात्वंतरेणसूत्र [illegible] अपिस्त्रिटितस्यापिगुणाभावात् अनुदात्तत्वेनपरस्मैपदासंभवाच्च सन्।
लिङ्सिचामिडागमप्रौव्याच्च यदितु [illegible] तत्राहभ्रस्जोभृजौचैव [illegible] दोषाद्दढाःपाक्षिकः पंचमोपीत्यर्थः स्थानिवत्त्वादिति अनभ्यासत्वा

उ·
म·ति· भावादिति भावः द्वित्वमभ्युपेत्यापि ब्रूमः हृग्लुग्रौर्कोर्दुर्वाराः धात्वंतरे तेषामावश्यकत्वेपि हृगादिविनिर्मुक्तं वा भर्जिता वा भर्जिष्यती त्यादि रूपं न सिद्ध्येदेव तस्माद्य
२५ थान्यासमेवास्तु अथ लाघवे पक्षपातेन सूत्रांतरं चिकीर्षितं तर्हि भ्रस्जेरस्तोरिति पठित्वा अरेव विधीयतां तथा च न कोपि दोष इति भावः पूर्वविप्रतिषेधेनेति नित्य
त्वादित्यपि सुवचं शब्दांतरस्य प्राप्तावपि ह्रिताकृतप्रसंगित्वमात्रेणानित्यतायाः लक्ष्यानुरोधेन क्वचित्स्वीकृतत्वात् विज इट् इह ङिदित्यस्येति सूत्रान्मंडूकप्लुत्यायस्याभ
दित्यनुवर्त्तते तेनेडादिप्रत्यययोर्लभ्यते न तु तत्तमेकवचनमेव तथा हि सति विजिषीये त्यत्रैव स्यात् ओविजी भयचलनयोरित्ययमेवेह गृह्यते न तु पृथग्भावार्थ इरि
त् तस्यानिड्त्वादिति हरदत्तादयः न च क्रादिनियमात् लिटीट् संभवत्येवेति वाच्यं तत्र कित्त्वेन गतार्थत्वादिति तेषां भावः वस्तुतस्तु नेदं युक्तं विवेजिथेति थलीट् सं
भवात् तत्र च पित्त्वेन कित्त्वाभावात् न च पूर्वसूत्रे कुटादीनां प्रक्रांतत्वात् कथं चित्तत्साहचर्यात्तुदादेरेव ग्रहणं न जुहोत्यादेरिति वाच्यं रुधादावपि ङित्त्वादुद्विजिते
त्युदाहरद्भिर्माधवादिभिः सह विरोधापत्तेः तस्मादिह तुदादिरुधाद्योर्ग्रहणं जुहोत्यादेस्त्वाग्रहणे व्याख्यानमेव शरणं अत्र प्राचा ग्णिग्वर्ज इति व्याख्यातं तन्निष्फ
लत्वान्निर्मूलत्वाच्चोपेक्षितं न ह्यस्य व्यावर्त्त्यं संभवति न वा वृत्तिकारैरिण्गादित्यनुवर्तितं व्यचव्याजोः पर्युदासेनेति प्रसज्यप्रतिषेधे हि वाक्यभेदः असमर्थसमासश्च
प्रसज्येतेति भावः तस्मात्स्यसिचुसीयुट्तासिप्रभृतिषु नेदं प्रवर्त्तते एतच्च हरदत्तमाधवादिग्रंथे स्पष्टं यत्तु प्राचा अविचीदित्यादि क्षिजादीनां ङित्त्वं स्वीकृत्योदाहृ
तं तदाकरविरोधादुपेक्ष्यं यत्तु वदंति कातंत्रे व्यचेः कुटादिषु पठितत्वात् सिद्धं कुटादित्वमनूद्य असि निषेधमात्रमनेन क्रियते लाघवात् एवं च विधेयभेदाभावेन वा
क्यभेदः तस्मान्माधवादिग्रंथ एवासंगत इति अत्रेदं वक्तव्यं कातंत्रे कुटादिषु पाठेपि पाणिनीये तदभावः स्पष्ट एव तथा च कथं तदनुवादेन वार्त्तिकं प्रवर्त्ततां एवं
चाप्राप्तं कुटादित्वं विधीयत इति हरदत्तोक्तिस्तदनुवादिनी माधवोक्तिश्च निर्बाधैव असमर्थसमासस्तु दुरुद्धर इत्युक्तमेव तस्माद्यथाकरमेव ग्रहीतुमुचितं न त्व
र्वाचीनेषु पक्षपातो युक्त इति दिक् उच्छि उंच्छे उच्छी विवासे इमौ भ्वादिगणे व्याख्यातौ इह पाठस्तु उच्छती उच्छंती त्यत्राच्छीनद्योरिति नुम् विकल्पार्थः पूर्वपा राम·
ठः स्वार्थः तथा हि उच्छति उच्छंती त्यादौ पिद्वचनेशप्तिवादीनां पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तं पदं शतृप्रत्ययस्वरेण मध्योदात्तमिति द्विहलग्रहणस्येति २५

नचोपलक्षणत्वेमानाभावः अदुपधस्यचेदओतरेवेतिनियममाश्रित्यहिहलग्रहणंप्रत्याचक्षाणस्यभाष्यकारस्यैवतत्रमानत्वात् लोभिता लोध्येति तोषसहेति।
वेट्कुरशब्देकारोतेरेवेति· सुप्रसिद्धत्वात् यथागोशब्दस्थानेकार्थत्वेप्यर्थप्रकरणादिविशेषंविनास्वर्गवज्रादयोनगृह्यंते तथाकुरतिरर्णीतिभावः मुरसंवेष्ट
ने· इगुपधलक्षणः कः मुरोदैत्यः मुरारिर्विष्णुः घुरःपचादित्वादच्· घोरः वृहदंत्योष्ठ्यादिरिति उहृहारस्समहमूलमिंद्रेतिप्रयोगात् इषइच्छायां केचिदुदितंपठ
न्तितत्फलंतुइड्विकल्पेक्त्वविधौचसानुबंधस्यैवपाठात् दैवादिकक्रैयादिकयोस्तन्निवृत्तिरित्याहुः अनुदित्पाठस्तुभाष्यवार्त्तिकसम्मतइतिक्त्वादौस्फुटीभवि
ष्यति· तिलस्नेहने तिलति कप्रत्यये तिलः तेलनीतिगतौशपि चिलवसने पचादित्वादच्चेलं· चेलतीतिशपि· विलसंवरणे· दंत्योष्ठ्यादिरिति· आविलंइति
दर्शनात् शिलषिलउंछे· आद्यस्तालव्यादिः द्वितीयोमूर्द्धन्यादिः मिलश्लेषणे· अयंस्वरितेत्त्वपिपठिष्यते इहपाठस्तुकर्त्तृगेपिफलेपरस्मैपदार्थः लिखअ
क्षर· लेखिता लेखिष्यतीत्यादिकथंतर्हि लिखितुंस्वयमेवलिखिष्यते इतिप्रमादएवायं संज्ञापूर्वकत्वेनानित्यतयावासमाधेयं यत्तुकेचित् गाङ्कुटादिभ्यइ
त्यत्रकुटस्यादिः कुटादिः कुटआदिर्येषामितितत्पुरुष[illegible]हुव्रीह्योरेकशेषमाश्रित्यस[illegible] तन्न· लेखितेत्यादौगुणनिषेधापत्तेः नचेष्टापत्तिः वृत्तिकारहरदत्ता
दिविरोधात्· अपाच्चतुष्पाच्छकुनिष्वालेखनेइति[illegible]प्रयोगविरोधाच्चेत्यलंतावत्· कथंलिखापयतीति· अत्रात्रेयः लेखनंलिखः घञर्थेकः तमाचष्टे।
णिच् आपुकोदीर्घोच्चारणसामर्थ्यादन्यत्रापि[illegible]रिति एतच्चभाष्यविरुद्धं भाष्ये आकारस्यप्रत्याख्यानात् तस्मादित्थंसमाधेयं आपनमापः प्राप्तिः आ
णकारसमुदायान्तर्गतस्यैव यकारस्य लोपो न त्वहर्यादित्यादौ केवलस्यापीत्येतावन्मात्राभिप्रायकतया वामनवाक्यं सर्वैरेव व्याख्यातं तथापि क्लिष्ट ।
त्वान्निष्फलत्वात् प्रमाणाभावाच्च व्याख्यातृवचनमुपेक्ष्यं· अवश्यं च समुदायलोप एवायं विज्ञेयः अवयवलोपत्वे हि यङ्लुकोवयवलोपत्वं वदतां
भाष्यकारप्रतियेदोषाहरदत्तेनोक्तास्ते इहापि प्रसज्येरन् तथा हि गमेर्यङ्लुगंतादच्चि जंगम इत्यत्र गमहनेत्युपधालोपो यथा आपादितः एवं यङं
नाण्वुलि जंगमक इत्यत्रापि स्यात् अथात्रानङीति प्रतिषेधः दरीदृशक इत्यत्र ऋदृशोङीति गुणः स्यात् देघक इत्यत्र दीङो युडचीति युट् स्यात् अथयद्य
त्रांगवृत्ते पुनर्वृत्तौ संज्ञापूर्वको विधिरनित्य इत्यादिकुशकाशावलंबनेनोपधालोपादि परिक्रीयेत ततो यङ्लुगंतादपि जंगम इत्यादौ दोषोद्धारः सुकर
एवायुष्मतामिति भाष्यकारोक्तरीत्या यङ्लुकोप्यव यवलोपत्वे सिद्धे गतनधातुलोप इति सूत्रेण तस्मात् सूत्रस्यापमितुं प्रवृत्तेः लुकोवलोपेपि समुदा
यनिवृत्तिरेव एष्टव्या एवं च अज्झलादेशस्यस्थानिवत्त्वायोग्यात् युक्तमेवोदाहरणं एतेन न धातुलोपेत्यत्रैक इत्यनुवृत्तेः पापाचक इति वृंदनप्रकरण ।
स्यापि ग्रंथो व्याख्यातः तस्मात् वेभिदिता मरीमृजिते ति पापाचक इत्तिच यङंतोदाहरणानि वदतो ग्रंथकारस्य ग्रंथांतराविरोधोन दोषाय उक्तयुक्तौ वाम
नवाक्यं चोपष्टभ्य हरदत्तादि ग्रंथोपमर्दार्थमेव प्रवृत्तत्वादिति अत्रेदं वक्तव्यं यस्येति संघातग्रहणमिति वामनवाक्यमात्रं पुरस्कुर्वद्भिस्तत्समानाकारा
सि भाष्यवार्त्तिकाक्षराणि किमित्युपेक्ष्यंते ननु समनंतरमेव भाष्यादौ आदेः परस्येति संचारितत्वादिति चेत् तर्हि वामनेनापि तथैव संचारितमिति किं कथंन
पर्य्यालोच्यते· एवं च व्याख्यातृवचनं प्रमाणाभावादुपेक्ष्यमित्ययुक्तं· व्याख्येयग्रंथशेषस्यैव तत्र प्रमाणत्वात् · यदप्युक्तं जंगम इत्यत्रैव [illegible] इत्या राम·
३७

त्रापि उपधालोपः स्यादिति· तदपि न· त्वयापि पापाचक इत्यत्रैव वृद्धेर्दुर्वारत्वात् कुशकाशावलंबनेन वृद्धिनिवारणस्य लोपनिवारणे[illegible]नु
दघक इत्यत्र युक्स्यादित्युक्तं तदतिस्थवीयः हलः परत्वाभावेन यस्य हल इत्यस्याप्राप्त्या देदीयक इति रूपस्य सर्वसंमततया देघक इत्यस्य खपुष्यायमाणत्वा
त् किंच समुदायलोपे उक्तिसंभव एव नास्ति· यस्येति संघातग्रहणेऽपि हल इति पंचमीनिर्देशात् आदेः परस्येत्यस्य दुर्वारत्वात् यत्तु अतो लोप इत्यतोऽत
इत्यनुवर्त्य अकारान्तस्य यस्येति व्याख्याय अत इति विशेषणसामर्थ्यादादेः परस्येति न प्रवर्तत इति कल्पयन्ति तन्न· गौरवात्· फलाभावात्· प्रत्युतानि
ष्टप्रसंगाच्च अल्लोपस्य स्थानिवत्त्वेन हि वृद्ध्यभावात् पापच्चक इति रूपं भाष्यसंमतं· तच्च त्वत्पक्षे दुरुपपादं यत्तु वदन्ति त्यजेदेकं कुलस्यार्थे इति न्या
येन भूयसामुपधालोपयुडादीनामनुग्रहाय एकेयमुपधावृद्धिः सोढव्या [illegible] येन कृदंते पापाचक इत्यस्योदाहृतत्वान्न दोष इति तन्न· उपधालोप
दिसमाधानस्य समनंतरमेवोक्तत्वात् त्यजेदेकमिति न्यायस्येहाप्रवृत्तेः [illegible]तउपधावृद्धिरेव भाष्यविरुद्धेति तत्रेष्टापत्तिं कुर्वन्नेव व्याख्यातृभिरपि
स्यकुमहः अपंथानं तु गच्छंतं सोदरोऽपि विमुंचतीति न्यायात् ऐर्षिष्य[illegible]द्यादीन्याप्येषूदाहरणोपामादिकं तावद्भिः सकलग्रंथविरुद्धेऽर्थे सुतरां तथाव
कुंशक्यत्वाच्च तस्मात्प्राचो ग्रंथे वेभिदिता मरीमृजितेति रूपस्य शुद्धत्वेऽपि न धातुलोपसूत्रोदाहरणत्वासंगतिः पापाचक इति रूपस्य यङ्लुगंतत्वा
एवुलिसुसाधत्वेऽपि न धातुलोपे सत्रेक इत्यनुवृत्तेरिति वाक्यशेषासंगतिरिति दूषणं दुरुद्धरमिति स्थितं ननु भाष्यमते यस्येति योगं विभज्य अत इत्य
नुवर्त्य पृथगल्लोपं विधाय यङ्लुकोऽप्यवयवलोपत्वस्वीकारात् पापाचक इत्यत्र कथं रूपाशुद्धिर्नास्तीति चेत् शृणु· पृथगल्लोपोऽप्येवमनैमित्ति
कस्तु लुक् अंतरंगत्वात्समुदायमेवापहरति यथा कृष्णो नोनाववृत्तस्र[illegible] इत्यत्रात एव हि तत्र णलि वृद्धिः एतच्च भाष्यकैयटयोः स्पष्टं एतेन भाष्यमते वे
भेदितेत्यादिमाधवोदाहृतं चिंत्यतामावहेदिति यथा तु भाष्यं तथा पापच्चक इत्येव भवतीति च यङ्लुगंतशिरोमणिपादीयहृत्तुल्लत्सर्वरभसकृतमेवे
तिप्रतीमः यदि तु प्राचो ग्रंथः कथंचिद्योजनीय[illegible] तर्हि स्वयं योज्यतां अल्लोपस्य स्थानिवत्त्वेन वेभिदितेत्यादौ गुणवृद्ध्यभावे सिद्धेऽपि उपायस्यो

उ॰
म॰ति॰ ३८

पायांतरादृषक्त्वादितिन्यायेननिषेधसूत्रमप्युदाहरतीति तथा यङ्लुकोऽनैमित्तिकत्वादेव पाया चकइत्यत्र नधातुलोपेति निषेधस्याप्रसक्तावपि
निषेधाप्रवृत्तौबीजांतरमाह इकइत्यनुवृत्तेरिति॰ तदेतद्भाष्यतत्त्वज्ञैः परिभावनीयमित्यलं बहुना वनीवंचीतिनिसंकोटिल्यइतियङ् नीगवंचिस्रंस्भ्रं
स स्यनीगागमः यङोलुकालुप्तत्वान्नतदाश्रितोन्लोपः वनीवकइति तस्रोङित्वादनिदितामितिन्लोपः सामान्यापेक्षेति तथाचप्रयुज्यते एजान्हत्रेजंघन
स्यागपागुदक् पचमानस्यजंघतइत्यादि यत्तुव्याचख्युः धातुनिर्देशार्थोऽयंश्तिप्नयङ्लुङ्निवृत्त्यर्थः तन्निवृत्त्यर्थस्यैवतदर्थत्वादिति॰ तदुपेक्ष्यं सा
ध्यविशिष्टहेतुमात्रोपन्यासस्याकिंचित्करत्वात् चंचूर्त्तीति॰ चरफलोश्चेतिनुक् हलिचेतिदीर्घः अचंचूरित्यत्रतुर्वोरुपधायाइतिदीर्घः यत्तुयङ्लुग
न्तशिरोमणावादौ चंचूर्त्तीत्यत्रईडभावेर्वोरुपधायादीर्घइतिसूत्रमुपन्यस्तंतद्भ्रमादितिबोध्यं चंस्वातइति यत्तुप्राचा चंस्वतइत्युदाहृतं॰पञ्चव्याचख्युः
धातुग्रहणोक्तंयङ्लुकिवेत्यात्वाभावेऽनुदात्तोपदेशत्वाभावान्ननलोपः अनुनासिकस्यक्विझलोरितिदीर्घोपिनभवति॰ जनसनखनांजातात्वेनन
स्यबाधितत्वात् यद्यपवादेनिषिद्धेउत्सर्गोनप्रवर्त्तते॰ सुजातेअश्वसूनृतेइतिवत् एवंचसंसन्तइत्यात्वाभावेऽनुनासिकलोपोनभवति यद्याक्विप्सा
हचर्याज्झलादिरपिक्ङिदेवगृह्यते अततिङि॰ नदीर्घः अतएवग्रंथकृताकृदंतएवदीर्घसूत्रमुपन्यस्तं एतच्चभाष्यकैयटयोःस्पष्टमिति॰ अत्रेदंवक्तव्यं धातु
ग्रहणोक्तस्यविकल्पस्यएवतावन्निर्मूलः अभ्युपेत्यापिब्रूमः दीर्घोदुर्वारः यत्तुक्रमात्वेनबाधितत्वादितितन्न आत्वाभावपक्षस्यप्रक्रांतत्वान्नह्यप्रवर्त्तमानम
प्यात्वंस्वबाध्यंबाधतेउत्सर्गस्यनिर्विषयत्वापत्तेः स्वजातीयेक्कचित्प्रवृत्तंसत्सर्वत्रबाधतइतिचेत्नात्रन्यायोवचनंवास्ति यदप्युक्तंयद्यपीत्यादि॰ तदपिन॰ य
ङ्लुकितन्निषेधस्यैवाप्रसिद्धत्वात्॰ ननुधातुग्रहणोक्तंवेतिप्राप्तविभाषासाचनिषेधेपर्यवस्यतीतिचेत् भवेदेवंयद्ययंवाचनिकोर्थः स्यात् किंःप्रयो
गपक्षेस्यानेद्विर्वचनपक्षेचभाव्यमितिरूपांतरत्वान्नभाव्यमितिचमतभेदेनफलितोयंविकल्पइतिस्वयमेवप्राग्व्याख्यातंशिरोमणौचप्रपंचितंतल्लु एम॰
क्रसोनिषेधः तत्रापिरूपान्तरत्वान्नेत्यसंगतमेव द्विर्वचनेउक्तपक्षद्वयभिन्नप्रकारासंभवात्॰ तत्रचकार्यप्रवृत्तेर्दुर्वारत्वादित्यन्यदेतत्कथमपि किंकस्य ३८

श्वा शुद्धः निषेधे पर्य्यवसानं तु दूरापास्तमेव तदप्यभ्युपेत्य ब्रूमः अपवादे निषिद्धे उत्सर्गस्य प्रवृत्तिरेव न्याय्या अन्यथा नादिचीति पूर्वसवर्णो नि[illegible]
वर्त्तेतेति रामावित्यादि न सिध्येत् तथा च बहुव्याकुलो स्यात् सुजाते अश्वसूनृते इत्यादौ नु प्रमिते लक्ष्ये तन्निर्वाहार्थमगत्या क्वचिदुत्सर्गो[illegible] इत्या
श्रितं न चेह चरितं तद्वत् इति लक्ष्ये क्वचित् प्रमितमस्ति न बाधा तु दृष्टसादिषु स्वीकृतं शिथिलमूलानपि पक्षानुपष्टभ्य रूपोत्प्रेक्षायां तु दृष्टे विशिष्टमे[illegible]पंक्ता
प्यं एतेन संसं तइत्यात्वाभावेऽनुनासिकलोपोऽपि नेति यदुक्तं तदपि प्रयुक्तं प्रतिज्ञामात्रेणार्थसिद्धेः तनोत्यादीनामिति गणनिर्दिष्टतयानुनासिकलो[illegible]
भावाच्च पदे[illegible]क्विपा साहचर्यादित्यादि तदपि न नहि तत्र कृदेव क्विब्गृह्यते संकोचे वीजाभावात् अपि तु सर्वप्रातिपदिकेभ्य इति क्विबपि तथा [illegible]
तिचर्माणतीत्यादिभ्याधवादिभिरुदाहृतं स्वयमपि नामधातौ तथैव वक्ष्यते प्राचापि क्विप्लोः भूडिति सूत्रे यङ्लुगन्ते तिङ्स्वपि संचारितं तथा च बि[illegible]
रस्कृत्य तत्साहचर्याज्जलादीनामपि कृत्तामेव ग्रहणो स्वपरग्रंथाः सर्व एव वासिकताकूपवह्निशीर्य्येरन् यदपि भाष्यकैयटयोः स्पष्टमित्युक्तं तदपि कुत्र कि[illegible]
मिति भाष्यतत्त्वज्ञाः हन्त बुद्ध्य एव विदांकुर्वन्तु एतेन जनेजेज नाइत्यात्व[illegible]चामुदाहरणं प्रयुक्तं जाहेतीत्यादि हाङ् हाकोस्तुल्यानि रूपाणि स्यादेतत्
हाकोऽभ्यासे दीर्घो दुर्लभः अकित इति निषेधात् ननु यद्यकित इति धातुविशेषणं तदा वनीवंचीतीत्यादौ धातोरकित्त्वाद्दीर्घः स्यात् अतोऽभ्यासविशेषणं ए
वं च दीर्घस्य कुतो दौर्लभ्यमिति चेत् धातोः कित्त्वेऽभ्यासस्यापि कित्त्वात् द्विःप्रयोगो द्विर्वचनमिति स्थितेः न चेष्टापत्तिः वृत्तिन्यासपदमंजरीधातुवृत्तिषु सर्वत्र।
जाहेतीत्यादौ दीर्घस्य स्वीकृतत्वात् अत्रेदं तत्त्वं द्वित्वाभावे केवलस्यार्थवत्त्वेऽपि द्वित्वे सति समुदाय एवार्थवानिति तावद्ग्रन्थकाराणां व्यवहारो निर्विवादः अत ए
व विभर्त्ति पिपर्त्तीत्यादौ भृञामित् अर्त्तिपिपर्त्त्योश्चेतीत्वं नानर्थकेऽलोऽन्त्यविधिरिति निषेधात् सर्वस्य स्यादित्याशंक्य अनभ्यासविकारेष्विति वाक्यशेषेण समर्थ्य
यंते एवं चार्थवत्त्वमिव कित्त्वमपि समुदायस्यैव न तु प्रत्येकं अतो न दोषः अथवा अकित इति बहुव्रीहिः न विद्यते कित् यस्मिन्निति यत्तु प्राचा जहातेस्[illegible]
स्य न दीर्घ इति मतमुपन्यस्तं तदाकरविरोधादुपेक्ष्यं [illegible]चापीति यत्तु प्राचा जाहित इति ह्रस्वेकारमुदाहृतं तत्सामादिकमिति भावः लुकालुगिति यत्तु प्राचा

उ

म-ति· स्वपि स्यमीत्युत्त्व मुदाहृतं यच्चपरिस्कुर्वेति संप्रसारणं तदाश्रितं कार्य्यं च बलवदिति यङ्लुकः प्रागेव संप्रसारणमिति तदुपेक्ष्यं उक्त परिभाषाया भाष्ये प्रत्याख्यात।

३९ त्वात्· सत्यां हि तस्यां हलादिः शेषात् प्राक् संप्रसारणस्य तयैव सिद्धेरुभयेषां ग्रहणं व्यर्थं स्यात् किं च अकृतव्यूहपरिभाषाविरोधादपि संप्रसारणं दुर्लभं· अत

एव हरदत्त माधवादिभिः सर्वैः सास्वपीति सास्वपीत्याद्युदाहृतमिति भावः तातर्त्तीति यत्तु प्रयुंजते बोध्यं नावतरीतर्त्तीत्यादि तत्प्रामादिकमेव· उत्तृदिर् हिंसाना

दरयोरिति धातो रूक्तरूपसंभवेपि अर्थासामंजस्यात्· तरतेश्च दीर्घोत्त्वे नरीको दुर्लभत्वादिति बोध्यं गृह्णातेस्त्विति· यत्तु प्राचा गृह्णातेर्यङ्निमित्तं प्रसार

णमाश्रित्य जर्गृहीतीत्याद्युदाहृतं तन्नेति भावः जाग्रहितेति नन्वत्र इटो दीर्घेण भाव्यं अत आह ग्रह इत्यादि तत्रेति तथा च एकाचो द्वे इति सूत्रे हरदत्ते नोक्तं एकाच।

उपदेशे इत्यतो दीर्घविधावेकाज्ग्रहणमनुवर्त्तत इति माधवस्त्विति तस्यायमाशयः ग्रहोलिटीति सूत्रे यङ्लोपे चेति कं इति वार्त्तिकं तदीयभाष्यकैयटयदि प।

र्यालोचनया ग्रहेर्यङंतात् जादेरियेदीर्घाभावे युक्तिद्वयं लभ्यते पूर्वस्मादपि विधावल्लोपस्य स्थानिवद्भाव इति ग्रहेरिति विहितविशेषणाश्रयणमिति च तत्रा

द्यः पक्षो भाष्यवार्त्तिकरीत्या न पदान्तेति सूत्रे दीर्घग्रहणस्य प्रत्याख्यानात्. द्वितीयस्तु सूत्ररीत्येति विवेकः एवं च यङ्लुकि दीर्घो भवत्येवेति स्पष्टं लभ्यते· यङ्

लुकोऽनैमित्तिकतया अज्झलादेशतया च स्थानिवद्भावायोगात् द्वित्वस्य द्विःप्रयोगरूपतया ग्रहेर्विहितत्वानपायाच्चेति तद्भाष्यादिविरुद्धमिति तं [illegible]।

एकाचो द्वे प्रथमस्येति सूत्रे ग्रहेरङ्गादिति भाष्यमुपादाय कैयट आह तृचो हि जरीगृहित्यंगं न तु ग्रहिः विशेषणसामर्थ्याद्धि यथाश्रुतरूपाश्रयणमिति यद्य।

पि तत्र यङंतं प्रक्रम्येदमुक्तं तथापि युक्तिसाम्याद्यङ्लुगंतेपि न दीर्घ इति लभ्यते एकाज्ग्रहणमनुवर्त्तयन् हरदत्तोप्यत्रानुकूलः न ह्यत्र पक्षे यङ्लुकि दीर्घप्रस

क्तिसंभवोप्यस्ति ग्रहोलिटीति सूत्रस्थ ग्रंथास्तूपायस्योपायांतरादूषकत्वादिति न्यायेन यङंतांश उपायांतरपरतया नेयाः अत एव तत्र कैयट आह अन्यत्रा।

स्यदोषस्य सम्यगुद्धृतत्वादिति एवं हि वदंस्तत्रस परिहारस्याव्यापकतामेकाच्सूत्रोक्तस्यावश्यकर्त्तव्यतां चाभिप्रैति न च यथाश्रुतरूपपक्षे गृहीतमित्यापत्ति एम-

द्विः अंगसंज्ञाप्रवृत्तिवेलायां यथाश्रुतस्यैव सत्त्वात् ग्राहितादौ तु नैवं· एकाच इति समाधानं तु गुणाद्भिन्नविषयकमेव तदिदं यङ्लुगंता[illegible]च यङंता ३९

वग्रहेरिठः द्विधात्रिधाचतुर्द्धाचदीर्घप्राप्तिः समाहिता यत्तु शिरोमणौ यङ्लुगंतंप्रक्रम्योक्तं ग्रहोलिटिदीर्घस्तन भवति ग्रहेर्विहितस्याइ [illegible] रिट इति
विहितविशेषणाश्रयणात् इट्टंयङ्ता द्विहितंनतुग्रहेरिति तदतिरभसादिस्यवधेयं यङ्लुकोऽनिमित्तकत्वात् भाष्येध्वनितमिति तथाहि [illegible]
वर्त्तिनवेति उपक्रम्यदोषानुद्भाव्य परिहृत्यचोक्तं एतावानेव विशेषः अनुवर्त्तमाने क्ङिद्ग्रहणाच्छः षत्वंवक्तव्यमिति अननुवर्त्तमाने तु छः श [illegible]
नत्वादेवषत्वेसिद्धेव्रश्चेति सूत्रेछग्रहणंनकर्त्तव्यमिति भावः एवंहिवदताऊढाविभ्योयङ्लुङ्नास्तीत्यभिसंहितं अन्यथा दिवेर्यङ्लुक्ति द्रेदे [illegible]
दौऊठौ भावाभावाभ्यां महान् विशेषः स्यात् ततश्च एतावानेवेत्येवकारो विरुध्येत यत्तु वदन्ति भाष्यकारेणयङ्लुक् छांदसइतिस्वसिद्धांत [illegible]
क्तं भाषायामपीति पक्षे तु दिवेरपियङ्लुगुदाहरणं सम्यगेवेति तन्न भाष्यकृताहुश्च ग्रहणाद्भाषायामपि क्वचिदिति स्वीकुर्वता सहमतभे [illegible]
त् क्वाचित्कत्वंनुज्ञापकसिद्धत्वाद्धुल्ग्रहणाद्धेत्यन्यदेतत् उभयथापि ऊठ्भाविषु तदभाव एवन्याय्यः उक्तयुक्तेः तस्मात्प्राचोग्रंथः प्रामादि [illegible]
तिस्थितं नेहनिषेधं इति सूत्रस्योदाहरणं तु लोलुवः पोपुव इत्यादि बोध्यं नचात्रोपधस्य स्थानिवत्वादेव गुणो न भविष्यतीति वाच्यं उवङ् आदि [illegible]
दचः पूर्वत्वेन लघूपधगुणे कर्त्तव्ये स्थानिवत्वाभावात् अत्र पदमंजरीकारमतखंडनप्रपंचः शब्दकौस्तुभाद्बोद्धव्यः इतियङ्लुगंतप्रक्रिया सुप आ
कर्मणइच्छायां वेत्यनुवर्त्तते सन्निधानाच्चेच्छाप्रत्ययस्यैव कर्मत्वं तदाह इषिकर्मण इति आत्मशब्दः परव्यावृत्तिपरः स्वशब्दपर्यायः स्वश्चकइत्सकौ सा
या इच्छया सन्निधापितत्वादेषितेव गृह्यते तदाह एषितुः संबंधिनइति सुबन्तेचोक्तविशेषणद्वयं स्वार्थद्वारकं बोध्यं नः क्ये क्यचि क्यङीति अत्र प्राचा
क्यषप्युपात्तः तद्भाष्यविरुद्धं हलंतेभ्यः क्यषनास्तीति भाष्यसिद्धांतात् दीर्घस्त्विति तथा च हलिचेति सूत्रे वृत्तावुक्तं धातोरित्येव दिवमिच्छति दिव्य
तीति यत्तु प्रसादकृतोक्तं दिवेः क्विवंतस्य धातुत्वमस्त्येवेति तन्न क्विनंतत्वे हि ऊठ् स्यात् विचितु उपधागुणो वलोपश्च स्यात् क्यस्यवि क्यचूक्येङ्नेपि
ति अत्रापि प्राचा क्यषुपात्तः भाष्यविरोधादिह्योपेक्षितः मांतप्रकृतिकादिति मांतादित्युक्तौ तु पुत्रमिच्छतीत्यादावपि न स्यात् पुत्रीपुत्रान्वेत्यादावे

वस्मात् अशनायो यस्तदानीमेव भोक्तुमशनमिच्छति यश्च पातुमुदकं यश्च स्वस्यैव धने भूपो धनं तत्रोदाहरणानि यस्तु कालांतरोपयोगार्थमशनमिच्छति य
श्च स्नातुमुदकं यश्च दरिद्रः सन् धनमिच्छति तत्र प्रत्युदाहरणानि बुभुक्षादयश्चेह प्रयोगोपाध्यः अन्ये त्वाहुः अशनायतीत्यादिष्वविवक्षितप्रकृत्यर्थैव बुभु
क्षादिकमेवार्थः तथा च निघंटुः उदन्या तु पिपासा तृडिति भारविश्च किमु धनं न धनायितुमिति अश्वस्यति वडवेति मैथुनार्थमश्वमिच्छतीत्यर्थः एतेन वृ
षस्यति गौरिति व्याख्यातं अन्ये तु अश्ववृषरूपप्रकृत्यर्थपरित्यागेन मैथुनेच्छैवार्थ इत्याहुः तथा च मनुष्यविषयोपि प्रयुज्यते इति रामो वृषस्यंतीमिति
निघंटुरपि वृषस्यंती तु कामुकीति लालसायामिति उत्कटेच्छायामित्यर्थः कर्त्तुः क्यङ् सलोपश्चेति लुप्तषष्ठीकं कर्तृविशेषणं चकारश्चान्वाचये इति ध्वनयति।
सांतस्य त्विति विद्वस्यत इति यत्तु विद्वस्यमानः शास्त्रेऽधिकारीति वाचस्पति ग्रंथव्याख्यावसरे लोहितादिडाज्भ्यः क्यषिति क्यषं तरणं वुक्तं तन्न लोहिता
दिराकृतिगणत्वमिति तद्वृत्तिमतमनुसृत्य बोध्यं वस्तुतस्तु क्यङेवायं न तु क्यष् लोहितादिसूत्रेनायं हलंताद्विधीयत इति भाष्योक्तेरित्यवधेयं सपत्नीवे
ति त्रितयसाधारणं विग्रहवाक्यं सपत्नायत इति शत्रुपर्यायात्सपत्नशब्दात् शार्ङ्गरवादिङीनंतात्क्यङ् सपत्नीयत इति समानस्वामिकाभिधायि
नो भाषितपुंस्कत्वान्नित्यं सपत्न्यादिष्विति नादेशे नांतत्वान्ङीप् ततः क्यङ् सपत्नीयत इति विवाहजन्यसंस्कारविशेषनिमित्तकेन पतिश[illegible]
मासे सति त्रिस्त्रीत्वान्न पुंवत् युवायत इति अत्र केचित् ऊङ्सूत्रभाष्ये युवतितरेत्युदाहरणाद्यौवनं जातिः एवं च जातेश्चेति निषेध इहापि तद् इ
ति तन्न वयसोऽनित्यत्वेनाजातित्वात् कथमन्यथाऽचः परस्मिन्निति सूत्रे युवजानिरिति भाष्यं संगच्छेत युवतितरेति तु तसिलादेष्विति पुंवद्भावे प्रा
प्ते भाष्यनिर्देशादेव न पुंवदिति कैयटे स्पष्टं पट्वीमृद्वयत इति पूर्वपदस्य क्यङ्परत्वाभावान्न पुंवत् तङ्नेति तृचितमिति उत्तरवार्त्तिकेन किंमात्रस्य
सुलभत्वादिति भावः यत्तु प्राचा आचारे गल्भक्लीवेति निरुपसर्गमेव वार्त्तिकं पठित्वा गल्भत इति केवलात्तङ् दाहृतः व्याख्यातं भिष्यत्यैव व्याख्यातं
तत्सर्वे प्रामादिकमाकरविरोधादिति भावः अतो गुण इति अंतरंगत्वादतो लोपं बाधित्वेति भावः न च वार्णादांगं बलवदिति परिभाषया[illegible]लोपः स्या

दिति वाच्यं व्याश्रयत्वात् तस्याः समानाश्रय एव प्रवृत्तिस्वीकारात् नच परत्वान्नित्यत्वाच्चात आदेरित्यनेनैव प्रथमं भाव्यमिति वाच्यं [illegible] बहिरंगत्वे
नासिद्धत्वात् नचापवादत्वादत आदेरित्यनेन भाव्यमिति वाच्यं अपवादोऽपि प्रियघन्यघत्र चरितार्थस्तद्येन नांगेण बाध्य अत एव सुत्तत्वात् आनंदसादेवात
स्य चरितार्थत्वात् अत आदेरिति दीर्घ इति पररूपस्यांगग्रहणेन ग्रहणात् प्राप्तमतो लोपं परत्वाद्बाधित्वेति भावः देवतानिमाधव इति अपदांत[illegible]सादिव
उत्र अत्रेति पुगंतेति गुणं बाधित्वांतरंगत्वाद्यण् नच तस्मिन्नुक्तत्वेऽव बहिरंगस्योठः सिद्धत्वं नाजानंतर्य्य इति निषेधात [illegible]
स्य बलीयस्त्वात् समानाश्रये हि तत् ननु व्याश्रयेऽपि एतच्च सिवेरेणादिकेन प्रत्ययेस्योनशब्दं साधयद्भिः कैयटादिभिः सर्वैः स्पष्टमेवोक्तमिति [illegible]
वोदाहृतमनुवदति स्यत्विति अनाकरमेवेति हरदत्तमाधवादिमहाग्रंथविरोधादिति भावः विस्तरः शब्दकौस्तुभे बोध्यः कादिवेत्यादि भा[illegible]
सुदाहरणं तस्याच षष्ठेऽपि राज्ञा विस्यादिना प्रातिपदिकमिति न तु धातुः तथा सति वक्ष्यमाण ज्ञापनानुपपत्तेरिति भावः अनुबंध इति अतो[illegible]
पररूपेणेति भावः अन्यथा गोचङीति ह्रस्वापत्तेः पूर्वपदमिति तच्च समास एव संभवतीति तेनांदोलपित्वात् प्रेंखोलपित्वे स्यादौ आप्रेंसादीनां न[illegible]
करणमिति भावः स्यादेतत् उत्तरीसावधीरयतो सादावणवशाब्द स्य पृथक्करणं न स्यात् तथा च वोपदेवेन अकारण्यकारांतमकरणोऽवधीरकत्वा
वज्ञायामिति पठितं पृथक्करणे हि धकारादि प्रकरणे एव पठेत् अत एवाडागमं वकारादित्वं च कृत्वा वङ्गुदाहृतं आववधीरदिति एवं स्थिते अव
धीर्य धैर्य्यपरिरंभेतिमाघस्य इतीवधारामवधीर्य मंडलीकृत्य तस्याः मंडितुरंगमैर्महीति श्रीहर्षस्य एवमन्येषामपि लक्षवंत्तप्रयोगाणां का[illegible]तिरिति अनेन
अत्र केचित् वोपदेवग्रंथप्रामाण्यादुक्तप्रयोगाः प्रामादिकाः स्वेरसाहुः तदुक्तं तस्तु नायं धातुर्गणे पठितः किंतु बहुलमेतन्निदर्शनमिति वा[illegible]
ऊहश्च धीरेत्यस्यापि संभवात् मुनित्रयविरोधाभावात् तथा चोक्तप्रयोगा अपि निर्बाधा एव वोपदेवप्रामाण्यादवधीरयित्वेत्यप्यस्ति चेन्न ननु तं
हुलेनैतरस्य प्रामादिकत्वं सुवचमिति दिक् पृथक्करणस्य फलं पूर्वत्रापि दर्शयति एवं चेति उस्योमाङ्क्ष्विति उस्य पदांतादोमाङोश्चेति प्राप्तस्य निषेधः

उ

म·ति· औत्सीयदिति नचानर्थकत्वादेवायमुत्सनग्रहोऽस्त्वंतइतिवाच्यं भिन्धुरित्यादावपितथात्वात् कर्त्तर्हिस्यादितिचेत् अयुः अवुरित्यादावितिगृहाण एवंचा
४१ यमेवनिषेधोऽर्थवद्ग्रहणपरिभाषायाइहाप्रवृत्तिंज्ञापयतीतिस्थितं चशब्देनेति तथाचचशब्दंप्रयुंजानः सूत्रकारोपिज्ञापकस्याविशेषविषयत्वेऽनुकूल
इतिभावः तस्येति आदिशब्दस्येत्यर्थः तस्यापीति कयषः ककारस्येत्यर्थः एवंचनः क्येक्यस्यविभाषेतिसूत्रद्वयेक्यषोपिग्रहणंवदंतः सुतरामुपेक्ष्याइ
तिभावः लोहिनीयतीति क्यङि तुतङेवस्यात् पुंवद्भावश्चेतिभावः कष्टायक्रमणमुत्साहः वृत्तिसर्गतायनेष्विति सूत्रेहिसर्गउत्साहइत्याकरेस्थि
तं प्रयुज्यतेच येनेन्द्रलोकावजयायसृष्टइति तदाह उत्साहेर्थेइति क्रमतइति वृत्तिसर्गेत्यादिना तङ् कष्टंकृच्छ्रं कृच्छ्रगहनयोः कषइति कृच्छ्रेइ
डभावः तेनचतत्साधनंपापंकर्मलक्ष्यते मुख्येर्थेउत्साहासंभवात् तदेतदाह पापंकर्त्तुमितिकर्मणोरोमंथ कर्मणइति पंचमी रोमंथतपोभ्यामित्यने
नसामानाधिकरण्यात् प्रत्येकंसंबंधादेकवचनं वर्त्तीति णिजंताद्वृत्तेर्णीसप्रत्ययोपुजितिपुचिप्राप्तेऽतएवनिपातनात् क्तिन् चरतेः संपदादित्वात्क्वि
क्विप् तदेतदाह रोमंथतपोभ्यामित्यादिना सुखादिभ्यः कर्त्तृइति पृथक्पदं लुप्तषष्ठीकं वेदनाज्ञानं कर्त्तृत्वं चतदपेक्षमेव तदेतदाह वेदना [illegible]
ति विस्मापयतइत्यन्यइति तथाचमायामृगंप्रकृत्यभट्टिराह ततश्चित्रीयमाणोसावित्ति पुच्छभांडकरणेऽस्यनुवृत्तेः क्रियाविशेषेर्थे तमेव [illegible]
दर्शयति पुच्छादित्यादिना वृद्धोसत्यांपूर्वेवेति अत्रपक्षमेस्यद्वृत्त्यंतचुरादिशेषएवोक्तंभाष्यस्येतिवृत्तिकारैर्हिप्रकृतस्यैवाभिक्ति सूत्रेप्रत्युदा
उदाहृताः नैचाभात्सूत्रेणैवसिद्धाः तत्प्रत्याख्यानपक्षेपिप्रस्थादावकारोच्चारणसामर्थ्यादेवलोपोनभविष्यति एवंप्रेष्ठज्येष्ठयोरपिस्थानान् [illegible]
जिष्ठइत्यत्रतुलोपापवादस्यविन्मतोर्लुकस्तस्मिन्लक्ष्येप्रवृत्तत्वान्नभविष्यति एषैवह्यनेकाच्सुगतिः तथाहिईष्ठेमेस्त्वेनेकाचोण्वशिष्टस्यनेयतोट
लोपोभाष्यकारेणप्रवृत्तेर्विन्मतोर्लुकिलुकोपवादभूतस्य तस्मिंस्त्रह्यप्रवर्त्तनात् कारिष्ठादाविदंतुल्यंतत्लोपस्यप्रवर्त्तनात् कैयटमाधवं [illegible] राम
नुकूलाइतिशब्दकौस्तुभेप्रपंचितमितिभावः अंगवृत्तपरिभाषयाट्टिमकृत्वालदयतिमदयति इतिकेचिदिच्छंति युष्मयतीतियद्यपियुवावौ [illegible] ४१

चेनेऽस्यर्थग्रहणं तथापि ऊह युवावौ नस्तो विभक्तावित्यधिकारात् इह च विभक्तिपरत्वाभावात् प्रातिपदिकादेव हि णिजिति वहवः सुवंतादिति हरदत्तपक्षेपि [illegible]
त् नवु प्रागेवादेशोस्त्विति वाच्यं अंतरंगानपि विधीन्वहिरंगो लुग्वाधते इति न्यायात् अथ एवं तात् क्विपि कश्चिद्विशेष उच्यते त्व [illegible]
स्त्रियै वै क्विं त्वाप् माप् त्वाद् माद् त्व द् मद् इति प्रागुक्तमतभेदेन त्रिधा प्रातिपदिकानि युवामावां युष्मानस्मान्वा चष्टे [illegible]
र भावाद्युष्मे अस्म इति मांते प्रातिपदिके इत्थं प्रातिपदिकात् स्वादयः ततो यथायथं ङे प्रथमयोरम् शसो न भ्यसो भ्यम् पंचम्या [illegible]
युष्मदस्मद्भ्यां सो श् सामश्राकमिति सूत्रसप्तकेन सुपामादेशाः सुरेव प्रकृतिभागस्य तु यथायथ मात्व यत्वे स एव शेषे लोपः [illegible]
मित्ते न र विभक्ताविति व्याख्यानेभवत्येव मांताच्छेषस्य लोप इति व्याख्यानेन तु आख्यैयैकौ मुख्यपक्षे भवत्येव टिलोपाभावेन मांता [illegible]
त् टिलोपं स्वीकृत्य पुंकापकारांतत्वमिति मते तु न आख्येयस्यानेकत्वेपि न तत्र हि शेषे लोपेनापहार्य्यं मांतात्परं णाविष्ठवदित्यति दिष्टेन [illegible]
पेनैवापहृतं किंच त्वाहौ यूयवयौ तु भ्यम ह्यौ तव ममावपि मपर्य्यंतस्य वा हाहादा ख्यैयैकौ भवंति न आख्येयस्य त्वनेकत्वे भवंति न भवंति च [illegible]
वा हि मांतस्येत्येव सिद्धे परिग्रहणसामर्थ्यान्मांतत्वावस्थायां नेत्येकं मतं परिग्रहणाभावे मांतस्यैव स्यात् सति तु तस्मिन् मांते न तो धिके च भवती
तिमतान्तरं उभयमपीदमाकरे स्थितं तत्राख्ये यद्वि त्वे सुजसङे ङ सुपरत्वात्त्वाहादिप्रवृत्तावपि वचनांतरे षु विभक्तिपरत्वा युवावौ एकस्मिन्मते मत
एव मतांतरे तु न त्वाहादयो नापि युवावाविति विवेकः अथ रूपमाला आख्येयैकैदांतयोः सौ त्वां मां वृद्धिर्नेति मते त्वम् मम टिलोपपक्षे [illegible]
प्येवं यांतयोस्तु पक्षे त्वापं मापं पक्षांतरे त्वाम् मापि रेसेवं इत्थं सर्वत्र नपात्री णि ३ औङि त्वाम् माम् जसिसावि वत्री णि अम् औटः त्वाम माम
शसि त्वान् मान् आङि त्वापामाय [illegible] तु स्यामया त्वाभ्यां माभ्यां त्वाभिः माभिः ङपि अम् शेषे लोपः वृद्धिपक्षे आतो धातोरित्यालोपः त्व
म् मम् पक्षे त्वापं मायं त्वाभ्यां माभ्यां भ्यसि रूपत्रयं तथा हि अभ्य मादेशपक्षे शेषे लोपो आंतो लोपे च त्वभ्यं मभ्यं इदं च वृद्धावृद्धे [illegible] लं भ्यमि

उ·
म·ति त्वाभ्यं· माभ्यं· वृद्ध्यभावे प्राग्वदेव यांतपोक्त· अभ्यमित्वापभ्यं मापभ्यमितिविशेषः त्वत्·मत्· त्वायत्·मायत् त्वाभ्यां·माभ्यां· त्वत्·मत्·त्वाय त
४२ मायत्· त्वाम त्वाप·माय·त्वायोः मापोः अत्र हेतुत्वयोः मयोः त्वाकं·माकं त्वायाकं·मायाकं·त्वापि· मापि·त्वयि·मयि· त्वायोः मायोः त्वयोः मयोः
त्वासु·मासु·एवंच आत्म्येयैकोत्र सुजसोश्चतुर्थ्याभ्यसि च त्रयं टेसेङि दामभ्यस्सु रूपे द्वे अन्यत्रैकमितिस्थितं आत्म्येय द्वित्वेतु सौ· त्वं· अहं
त्यादेशाभावे युषं असं शेषेलोपस्याप्यभावे·युष्मम् अस्मम् इत्यंत्रीणि युवां आवां युषां·असां·जसिपूर्वं वयं युषं·असं युष्मं· अस्मं· अम् औ योः
युवां आवां युषां असां युवान्· आवान् युषान् असान् युव्या आव्या युष्या· अस्या युवाभ्यां आवाभ्यां युषाभ्यां असाभ्यां युवाभिः आवाभिः युषा
भिः असाभिः तुभ्यं मह्यं युषं असं युष्मम् अस्मम् युवाभ्यां आवाभ्यां युषाभ्यां असाभ्यां युवभ्यं आवभ्यं युषभ्यं असभ्यं युष्मभ्यं ... भ्यं भ्यमादेशपक्षेतु युष्मभ्य
मं अस्मभ्यं अत्र संयोगांतलोपोन भाष्ये रूलड्त्यनुवर्त्तनात् अननुवृत्तिपक्षेतु युड्भ्यं अस्मदक्त ...रितिसलोपे अभ्यं शेषेलोपेतु
युवत्· आवत्· युषत् असत्·युष्मत्· अस्मत् युवाभ्यां आवाभ्यां·युषाभ्यां असाभ्यां भ्यसिङ सि च त्रीणि ... मम युष· अस· युष्म· अ
आव्योः युष्योः अस्योः युवाकं आवाकं युषाकम् असाकम् युष्माकं अस्माकं युव्यि आव्यि युषि असि युव्योः आव्योः युष्मोः अस्यो
आवासु युषासु· असासु·एवंच· चतुर्थ्याभ्यसि च त्वारिद्व्याख्यानेद्वेतथान्यतः सुजसङे·ङ·सङ· सि भ्यस्तु आमि च त्रीणि निश्चितंतु अथा... हु
त्वे हल्स्याणि त्वम् अहम् युषम् असम् युष्मम् अस्मम् युषां असां पूर्वं· वयं युषं·असं युष्मं अस्मम् युषाम् असाम्·युष्मान्· असान् युष्मा...
षाभ्यां असाभ्यां युषाभिः असाभिः तुभ्यं·मह्यं युषं·असे·युष्मं अस्मं युषाभ्यां·असाभ्यां युषभ्यं असभ्यं युष्मभ्यं अस्मभ्यं युड्भ्यं अभ्यं ...भ्यां·यु
षत् असत् युष्मत् अस्मत्· युषाभ्यां असाभ्यां युषत् असत् युष्मत् अस्मत् तव·मम·युष·अस युष्म अस्म युष्योः अस्योः युषाकम् असाकम्
म् युष्माकं अस्माकम् युष्मि अस्मि युष्योः अस्योः युषासु·असासु एवं ङसि भ्यसाम्सु द्वे रूपे चतुर्थ्यभ्यसितु त्रयम् सुजसङे·ङ· सु च ... ४२

[illegible]कमन्यत: इह सर्वत्र प्रकृत्यादेशपत्वात्त्वशेषे लोपेषु कर्त्तव्येषु णिलोपो न स्थानिवत् क्वौ लुप्तत्वादिति दिक् अत्रेदमवधेयं कृतः कर्त्तर्यसंज्ञायामिति [illegible]शाप्य
निष्पन्नो के[illegible]त्रिलिंगता तत्र स्त्रीत्वे टाप् प्राप्तः स च यय्यप्यलिंगत्वाद्दिलोपाद्धेति केवले उक्तयारीत्या समाधातुं न शक्यते तथापि सन्निपातपरिभाषया समाधेयः
क्वौ कृते तुक् जसोः सर्वनामस्थानत्वेन भत्वादातो धातोरित्यालोपे त्वममिस्येव रूपं अट्टद्विवादिनां संबोधने एङ्ह्रस्वादिति [illegible]स्यात्र लोपे [illegible]
नुमागमः [illegible]दिति इष्ठवदित्यतिदेशेन भसंज्ञायां सत्यां श्वयुवेति सूत्रेण संप्रसारणं न चातद्धित इति पर्युदासात् कथमिदमिति वाच्यं सोऽतद्धित[illegible]
न चातिदेशेन[illegible]तद्धितत्वं इष्ठनीव कार्य्यं स्यादिति दिश्यते न च तद्धिते संप्रसारणेनेति निषेधोऽस्ति यद्ध्याति दिश्येत पर्युदासो ह्ययं तथा च तद्धितेन विधि[illegible]
नत्वेन मपि द्विविष्ठ इत्यादौ इष्ठनि ओर्गुणः पूर्वस्य दृष्ट इति इह्यातिदिश्येतेति चेन्नैवं तस्मिन्कर्त्तव्ये संप्रसारणटिलोपयोराभीयत्वेनासिद्धत्वात् टे[illegible]
तत्रैव प्रकृतिभावेन निर्दिष्टमिति भावः उदीचयतीति उपसर्गस्य पृथक्करणाद् च्छ्वोः शूडिति च इति टिलोपो न उदई दिनीत्वं उदैविच्चर्दिति णिलोपस्य द्वि
चनेचीति स्थानिवत्वात् विशब्दस्य द्वित्वं प्रसयिचिवदिति अचइत्यत्र लोपः विशब्दात्पूर्वमटिप्यणादेशः तिरयपतीति इह तिरसः पृथक्करणं नास्ति अनुप
सर्गत्वात् अतः प्रकृत्यैकाजिति न प्रवर्त्तते तदाह अंचेरिति देवद्र्यंचमिति नन्विहाख्यानात्कृतस्तदाचष्टे इति कारकस्य पृथक्करणात् किं स्यात् ततश्च देवानं
त्रपतीति प्रसज्येत एवमग्रेपि अमुमंचयतीति प्रसज्येत न च कृत्सकृते [illegible] सेवत्तस्यवृत्तिः प्रकृतिप्रत्यापत्तिसंनियोगशिष्टत्वादिति वाच्यं वलिवंधयती
त्यत्राव्याप्तेः नापि पुराणादिप्रसिद्धाख्यान एव तदिति वाच्यं राजानमागमयतीत्यत्राव्याप्तेरिति चेन्नैवं श्रूयमाणकृतितन्न प्रवृत्तेः इह च किन्नो लुप्तत्वा[illegible]
तच्च कृत्तुक् सन्नियोगशिष्टत्वात्त्वभ्यते किंच महाजनप्रवाद विषयीभूतार्थविषयकमेतत् आख्यानग्रहणसामर्थ्यात् तादृशानामेव भाष्यादावुदाहृ[illegible]
त्वाच्च आमुमुमुआयदिति पूर्वत्रासिद्धीयपदद्विर्वचने इति मुशब्दस्यासिद्धत्वं न स्वयतीति अव्ययानां भमात्रे टिलोपः प्रकृत्यैकाजिति प्रकृतिभावस्त
टेरित्यस्यैव बाधकः येन नाप्राप्तिन्यायात् आनंनर्जीच असत्वादिति णौ कृ नत्वेन टिलोपस्य स्थानिवत्वात्स्वरशब्दस्य द्वित्वमिति मते ने[illegible]

उ॰
म॰ति॰ जादेशः स्थानिवत् अयं त्वज्झलादेशः अतोत्र णिच्वं हितस्येव हित्वं तदाह असिद्धवदिति भावयतीति इष्ठस्य यिट् चेति सूत्रे णाष्ठनि विहितत्वाद्बहोर्भूभा
४३ वः ननु पिडागमोपि तर्हि णोरस्त्विति चेत् मैवं इष्ठवदिति हि सप्तम्यंताद्वतिः णाविष्ठुपमेये सप्तमी दर्शनात् तेनेष्ठनि परे पूर्वस्य यत्कार्यं तदतिदि
श्यते न त्विष्ठनोपि किंच प्रातिपदिकस्येष्ठु त्वापोस्यं लभ्यते टेरिति सूत्रे केयटेन भावयतीति स्वमतेनोदाहृत्य वहयतीत्येकीयमतत्वेनोपन्यस्तं हर
दत्ताद्यस्तु तदेव प्रबलमिति मन्यन्ते सन्नियोगशिष्टपरिभाषया पिडभावे भूभावस्याप्यभावादिति वस्तुतस्तु इष्ठवदिति कार्यातिदेशः प्राधान्यात्
एवं चेष्ठनि दृष्टं भूभावं स एवेह विधत्ते तथा च सन्नियोगशिष्टत्वाभावः स्पष्ट एव तदेतद्ध्वनयति वहयतीत्यन्य इति श्रीमतीमिति एतेन स संचरि
ष्णुर्भुवनांतरेषु यां याचतः श्रीमतीमितिशिश्रियदाश्रयः श्रियामिति माघश्लोके ऽशिश्रयदिति प्रचुरः पाठोपि व्याख्यातः श्रीमतीमकरोदित्यर्थात् पयसपतीति
अत्रेदमवधेयं विन्मतोर्लुकि सन्वदित्यादिकं न अग्लोपित्वात् अगनग्लोपेपि नेति सिद्धांतस्य भाष्यारूढत्वात् तेन स्रग्विणमाख्यत् असस्रजत्
पयस्विनीमपपयसत् गोमंतं अजुगवत् स्रजं पय इत्यादि विग्रहे तु असिस्रजत् अपीपयत् अजूगवदित्यादि एवं प्राचामुच्यातोः सन्वद्भा
वो वेति व्यवस्थाप्य यदुक्तं तन्निर्मूलत्वादुपेक्ष्यम् स्थवयतीति अत्र गुणस्याचो ञ्णितीति वृद्धिः प्राप्ता अंगवृत्ते परिभाषया प्रातिपदिकाद्धात्वर्थे
ति बहुलग्रहणाद्धानेति सिद्धांतः एवं दवयति यवयतीत्यत्रापि ज्यापयतीति वृद्धस्य चेति ज्यः स च प्रियस्थिरेति वर्षादेशेन सह विकल्पेनेति हा
वर्षयतीति इहमिति अत्र वरादेशे वृद्धिर्नेति सुध्यातुवृत्तौ माधवः ऊर्णोतेर्धातुवृत्तौ तु स एव वृद्धिमुदाजहार वाहुलकादिह वृद्धिविकल्प इति तद
शयेऽन्ये नानुदाहरति वरयति वारयतीति इति नामधातुप्रक्रिया कांड्वा धातोरित्यनुवर्तते वेति निवृत्तं तदाह धातुभ्यो नित्यमिति डियाङिति
यदि हि प्रातिपदिकान्येव स्युः तर्हि यकः कित्वं व्यर्थं स्यात् तद्धि गुणनिषेधार्थं यदि तु धातव एव स्युः तर्हि कांड्वि दीर्घोत्तान्न पठेत् अस्तु नाम । राम
तिसिद्धत्वात् द्वैविध्ये तु धातुभ्यो यकि गुणनिषेधेन कित्वं सार्थकं कंड्वं र्मन्तूरित्यादि पग्रहितप्रयोगसिद्ध्या दीर्घपाठोपि सार्थकः उक्तं [illegible] धातु ४३

प्रकरणाद्धातुः कस्य चासंजनादपि आह चायमिमं दीर्घमन्ये धातुर्विभाषित इति यत्तु प्राचोक्तं कंड्वादिभ्यो यक् स्यात् कृञर्थे इति यच्च कंडूं करोति कंडूय।
तीति यच्च नामधातुत्वाद्यथेष्टं द्वित्वे प्राप्ते कंड्वादेस्तृतीयस्येति नियम्यत इति तदेतत्सर्वमाकरविरुद्धं अनेकदोषग्रस्तं च तथा हि कृञर्थे इत्युक्त्याकर
णाद्यस्यानुवृत्तिर्लभ्यते तच्च व्यर्थं प्रत्युतानर्थकारि णिजंतेष्विव प्रकृतिप्रत्ययाभ्यां व्यापारद्वयप्रतीत्यापत्तेः कंडूं करोतीति विग्रहोप्यशुद्धः न च प्रातिप
दिकान्येव कंड्वादयः तेभ्यश्च करणे यगिति तस्याशय उचितः धातवः प्रातिपदिकानि चेति कंड्वादयो द्विविधा इत्यस्य प्राचाप्युक्तत्वात् अत एव नामधातु
त्वादित्याद्यप्यशुद्धमेव धात्वधिकाराद्धातुभ्य एव यगिति सिद्धान्तात् धातोर्लेडादौ कंडवतीत्याद्यनिष्टप्रसंगाच्च सुखदुःखादिप्रातिपदिकेभ्यो यकि
अल्लोपासंभवेन सुखयतीत्याद्यसिद्धिप्रसंगाच्च यत्तु परिष्कुर्वन्ति इत्थं किल ग्रंथाशयः कंड्वादीनि प्रातिपदिकान्येव यक् च वैकल्पिकः अत एवोक्तं कृ
ञर्थे इति विगृहीतं च कंडूं करोतीति न हि धातुभ्यो यकि प्रातिपदिकेभ्यो वा नित्ये यकि अयं विग्रहः संभवति एवं च नामधातुत्वादित्यादि सम्यगेव क
थं तर्हि द्वैविध्यमुक्तमिति चेत् इत्थं यगंताः संतो धातवः केवलास्तु प्रातिपदिकानीति यद्वा यगंतधात्ववयवेषु तेषु धातुशब्दो गौणः प्रत्ययसदस
द्भावाभ्यामवस्थाभेदाच्च द्वैविध्यं न चैवं सुखयतीत्यादौ अतो लोपो न स्यादिति वाच्यं यकः कित्त्वेनावश्यकत्वाल्लाघवाच्चार्द्धधातुकत्वस्यैव ज्ञापनात्
अत एव द्विविधा इत्येवोक्तं न तु धातुभ्यो यगिति अत्रेदं वक्तव्यं प्रातिपदिकाद्विधानं करणाद्यस्यानुवर्त्तनं च न तावत्सूत्रानुगुणं त्वदुक्तपक्षे हि यङ्
विधेः प्रागेव यकं विदध्यात् धातोरित्यस्यानपेक्षितत्वात् यथान्यासपाठस्तु धातोरित्यस्य संबंधमेव द्रढयति हेतुमति च गुपूधूपेति पूर्वोत्तरसू
त्रयोर्द्धातुग्रहणसंबंधस्य निर्विवादतया तत्संदंशपठिते कंड्वादिसूत्रे तदुपेक्षायां वीजाभावात् आर्द्धधातुकसंज्ञारूपफलस्य यङादौ निर्णीत।
स्य कस्यापि स्पष्टत्वाच्च एतेनावश्यकत्वाल्लाघवाच्चार्द्धधातुकत्वमेव यकः कित्त्वेन ज्ञाप्यत इति प्रत्युक्तं अप्रकृतस्यार्द्धधातुकत्वस्य कल्पने प्रकृत
धात्वधिकारत्यागे च विपरीतगौरवस्योद्भटत्वात् यङादीनामिव यकोप्यार्द्धधातुकसंज्ञाया अनायाससिद्धत्वाच्च नापीदं भाष्यानुगुणं धातुप्रक

उ॰
म॰ति॰ रणादिभाष्येणसहविरोधस्यस्पष्टत्वात् नापिव्याख्येयग्रंथानुगुणं द्वैविध्याग्रंथस्यहृदयशून्यत्वापत्तेः यत्तुव्याख्यातंयगंताः संतोधातवइत्यादि त
४४ दपिनयगंताः कंड्वादयइत्यस्यव्याहतत्वात् नहियमागमोयेनतद्विशिष्टः कंड्वादिःस्यात् कंड्वादयइत्यस्यतद्विशिष्टसमुदायोर्थइतिचेत् तर्हिनासौप्रा
तिपदिकमितिस्पष्टमेव किंचसकलप्रातिपदिकानांक्यजादिप्रकृतित्वयाकंड्वादितुल्यद्वैविध्यसत्वात् किमेषामेवविशिष्यतत्कथनेन तस्माद्यथा
कर्मेवमुणगृह्यग्रेहीतुमुचितमितिदिक् असुइति केचिन्मनस्युपतापेइतिपठंति तत्रापिमनसइत्यर्थनिर्देशात्तरगतमेव एवंपूर्वभावेइतिपूर्वश
ब्दोपि पूर्वभावः पूर्वत्वं केचित्तुमनस्पूर्वइतिधातूमत्वामनस्यतिपूर्व्यतीत्युदाजह्रुः तच्चमतंधातुचंद्रोदयेसमर्थितंशाब्दकौस्तुभेतुदूषितंतत्त
एवावधार्यं इतिकंड्वादयः प्रथमंस्येत्युपलक्षणं अजादेस्तुद्वितीयस्येत्यपिबोध्यं यथेष्टमितितुमेहप्रास्तंनामधातुत्वस्यनिराकृतत्वात् अतएव
मूलेकंड्वादयोनामधातुषुनोक्ताः किंतुतान् समाप्यपृथगेवोक्ताः प्राचस्तुतन्मध्येपाठोदुष्टएव अचःपरस्मैवेतिहेतुमण्णिच्प्रकरणेक्सुत्यादित।
मेतत् षत्वंतुनास्तीति आदेशोयःसकारस्तस्यहिषत्वमुक्तमयंत्वादेशस्यावयवोनत्वादेशइतिभावः इतिप्रत्ययमाला कर्त्तरिकर्मपरस्परकरणम
पिकर्मव्यतिहारः संप्रहरंतेराजानः कर्त्तृग्रहणमुत्तरार्थं व्यतिस्तइति यत्तूपरत्वाभावान्नषः व्यतिसइतिसात्पदाद्योरितिषत्वनिषेधः एकदेशविकृ
तन्यायेनप्रत्ययमात्रस्यपदत्वात् नगतिहिंसार्थेभ्यः कर्मव्यतिहारेआत्मनेपदंन हरतेरिति अर्थग्रहणसामर्थ्याद्धियेशब्दांतरनिरपेक्षाएवगतिहिंसयो
र्वर्त्तंतेतेनअभ्यवहरंते हरतिस्तूपसर्गवशाद्धिंसायांवर्त्ततइतिनतस्यायंप्रतिषेधइतिवार्त्तिकंनारंभणीयमित्याहुः कथंतर्हि ततःसंप्रहरिष्यंतोदृष्ट्वाम
कर्णधनंजयाविति अत्राहुःयोत्स्यमानाविति विवक्षितंनतुकर्मव्यतिहारः वहेस्तुनायंनिषेधः अगत्यर्थत्वात् प्रापणंहिवहेरर्थः गतिप्रतीति।
स्त्वाक्षेपात् इतरेतरेतुलौकिकेशब्दव्यवहारेलाघवंप्रत्यनादरादितरेतरादिशब्दैःव्यतीत्युपसर्गौचकर्मव्यतिहारद्योतनाययथासमुच्चीयंतेतेष्वात्मने। राम॰
पदमपिसमुच्चीयेतेतिनिषेधोयमारभ्यते संपद्विनिमयेनोभौदधतुर्भुवनद्वयमित्यत्रतुकरणविनिमयेसर्वोपक्रियाविनिमयस्याविवक्षित। ४४

त्वान्नतङ् नेर्विशः कथंन्यविशतेति अटाव्यवधानात् नचस्वांगमव्यवधायकमितिवाच्यं अंगभक्तस्याटोविकरणांतं प्रत्यवयवत्वेपि धातुं प्रत्यतथात्वात् सत्सं
लावस्थायामडितिभाष्यमतेतावन्नकश्चिद्दोषः मतांतरेतूपसर्गनियमेऽड्व्यवायउपसंख्यानमितिवार्त्तिकमस्तीतिदिक् अर्थवद्ग्रहणपरिभाषयालक्षण।
प्र[illegible]प्रदोक्तपरिभाषयावानेरुपसर्गस्यग्रहणं तेनेहनमधूनिविशंतिभ्रमराः कथंतर्हि इत्युक्त्वामैथिलीं भर्तुरंके निविशतीभयादिति अंगाभिविशती
मितिपठनीयमित्याहुः यत्तुदुर्घटवृत्तावुक्तं पदसंस्कारपक्षाश्रयणाददोषइति तन्नपदान्तरसमभिव्याहारेसतिनियमप्रवृत्तेर्दुर्वारत्वात् अन्यथायुष्मद।
स्मत्सामानाधिकरण्येपित्वदुक्तौ सा प्रथमपुरुषापत्तेः वालिशायामित्यादेर्वैयर्थ्यापत्तेश्चेतिदिक् आङोदः कथंतर्हि व्याददते विहगपतिमुखंस्वकीयमितिक
अभिप्रायेभविष्यति एतेनमुखंव्यादायस्वपितीत्यत्रमुखंव्याददत्तइतिव्यासेनप्रयोगइतिप्रेत्यभावपरीक्षायांवाचस्पतिप्रयोगोपिव्याख्यातः आङोङि हि
[illegible]ष्टस्यग्रहणान्नेह भिक्षामाददाति अत्रस्मृतावाकारइतिहरदत्तः एतेनप्रतीकमाददातीतिविवरणग्रंथोव्याख्यातः शिक्षेर्जिज्ञासायां शिक्षविद्यो।
[illegible]दानेङ्स्यसनेहग्रहणं अनुदात्तत्वादेवसिद्धत्वात् किंतुशकेः सन्नंतस्य सनिमीमेतीसूत्रदेतदाह धनुर्विषयइत्यादिनानियमार्थमिति नचैवंनाथ
[illegible]नुदात्तेत्वंव्यर्थमितिवाच्यं तस्यनाथनइतियुजर्थत्वात् मातुरनुहरतीति सादृश्यमात्रमिहविवक्षितं ननुप्रकारताच्छील्यं शपउपालंभे कथंतर्हिनी
वौ प्रतिप्राणिहितेनुकरे प्रियेणसख्यः शपामि यदि किंचिदपिस्मरामीति अत्राहुः स्वाशयंप्रकाशयामीत्येवतावदिहविवक्षितं ननुशपथ इतिप्रकाशन।
स्थेयोविवादपदनिर्णेता तिष्ठतेस्मिन्निति व्युत्पत्तेः वाहुलकादधिकरणेऽचोयत् उदोनू उत्पूर्वात्तिष्ठतेरनूर्ध्वे परिस्पंदे वर्त्तमानादित्यर्थः इहपरिस्पंदस्या
नूर्ध्वत्वंनामोपरिदेशसंयोगफलकत्वाभावः यद्यप्युदोनूर्ध्वे इत्युक्तेपि क्रियावाचकत्वंलभ्यतएव तथापि परिस्पंदार्थतालाभार्थं कर्मपदं तदेतदाह ईहाया
मेवेति समोगम्यृच्छि वृत्तिकारस्तुसमोगम्यृच्छिप्रच्छिस्वरत्यर्त्तिश्रुविदिभ्यइतिपठित्वादृशेरुपसंख्यानमाह तत्रवार्त्तिकानुपूर्वीभंगे केषांचिदेव सूत्रेप्रक्षेपे
दृशेरेववहिष्कारेवीजाभावात् मुनित्रयानुसारिणांतदुपेक्षैवोचितेतिभावः ग्रामंसंगच्छतीति कथंतर्हि तच्चैकंसमगच्छतेति आर्षत्वात् यद्वाचतुर्वर्णादित्वात्स

उ
म·ति· थैष्यत् एकं समपद्यतेत्यर्थः वेत्तेरेवेति परस्मैपदिभ्यां साहचर्यादिति भावः विंदतिर्हि स्वरितेत् सत्ताविचारणार्थयोस्त्वनुदात्तेत्त्वादेव सिद्धं अङ्‌·विधौ त्विति
४५ लुप्तविकरणेन शासिना साहचर्यादिति भावः गंधनं हिंसेति·गंध अर्दने अर्द हिंसायामिति चुरादौ पाठादिति भावः सहसा वर्तते साहसिकः ओजः सहोंभस
वर्ततइति ठक् तस्य कर्म साहसिक्यं ष्यञ्·तदेतदाह तेषु सहसेति न चैवं परदारानिति कर्मणोऽनन्वयः शंक्यः साहसिक्यस्य प्रयोगोपाधित्वात् धात्वर्थ।
स्य वशीकरणे एधोदकस्येति एधाश्च उदकं च एषां समाहारः यद्वा एधांसि च दकं चेति विग्रहः ——— उदकपर्यायोदकशब्दोप्यस्ति तथा च हलायुधः आ
पस्तोयं घनरसः पयः पुष्करं मेघपुष्पं कंपानीयं सलिलमुदकं वारि वाः शंवरं च अर्णः पाथः कुशं जलं वनं क्षीरमंभोंबु नीरं प्रोक्तं प्राज्ञैर्भुवनममृतं जीवनीयं द
कं चेति अभिभवे चेति ये तु अभिभवे छंदसीति पठन्ति तेषामपि छंदसीति प्रायोवाद इति हरदत्तः माणवकमुपनयतइति विनिन्युरेनं गुरवो गुरुं प्रियमि
त्यत्र तु आचार्यकरणस्याविवक्षितत्वान्न तङ्‌·हर्म्यतलादिति·भाष्ये तु हर्म्यतलमिति प्रचुरः पाठः तत्रोक्तमपूर्विकायां व्याप्तौ क्रमिर्द्रष्टव्यः कथं तर्हि नभस्त।
माक्रामति चंद्रमाः क्रमादिति व्याप्तिमात्रमिह क्रमेरर्थो न तु गमनं अतो न तङ्‌·प्रोपाभ्यां उपक्रमतइति उपपराभ्यामिति तु नेह प्रवर्तते तस्याद्यर्थाभावात्
अप्राप्तविभाषेति न च वृत्त्यादिसूत्रं सोपसर्गे चरितार्थमियं तूभयत्र विभाषास्त्विति वाच्यं उपपराभ्यामिति नियमस्योक्तत्वात् अनुवदते कठः कलाप।
स्येति अनुः सादृश्ये तेन कलापस्येति तुल्यार्थयोगे शेषलक्षणा षष्ठी समस्तृतीया संपूर्वाच्चरतेस्तृतीयाने न युक्तादित्यर्थः दाण भाष्ये त्विदं सूत्रं प्रत्याख्यातं
तथा हि दास्या सह भुंजानः तया दत्तं स्वयं भुंक्ते स्वयं च तस्यै ददातीति तत्रापं प्रयोग इष्यते तत्र च सहयुक्ते तृतीया कर्मव्यतिहारे तङ्‌·दानपूर्वके भोगे दाण धा
तुर्वर्त्यः इति एतेन कर्मव्यतिहारोदाहरणेषु व्यतिशब्दप्रयोग आवश्यक इति भ्रान्तः प्रत्युक्ताः सम इति षष्ठीति दास्याः संयच्छत इत्युदाहरणं शिष्टव्यवहा
रे तु आत्मनेभ्यस्तं प्रयच्छतीति प्रत्युदाहरन् भाष्यकार इह व्याख्याने प्रमाणं उपांस्वकरणं स्वीकार इति यत्तु वृत्तिकृतोक्तं पाणिग्रहण एवेष्यते नेह न। राम·
परभार्यामुपयच्छति दासीत्वेन स्वीकरोतीत्यर्थ इति तद्भाष्यविरुद्धं तत्र स्वीकारमात्रे आत्मनेपदस्योक्तत्वात् इति भावः तथा च भट्टिः अपुंक उपायंस्त ४५

महाप्लावयतीति धात्वर्थोपायं सत्तजित्वरागणीति समःसमो गम्यृच्छिभ्यामित्यतो विद्धि यपाठः सकर्मकादपि विधानार्थ इति ध्वनयन्नुदाहरति संगच्छ
ते ग्रामं मिति भुजोऽनवने इति वक्तव्ये नवन इति वचनमर्थान्तरेऽपि तङर्थमिति ध्वनयन्नुदाहरति बुभुजे पृथ्वीं पाल इति इहेति उपभोग इत्युपल
क्षणं आत्मसात्करणस्यापि इह चरुधादेरेव ग्रहणं अनवन इति प्रतिषेधात् न संयोगो विप्रयोगश्चेत्युपक्रम्य विशेषस्मृतिहेन वङ्कर्मिभुक्तात्वा
नुभवत्वेन च संसर्गवद्विप्रयोगस्यापि विशेषावधारणोपायत्वात् तेन भुजो कौटिल्य इत्यस्य तु दादेः परस्मैपदमेव विभुजति पाणिं सारणे इहस्या
दिसंतेनेन हारितिव्याख्यातं अणोयत्कर्मणौ चेदिति भिन्नं वाक्यं कर्मशब्दः क्रियापरः कर्तरि कर्मव्यतिहार इतिवत् तदेतद्व्याचष्टे अणौ या क्रिया सैव चे
दिति सकर्तृतिवाक्यांतरं अणावित्यादिवेच्छ्रवान्तमिहानुवर्त्तते कर्मशब्दश्च कारकविशेषपरः शब्दाधिकाराश्रयणात्तदेतद्व्याचष्टे अणौ यदि
त्यादिना अनाध्यान इत्यंशं व्याचष्टे नत्विति इह प्रसज्यप्रतिषेधो नातीर्वदुष्यतीति व्याख्यातः ननु तत्राभिनिवेष्टव्यं पर्युदासस्य न्याय्यत्वात् सत्यवि
संवादाभावाच्च पूर्वविप्रतिषेधेनेति अत्र च प्रमाणं दर्शयते राजेति भाष्योदाहरणं अत्र हि अणावकर्मकादिति प्राप्नोति निवृत्तप्रेषणात्वेनाकर्मकत्वादिति
भावः नन्वेवं तत्त्वं कर्मवत्कर्मणा तुल्यक्रिय इत्यस्य नैव गतार्थ इत्याशंक्याह कर्त्तुरित्यादि अपरिस्पंदसाधनसाध्यो भावः सपरिस्पंदसाधनसाध्या क्रिया तत्र कर्म
स्थभावकेषु कर्मस्थक्रियेषु च कर्मवदित्यतिदेशः प्रवर्त्तते न त्वन्यत्रेति सिद्धांत इष्यत इति भावः तत्र कर्तृस्थभावकमुदाहरति पश्यंतीत्यादि ज्ञा
नविशेषविषयत्वापत्त्युपसर्जनविषयत्वापादनवचनो दर्शिः सकर्मकाणामप्याहुराभिधायिता [illegible]वश्यकत्वात् धातूपात्तव्यापाराश्रयः का
र्त्ता व्यापारव्यधिकरणधातूपात्तफलशालि कर्मेति सिद्धांतात् तदेतदाह चाक्षुषेत्यादि प्रेरणेति सौकर्य[illegible]सयेति भावः पश्यति भव इति क
र्त्तरि लट् उक्तं च निवृत्तप्रेषणां कर्म स्वक्रियावयवे स्थितं निवर्त्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठत इति [illegible]दित्यतिदेशस्य मते कर्मकर्त्तरि
—यथायथं शवादयः तेन शुद्धेन कर्त्रा तुल्यं रूपं तत इति विषयत्वापत्तिमात्रवृत्तेर्दृशेरित्यर्थः तुल्यार्थ इति विषमयोः प्रेषणाप्रतीतेः समयोश्च

उ
म॰ति॰
४६

द्वितीयामादायेति अणौ या क्रिया सैव चेदित्यस्य न्यूनाधिकभावव्यवच्छेदपरत्वे इदं बोध्यं अधिकव्यवच्छेदमात्रपरत्वे तु प्रथमामप्यादाय तत्संभवा
त् कर्तृस्थक्रियमुदाहरति एवमित्यादिना इत्थं निवृत्तप्रेषणाप्रक्रियां व्युत्पाद्य अध्यारोपितप्रेषणाख्यक्रियामाह यद्वेति हेतुत्वारोपादिति अत्रा
पि सौकर्यविवक्षैव बीजं प्रेषणांशत्यागेनैव प्रेषणांतरारोपेणापि सौकर्यप्रतीतेरनुभवसिद्धत्वादिति भावः अर्थः प्रागवदिति उदाहरणीभूतयोः च
रमकक्ष्ययोः पक्षद्वयेपि प्रेषणांशभानाभावादिति भावः आधिक्यादिति अस्मिन्पक्षे णौ चेत्सा क्रियेत्यनेनाधिक्यमात्रं व्यवच्छिद्यते न तु न्यूनत्व
मपि अन्यथा तृतीयकक्ष्यायामपि न स्यात् प्रकृत्युपात्तप्रेषणांशत्यागेन न्यूनताध्रौव्यादिति भावः णेरिति किं आरोहतीति निवृत्तप्रेषणा
न्मा भूत् मच्च णौ चेदिति वाक्यशेषे श्रुतत्वात् णेरेव भविष्यतीति वाच्यं अणावित्यस्यापि श्रुतत्वात् किंच उत्तरार्थमवश्यं णेरिति वाच्यमेव तदि
हैव स्पष्टार्थमुक्तं अणौ यदित्यादि चेदित्यन्तं किं अध्यारोपितप्रेषणपक्षे द्वितीयकक्ष्यायां मा भूत् अणौ यत्कर्म णौ चेत्स कर्त्तेति किं निवृत्तप्रे
षणापक्षे तृतीयकक्ष्यायां मा भूत् वाक्यार्थत्रितयं सूत्रे द्वौ च पक्षावुदाहृतौ कक्ष्याश्चतस्रस्तिस्रश्च पक्षयोर्या उदाहृताः प्रथमस्य तृतीये द्वितीये
न निवारिता द्वितीयस्य द्वितीया तु द्वितीयेनेति संग्रहः यत्तु माघकाव्ये करेणुरारोहयते निषादिनमिति तत्र णौ च श्चेति सिद्धं ननु प्रकृतसूत्रस्य विषयः
अध्यारोपितप्रेषणा द्वितीयकक्ष्यारूपत्वात् एतेन संततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बंधुतामिति व्याख्यातं बंधुतां तं पश्यति स त
ं दर्शयति यद्वा बंधुतां कृताधिपत्यामिव लोकः पश्यति स तु दर्शयते उभयथापि णिचश्चेत्येव तङ् ननु प्रकृतसूत्रेणेति दिक् अत्रेदमवधेयं कर्म
शब्दोऽत्र क्रियापर इति व्याख्याकरग्रंथे यद्यपि नोक्तं तथापि न्याय्यत्वान्मुनित्रयानुगुण्याद्बाधकाभावाच्चेह तथोक्तं प्राचां ग्रंथास्तु सर्वेऽपि प्रायेणाशि
थिला इह इति ज्ञात्वा कृतं किंचित् स्वातंत्र्यं क्षम्यतां बुधैः तथा हि इह सूत्रे अणौ यत्कर्म णौ चेत्तदेव कर्मेति कर्मांतरनिवृत्तिः क्रियते न त्वणौ कर्मणो
णौ कर्तृत्वं प्रतिपाद्यते स कर्त्तेति वाक्यांतरेण तस्य कर्तृत्वप्रतिपादनात् एकस्यैकस्यां क्रियायां कर्तृत्वकर्मत्वासंभवात् नचैवं दर्शयते भृत्यान् राजे

राम
४६

तिभाष्यविरोधः भृत्यरूपस्य कर्मणः सत्त्वादिति वाच्यं अणौ यत्कर्तृ कर्म णौ तद्भिन्नकर्मव्युदासे तात्पर्यात् अत्र चोक्तभाष्यस्यैव प्रमाणत्वात् एवं च स्मारयत्येनं
वनगुल्मः स्वयमेवेति कोकिलस्य कर्मत्वेपि प्रत्युदाहरणं युज्यते इति तावत् कैयटेनोक्तं तच्चेत्थं व्याख्यातृभिः परिष्कृतं कर्त्तरि कर्मव्य[illegible] कर्त्तरि सनुवृत्तं
प्रथमया विपरिणम्यते यश्च यच्च यदिति नपुंसकमनपुंसकेनेत्येकशेषः तेनाणौ कर्म कर्त्री णौ कर्मत्वे अयं दोषः एवं च करेणुरारोहयते निषादिनमिति मा
घप्रैयोऽस्मिन्नुपपद्यत इति अत्रेदं वक्तव्यं एवं वर्णयतां कैयटादीनां प्रकृतसूत्रस्य भाष्यवार्त्तिकग्रंथाः सर्व एव विरुध्यंते आरोहयमाणो हस्ती स्थ
लमारोहयति मनुष्यानित्यत्रातिव्याप्तिशंकायां मनुष्यानिति कर्मणः सत्त्वान्नातिव्याप्तिरिति हि प्रथमप्रघट्टके स्थितं कर्मकर्तृत्वात्सिद्धमिति शंका
यां यक्चिणोर्निवृत्त्यर्थं नियमोयमिति द्वितीयप्रघट्टके कर्त्तृस्थभावकार्थमिदं सूत्रमिति तु तृतीयप्रघट्टके तत्राद्यो विरुद्धः मनुष्याणामणौ कर्त्तृ
त्वात् द्वितीयोपि विरुद्धः त्वदुक्तरीत्या कर्मवद्भावस्यैवाभावात् कर्मवदकर्मकाणामिति हि वार्त्तिकं अत एव न तृतीयोपि तथा चोद्देश्यविस्मृति
रेवेयं प्रसापततीति महानयं महतामपि प्रमादः किंच कर्मान्तरनिवृत्तिपरस्य वाक्यस्य निष्फलत्वमेव स्यात् उदाहरणादौ लभ्यात् नह्यणौ यत्क
र्तृकर्मणि तद्भिन्नं कर्म णौ संभवति यदनेन व्यावर्त्येत यदपि जयादित्येनोक्तं यत्सग्रहणमनन्यकर्मार्थं आरोहंति हस्तिनं हस्तिपकाः आरोहयमा
णो हस्ती स्थलमारोहयति मनुष्यानिति णित्वेनैकं गृहीत्वा शानच्प्रकृत्यंतर्गतस्य णेरभावे कर्मणो हस्तिन एव तिङ्प्रकृतिभूतण्यन्तार्थे कर्त्तृत्वादि
ति तस्याशयः तदपि न प्रत्याख्यातस्यैव गतार्थत्वात् तथा हि द्वाविह णिचौ तत्राद्यं कृतमेवात्मनेपदं आरोहयमाण इति द्वितीये तु अणौ कर्मणः स्थ
लस्य णौ कर्तृत्वाभावात्प्राप्तिरेव नास्ति यदपि हरदत्तेनोदाहृतं आरोहंति हस्तिनं हस्तिपकाः [illegible]रोहयति हस्तीति तदपि न एतद्भिन्नाध्यारोपितप्र
घणपक्षस्य द्वितीयकक्षायां रूपं तत्र च समानक्रियत्वमेव नास्ति णिचा व्यापारांतरोपादाना[illegible]मिति चेत् स्वग्रंथविरोध इत्यवधेहि णौ चे
त् ग्रहणं समानक्रियार्थमिति हि जयादित्यग्रंथः णिच्प्रकृत्युपात्तक्रियायामेव यथा [illegible] प्रयोज्यप्रयोजकभावलक्षणेपि क्रियाभेदे मा भूदित्ये

म·ति· तदर्थं णौ चेदित्यत्र अणौ यदित्यनुवर्त्त्य अणौ यत् प्रतिपाद्यं वस्तु णौ चेत्तदेव प्रतिपाद्यमिति व्याख्येयमिति हरदत्तग्रंथः तथा च तेनैव गतार्थत्वात्
४७ यत्स्यग्रहणमनन्यकर्मार्थमिति जयादित्यग्रंथस्य तद्व्याख्यातृग्रंथानां च निर्विषयतापत्तेरेव यदपि [illegible]दित्येनोक्तं कर्त्रेति किं आरोहंति हस्तिनं हस्ति
पकाः तानारोहयति महामात्र इति तदप्येतेन प्रत्युक्तं यत्तत्र हरदत्तेन कर्मान्तरसद्भावादेव न भविष्यतीत्यादि विचारितं तद्दृष्ट्यैवोक्तरीत्या उदाहरण।
स्योक्तिसंभवाभावादिति दिक् यत्तु प्राचा अणौ यत्कर्म स एव ण्यंतस्य कर्त्ता चेदित्येकवाक्यतयैव व्याख्यातं तन्न अध्यारोपितप्रेषणे द्वितीयकक्षा
यामतिव्याप्तेः यद्यपि प्रसादकृता अणौ यत्कर्मेत्यादिखंडान् पृथक्कृत्य जयादित्यैः पदाद्यक्षरानुसारेणैव मूलग्रंथो भंक्त्वा नीतस्तथापि मू
लाक्षर[illegible]शुद्धिर्दुर्निवारैव यदपि प्रसादग्रंथोपमर्दनं प्राचा ग्रंथं व्याचक्षाणा आहुः णौ चेत् ग्रहणं समानक्रियार्थमिति वाक्यार्थो भाष्यकारेण।
नाश्रितः प्रयोजनाभावात् तथाहि ण्यंतादात्मनेपदं भवति अणौ यत्कर्म णौ चेत्स कर्त्तेत्युक्तेः प्रत्यासत्तेरेतद्गम्यते येन णिचा ण्यंतादात्मनेपदं।
विधित्सितं तेनैव णिचा अणौ यत्तेनैव प्रकृतिभूते धातौ यत्कर्म स एव चेत् कर्त्ता न त्वन्यस्मिन्नेव ण्यंत इति ततश्च यथा आरोहंति हस्तिनं हस्तिपकाः आ
रोहयमाणो हस्ती भीतान् सेचयति मूत्रेण इत्यत्र धातुभेदेन भवति एवं प्रयोज्यप्रयोजकभावभेदेपि न भविष्यति अत एव तृतीयवाक्यार्थो भाष्या
नादृतत्वेनाचार्यैरप्युपेक्षितः स एव ण्यंतस्य कर्त्ता चेदिति एकवाक्यत्वस्यैव प्रतीतेः स्वारसिकत्वात् एवं चाध्याहारव्यवहितान्वयकल्पनाभ्यां वा
क्यार्थद्वयोपक्षेपोपवर्णनं प्राचोक्तमनादेयं अनर्थकानेकक्लिष्टकल्पनापत्तेः न चात्र पक्षे णौ चेद्ग्रहणं व्यर्थं असति हि तस्मिन्नणौ यत्कर्म स कर्त्ते
त्युक्तेरेकवाक्यतयैव संबंधः स्यात्ततश्च कर्मान्तरनिवृत्तिर्न कृता स्यात् अतः कर्मान्तरनिवर्त्तकवाक्यभेदापादकं णौ चेद्ग्रहणमवश्यं कर्त्तव्यमिति अ
विदं वक्तव्यं भाष्यकारेणानाश्रितं इत्यसिद्धं भाष्यस्यानाकर्मशब्दानां क्रियापरत्वं कर्त्ता चेदिति वाक्ये तु कारकपरत्वमित्याश्रित्यैव भाष्ये व्याख्याया। राम·
उचितत्वात् अन्यथा सूत्रसमाप्तिपर्यंतं सकलस्य भाष्यग्रंथस्यासंभवदुक्तिकत्वापत्तेः यदप्युक्तं प्रयोजनाभावादित्यादि न भविष्यतीत्यंतं तदतिरभसा ४७

त॰ अध्यारोपितप्रेषणो हि अणोहस्तीकर्मतत्रैवणो स एव कर्तेति स्पष्टं॰ ततश्च कथं प्रत्यासत्त्यात्तद्धारणं॰ कुत्रत्यश्च प्रयोज्यप्रयोजकभावभेदः॥ ननु णिजर्थोधि
क्यं ब्रूम इति चेत् किं ततः न ह्येतावता णौ कर्तुर्णौ कर्मत्वं गतं दृष्टान्तश्चातिविषमः रुहिसिचिप्रकृतिकयोर्णिचोस्तत्र भिन्नत्वात् यदपि [illegible]वाक्यत्वप्र
तीतेः स्वारसिकत्वादित्युक्तं कर्मान्तरनिवर्तकवाक्यभेदापादकं णौ चेत् [illegible]ग्रहणमित्युक्तं तदपि परस्परव्याहतमिति स्पष्टमेव अगत्या तत्स्वीकार इति चेत्।
न तस्य विष्फलतोयाऽऽक्तत्वात् कैयटाद्यनुरोधेनैवं ब्रूम इति चेत् प्रसारकारोपित्त हि जयादित्यन्यासकारहरदत्ताद्यनुरोधेन मूलग्रन्थमभीप्सीदिति किं ते
नापराद्धं तस्मात्कैयटप्रभृतिअर्वाचीनपर्यन्तं सर्वेषां ग्रन्थाः इहा तिशिथिला एवेति स्थितं निष्कर्षस्तु मुनित्रयाविरोधेन कृत एव॰ स्यादेतत् कर्मकर्त
रि मूलोदाहरणानि॰ कर्मवद्भावबलात्कर्तृस्थभावक्रियत्वान्नेति सिद्धान्तशरीरभाष्यकृत्यादिनिष्कर्षे स्थितं एवं च उदाहरणप्रत्युदाहरणयोरकर्मकत्व
स्यावश्यकतया भाष्यकृत्यादि[illegible]कर्मप्रयोगोऽनुपपन्नः दृश्यते च सः दर्शयते भृत्यान् राजेति भाष्ये स्मरयत्येनं वनगुल्मः स्वयमेवेति भाष्यकृत्योक्तस्यका
गतिरिति चेत्॰ अत्राहुः [illegible]वसितमिह कर्मेति तेषामयं भावः गभीरायां नद्यां घोष इत्यत्र गभीर[illegible]पदार्थयोरभेदबोधानन्तरं तीरलक्षणायाम
पि प्राथमिकबोधमादाय गभीरपदसार्थक्यवदिहाप्यध्यारोपितप्रेषणापक्षे द्वितीयकक्ष्यायां कर्मण्यन्विते ततो णिजर्थस्यैव कर्मणोऽपि त्यागे णिचः
कर्मपदस्य च प्राथमिकबोधमादाय सार्थक्यं॰ स्वज्ञाप्यसंबंधो लक्षणेत्यभ्युपगमात् ज्ञाप्यस्य चेह विशिष्टवाक्यार्थरूपत्वात् एषैव चार्थवादैः प्राश
स्त्यलक्षणायां गतिः स एष सिद्धान्तानां ख्योपायः स्यापत्तेनु शब्दप्रयोगे कर्मविनिर्मुक्तमेव प्रयोक्तुमुचितमिति दिक्॰ भृत्यादीनां परित्यागाच्छुद्धाभेद
परिग्रहात् कर्मवाक्यस्य ताद्रूप्याश्रयणान्निस्तरेत् सुधीः [illegible] मूल एव ध्वनितं प्रकृतमनुसरामः [illegible]स्मरति वनगुल्ममिति अत्र णिविस्मरयत्येन
मिति भाष्यकृतोः प्रयुक्तं तच्च प्राथमिकबोधाभिप्रायेणोक्तमेवं तदप्यध्यारोपितप्रेषणापक्ष एव पक्षान्तरे कोकिलस्य कर्मत्वासंभवात् यद्यपि गति
बुद्धीति सूत्रे ज्ञानसामान्यार्थकानामेव ग्रहणात्स्मरतेश्चेह विशेषवाचित्वाद णौ कर्तुः कोकिलस्यात्राप्यकर्मत्वं दुर्लभम् तथाप्येतद्भाष्यबलादेव गा

उ॰
म॰ ति॰ तिङुञादिसूत्रेस्मरतेरपिपरिग्रहोबोध्यः मिथ्योपपदं मिथ्येतिइहकरोतिरुच्चारणार्थत्वादकर्मकः एवंतत्त्वोच्चारणसादृश्यतिः सकर्मकः स्वरितञितः अ॒त्विजइतिदक्षि
४८ णादिकंतुनयागफलं उक्तंहिहरिणा यस्यार्थस्यप्रसिद्ध्यर्थमारभ्यंतेपचादयः तत्प्रधानंफलंतेषांनलाभादिप्रयोजनमिति पचा पाकः केचित्तुप्रयोजकव्यापारदृ।
ति भ्वोधातु —— भ्वस्तद्योतकमात्मनेपदमनेनविधीयते कुरुते कारयतीत्यर्थः कारयतेइत्यत्रतुप्रयोजकव्यापारद्वयमर्थः णिजंतास्सिचियथाक
र्त्रभिप्रायइतिसूत्रांशोपिकर्तृपदस्यहेतुकर्तृपरत्वादुक्तार्थतासार्थकएवेत्याहुः उक्तंचहरिणा क्रियाप्रवृत्तावाख्याताकैश्चित्स्वार्थप्रणार्थता अस
तीवासतीवापिविवक्षितनिबंधना केषांचित्कर्त्रभिप्रायेणिचामहविकल्प्यते आत्मनेपदमन्येषांतदर्थाप्रकृतिर्यथा क्रीणीष्वपचते धत्तेचि
नोतिचिनुतेपिच आत्मप्रक्रमादृश्यंतेयेषुण्यर्थोभिधीयतइति असतीवेत्यनेनकमलवनोद्घाटनंकुर्वतेयेइत्यादयः प्रयोगाः समर्थिताः तत्रा
पिस्वार्थताविवक्षायाःसंभवात् ण्यर्थस्यवाचकंद्योतकंवा आत्मनेपदमितिमतद्वयंसंग्रहीतुंकेषांचिदितिश्लोकः चिनोतिचिनुतइति संगृ
ह्णातिसंग्राहयतिचेतिक्रमेणार्थः णिचश्च अत्रकश्चित् लक्ष्यते स्वरितेतकरणाज्ज्ञापकात् चुरादिणिजंतादिदमात्मनेपदंनेतिमन्यते आ
हचस्वरितेत्त्वात्ग्रहिः ऋयादौलक्षिश्चैकश्चुरादिष्विति तन्नेतिवहवः संद्रोहि णिजभावपक्षेस्वरितेत्त्वंचरितार्थमित्याह मैत्रेयादयस्तुस्वरितेत्त्व।
मनाकरमित्याहुस्तदेतत्सर्वंहरदत्तोपिसंजग्राह एषविधिर्नचुरादिणिजंतात्स्यादितिकश्चिन्निश्चिनुतेस्म आप्तवचोत्रनकिंचनदृष्टंलक्ष्यपतेः।
स्वरितेत्त्वमनार्षमिति समुदाङ आङ्पूर्वकस्यवचनंसकर्मकार्थं अकर्मकेत्वाङोयमहनइत्येवसिद्धं अनुप अकर्मकाच्चेत्येवसिद्धेवचनमि
दंसकर्मकार्थमितिध्वनयन्नुदाहरति गांजानीतइतिइत्यात्मनेपदं परोर्मृषः योजादिकस्येति सहिस्वरितेतत् शाकटायनमतेत्व नुदात्तेत् उभयप
थापिन्याय्यमेवेहग्रहणं उपाच्चसकर्मकविषयमिदमुत्तरसूत्रानुरोधात् अतएवाह यज्ञदत्तमितिवुधयुध इहप्रद्रुस्रुणांयद्यप्येवलनार्थत्वं
तदर्थग्रहणं चलनेतुउत्तरसूत्रेणसिद्धं निगरणंभक्षणं अदेःप्रतिषेधइति एतच्चगतिबुद्धीतिसूत्रेभाष्येउक्तं वृत्तिकृतेहस्वस्थलेयोजितं। एक॰
४८

अथ कथं न पीयतां नाम चकोरजिह्मया कथं विदेतन्मुखचंद्रचंद्रिका इमां किमाचामयसे न चक्षुषी चिरं चकोरस्य भवन्मुखस्पृशी इति श्रीहर्षः
आङ्पूर्वाच्चमेरनेन परस्मैपदौचित्यात् सत्यं आचामयेति लोडंतं छित्वा किन्नाचामयेति व्याख्येयं अस्य लो ईर्लक्ष्मीः तया सह वर्त्तमाना ...नः संबोधने ।
सलक्ष्मीके हे दमयंतीत्यर्थः अणावकर्मकाण्णौ किं आरोहयमाणं प्रयुंक्ते आरोहयते णेरणाविति सूत्रे उदाहरणत्वेनयोः कर्मको निर्णीतस्तस्माद्द्वितीये णौ ।
माभूत् स हि णावकर्मकः स्यग्भवतीत्यर्थपर्य्यवसानस्योक्तत्वात् केचित्तु स्वार्थण्यंताद्धेतुमण्ण्याविस्यस्य प्रत्युदाहरणमाहुः तद्भाष्यादिविरुद्धं तथाहि ।
बुधादिसूत्रादिह णेरित्यनुवर्त्तते बुधादिभ्यश्च हेतुमण्णिरेव संभवतीति तदंतादेवायं विधिः अणाविति निषेधोपि प्रत्यासत्तेस्तस्यैव न्याय्यः तेन चुरा ।
दिण्यंताद्धेतुमण्णौ परस्मैपदं भवत्येवेति भाष्यादौ स्थितं अतएव चेतयमानं प्रयुंक्ते चेतयत इति केषांचित्प्रत्युदाहरणं वृत्तिकृता दूषितं तत्र चिति संचे
...ने इति चुरादिष्वाकुस्मीयो ...र्वोध्यः यत्तु न्यासकारहरदत्ताभ्यां व्याख्यातं चिती संज्ञाने चुरादिरकर्मक इति तदतिरभसात् एतेन रूपपतेहरीरिति
...चः प्रत्युदाहरणं प्रत्युक्तं रूपं रूपकरणे चुरादिः रूपाख्यस्य कर्मणो धात्वर्थेऽन्तर्भावादकर्मकः ततो हेतुमण्णिचि वृत्तिकारदूषितेन चेतयत इत्य
...नेन समानयोगक्षेमत्वात् युक्तस्तु उभयमपि समर्थयितुं शक्यं तथाहि स्वार्थण्यंतादेकस्मिन्नेव हेतुमण्णौ चेतयति रूपयतीत्यस्तु नाम तस्यापि ।
निवृत्तप्रेषणतया अकर्मकतामाश्रित्य द्वितीये हेतुमण्णौ तु प्रत्युदाहरणत्वं केन वार्यते युक्तं चैतत् रूपयंतं प्रयोजयतीति विगृह्य तामाचार्युजिणिज्यां
प्रयुक्तिश्च द्वयं वदता हेतुमण्णिचोर्द्वयस्य विवक्षितत्वात् हेतुमण्णेरैक्ये हि प्रयुंक्ते इति शुद्धेन युजिनैव व्यग्रहीष्यन्न तु णिजंतेनेति दिक् यत्तु प्र...ततोक्तं णिप्र
हसोणिजातेणाश्रयणात् भेदस्याविवक्षयेदमिति तत्तु भाष्यादिविरोधादुपेक्ष्यमेव धापयेते इति प्रत्यवसा...र्थत्वात् शिशुमित्यस्य कर्मत्वं समीची इति प्र
थमाद्विवचनं वा छंदसीति पूर्वसवर्णदीर्घः इति पदव्यवस्था भावि भावनेति उत्सत्यर्थाद्भवतेर्णिजंतात् ...जितिभावः एरच् ण्यंतानामिति त्वनार्षं कल्या
दिभ्यः प्रतिषेधमात्रं हि भाष्ये स्थितं कर्त्तो मंत्रोर्थ इति त्रय एवोदाहृतास्त्वेस्यवधेयं भवतेर्हस्वस्यर्थत्वाण्णिजंतस्य भवनेः शुद्धेन करोतिना तुल्यार्थत्वं दर्शयति ।

उ
म॰ति उत्पादना क्रियेति धातुत्वेनेति तच्च जातिः वृद्धिसूत्रे आदैच शब्दस्य जातिशब्दत्वादिति वदता कैयटेन तथा व्यक्तितत्वात् हेलाराजीयादौ स्पष्टं तथाभिधाना
५९ च्चेति भावः धातुवाच्येति एतेन भावना तिङ् प्रत्ययवाच्येति मीमांसकमतं न ग्राह्यमिति ध्वनयति तथा हि भोक्तव्यमित्यादौ तिङं विनापि भावनाप्र
तीयते कारकापेक्षा च दृश्यते अस्ति च करोति सामानाधिकरण्यं किं कर्तव्यं भोक्तव्यं किं कृतवान् भुक्तवानिति किंच भावयति घटमितिवत् परम
ते भवति घटमित्यपि स्यात् तुल्यार्थत्वात् दृष्टांते हि कर्तुः कुंभकारस्य व्यापारं णिजा च ष्टे दार्ष्टांतिके त्वाख्यात प्रत्ययः ननु प्रयोजकव्यापारो णिजर्थः
कर्तृव्यापारस्त्वाख्यातार्थ इति वैषम्यमिति चेत् कारकचक्रप्रयोक्तुः कर्तृत्वे घटस्यात् तथात्वात् यदि तु धातुनोक्त क्रियेति स्वं कारके कर्त्तृते ष्यते इति भर्तृ
हर्यादि रीत्या प्राधान्येन धातूपात्तव्यापारवत्त्वरूपं कर्तृत्वं तवापि सम्मतं कस्तर्हीदानीमाख्यातार्थः व्यापारस्य धातुनैवाभिहितत्वात् अपि च धातोः स
कर्मकाकर्मकत्वविभाग उच्छिद्येत अकर्मकाच्चेत्यादि सूत्राणि च विरुध्येरन् ननु सिद्धांतेपि क्रियायाः कर्मापेक्षानियमात् कथम कर्मकतेति चेत् नैष
फलव्यापारयोः सामानाधिकरण्य वैयधिकरण्याभ्यां सकर्मकाकर्मक विभागाभ्युपगमात् किंच ज्योतिष्टोमयाजी त्यादौ करणेय जइति णिनिरस्मत्पक्ष
एव संगच्छते धातुत्वेन धातूपात्तां भावनां प्रति यजित्वेन तदुपात्तस्यांशांतरस्य करणत्वात् पच्यादयो हि धातुत्वेन भावनामाहुः विक्लित्त्याद्यंशान्त
रं तु पचित्वादिना प्रातिस्विकरूपेणाहुः तच्चांशांतरं भावनां प्रति प्रायेण भाव्यतया संबध्यते ज्योतिष्टोमयाजीत्यादौ तु करणतया ज्योतिष्टोमाख्येन
यागेन स्वर्गं भावितवानित्यर्थप्रतीतेः स्पष्टं चेदं णिनि विधौ हरदत्तग्रंथे एतेन ह्यर्थः पचिरिति भाष्यं व्याख्यातं भट्टैश्चाह विभज्य सेनां परमार्थकर्मो
सेनापतीं श्चापि पुरंदरोथ नियोजयामास सशत्रुसैन्ये करोतिरर्थेष्विव सर्वधातूनिति ननु क्रियाया धात्वर्थत्वे पचतीत्यादौ एककर्तृक वर्तमाना पाकविक्लि
त्तिक्रियाविशेष्यको बोधो न स्यात् प्रत्ययार्थं प्रति प्रकृत्यर्थस्य विशेषणताया औपगवादौ क्लृप्तत्वादिति चेन्न प्रत्ययार्थः प्रधानमिति ह्युत्सर्गः स चेह
त्यज्यते क्रियाप्रधानमाख्यातमिति स्मरणात् पाचिकेत्यादौ स्त्रीत्वस्य विशेषणत्वाभ्युपगमाच्च प्रस्तुतत्वेवैव पचतीत्यादावनुपपत्तिः पचंतं पश्ये ५९

आदेशानां स्थानिस्मारकत्वे स्थान्यर्थाभिधायित्वे चार्थैक्यध्रौव्यात् अतएव हि युष्मदि समानाधिकरणे मध्यमः अस्मद्युत्तम इत्यादि पुरुषव्यवस्था संग
च्छते अभिहिते कर्तरि प्रथमेत्यादि च न च समानाधिकरण इत्यनेन स्वाभिधेयसंख्यान्वयित्वमभिहितशब्देन चाभिहितसंख्या
कत्वं विवक्षितम् — मिति वाच्यं सूत्रानानुगुण्यात् कृत्तद्धितसमासैः संख्याया अनभिधानात्तदभिहितेपि तृतीयाप्रसंगाच्च न च कृत्स्वनभिधानमेवा
कर्तुरनभिधानमिति वाच्यं भावार्थलकारेपि कर्त्तरि प्रथमापत्तेरिति दिक् सामानाधिकरण्याभावादिति भावाभिधायिनो हि लकारस्य क्वापि न सामा
नाधिकरण्यं कर्माभिधायिनस्तु तत्संभवात् पुरुषत्रयमपि यथायथमुदाहरिष्यते तिङ्ग्राह्या व्यायास्तु सत्त्वरूपत्वमिष्टमेव तथा च भाष्यं कृद
भिहितो भावो द्रव्यवत्प्रकाशत इति द्रव्यधर्मान् लिंगसंख्याकारकादीन् गृह्णातीत्यर्थः अतएव पाकं पाकेनेत्यादौ यथायथं द्वितीयादयः न चैवमोद
नस्य पाक इति कर्मणि षष्ठी अनन्विता स्यादिति वाच्यम् घञादावपि प्रकृतिभागस्यासत्त्वापन्नक्रियाभिधायित्वाभ्युपगमात् उक्तं च हरिणा आख्या
तशब्दे भागाभ्यां साध्यसाधनवर्त्तिता प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः साध्यत्वेन क्रिया तत्र धातुरूपनिबंधना सत्त्वभावस्तु यस्तस्याः
स घञादिनिबंधन इति [illegible] अमृतरसप्रस्यंदमाध्वीकभूरिति कुसुमांजलिश्लोके अमृतस्य रसः रस्यमानममृतमिति यावदिति व्याख्यायतत्राप
ष्टंभकत्वेन कृदभिहितो भावो द्रव्यवत्प्रकाशत इति वर्द्धमानेनोपन्यस्तं [illegible] चोग्रंथं व्याचक्षाणो प्रानुमोदितं तत्सर्वमतिरभसात् तथा हि रस इति न
भावे कृतरस्यमानमिति विवरणेन सह विरोधात् यत्तु द्रव्यवदित्यस्य द्रव्यविशेष्यकां प्रतीतिं जनयतीत्यर्थवर्णनं तदपि निर्मूलमनुशासनवि [illegible]
चेति दिक् एकवचनमेवेति प्रायोवादोयं भाष्ये उष्ट्रासिका आस्यन्ते हतशायिका शय्यन्ते इत्यत्र बहुवचनस्य स्वीकारात् उष्ट्राणां हि आसिकाः [illegible]
तएव विलक्षणाः हताश्च नानाप्रकारैः शरजैरुक्ता नावतानाविकीर्णकेशाः विह्वलस्तवस्त्राश्च ततश्च यादृशानि हतानां शयनानि तादृशानि देवदत्ता
दिभिः क्रियंत इत्यर्थः अत्र सादृश्यावगमात् आख्यातवाच्य [illegible] भावस्य भेदावभासाद्बहुवचनं आसिकाः शापिका इति च द्वितीया बहुवचनं।

उ·

मंति क्रियाविशेषणत्वेनकर्मत्वात्· नचैवंक्लीबत्वमेकवचनंचस्यादिति वाच्यं स्त्रियांक्तिन्नित्यधिकारात्स्त्रीत्वावधारणेनसामान्येनपुंसकमित्यस्याप्र
५० वृत्तेःबहुत्वावधारणेनएकवचनाप्रवृत्तेश्च· नचैवमसत्वोक्तिर्विरुद्धेतिवाच्यं लिंगक्रियानाधारकारकयोग भावमात्रेतात्पर्यमित्युक्तत्वात् स्यसि
च्सीयद्यप्यजादयोद्वंद्वेननिर्दिष्टास्तथापिंउपदेशोऽस्यचएवविशेषणंनहनादीनामव्यभिचारान्नैवमाह· उपदेशेयोजिति अत्रप्राचाउपदेशेऽ
जंतेभ्योहनादेश्चपरेषांस्यादीनामिड्वास्यात्· सइट् चिण्वच्चेतिव्याख्यातंतन्नसूत्रेहिस्यादयःसप्तम्यानिर्दिष्टाः अजादयश्चषष्ठ्या चिण्वद्भावश्चप्र
धानशिष्टः इडुचकारेणतत्सन्नियोगशिष्टः चिण्वदितिचसप्तम्यंताद्वतिः स्यसिच्सीयुट्तासिष्वितिप्रतियोगिनिसप्तमीनिर्देशात् नचैतस्यसर्वस्यभं
गेनविपरीतव्याख्यानेबीजमस्तिचशब्दव्यवहितान्वयोपिनिर्मूलः स्यादेतत् सूत्रस्वरसानुरोधेंगस्यैवेट्स्यात् अडादिवत् अतइड्विधिवाक्ये स्यादीना
मितिविभक्तिविपरिणामआवश्यक इतिचेत्· सत्यं·पूर्ववाक्येचरितार्थस्यउत्तरत्रविपरिणामोन्याय्यएव तदनुपयथाश्रुतविभक्तेरचरितार्थत्वात्तस्य
नुचितःविपरिणामः तथाहि हरिःसेव्यःतद्भक्ताश्चेतिप्रयोगेउत्तरवाक्येसेव्याइतिविपरिणामंदृष्ट्वानहरिःसेव्याःइत्यपिप्रयोक्तुमुचितं यदप्याहुःवि
भक्तिव्यत्ययस्यापिबहुलंदर्शनादितितदपिभक्तिवादमात्रमितिस्पष्टमेव किंच प्राचोव्याख्यानेचिण्वदितितृतीयांताद्वत्तिः तत्रयथापूर्वस्य।
कार्य्यंवृद्ध्यादिकमतिदिश्यते एवंस्यस्यस्वस्मात्परस्यचकार्य्यमतिदिश्येत· ततश्च चिणीवइडप्युदात्तःस्यात् चिणःपरस्येवइटःपरस्यापिलुकप्र
वर्तेत·ननुबाधितोसौइट्आगमत्वेनप्रत्ययावयवतयाप्रत्ययत्वाभावादितिचेन्न कृतेप्यागमेअवशिष्टस्यतयाप्रत्ययत्वाभ्युपगमात् कोंतइ
तिसूत्रेप्राचोग्रंथंव्याचक्षाणैस्तथैवनिर्णीतत्वात् किंचवृद्ध्यादिकार्य्यस्यप्रत्ययेपरेविहितस्यइटिपरेकथंनिर्वाहइत्याशंक्यचिण्वद्दृष्टस्येसर्वस्ये
वातिदेशप्रत्ययत्वस्याप्यतिदेशात् नदोषइतितावत्प्राचोग्रंथंव्याचक्षाणाएवाहुः तत्कथमुक्तंस्यापिप्रत्ययत्वंनलभ्येत यत्तुवदंति चिणोलुकि एम·
चिण्वदिट्येसिद्धत्वादितितदपिन नहिचिण्वदित्यतिदेशंप्रतिइडसिद्धः अतिदेशस्यनिर्विषयत्वापत्तेः तस्माच·लुकोपिवृद्ध्यादिसमकक्षत्वेन ५०

तिदेशाद्दीर्घाणएवेत्यलमतिक्षोदेन ननुपदिचिणिदृष्टमात्रस्यातिदेशस्तर्हिहनिणिङादेशाअपिस्युः घानिष्यते आपिष्यते अध्यापिष्यतेइति मैवं
अंगाधिकारबलेनाङ्गस्यैवातिदेशात् नचैतेअंगाः तदेतदाह अंगकार्य्यमितिसीयुटइति तथाचसीयुट्शब्देनतद्विशिष्टलस्यतइतिभावः।
आर्द्धधातुकइत्यनेननव्यवस्थितविधिलिङ् नचतत्रवलादित्वंनास्तीतिवाच्यं तस्येहानपेक्षणात् यदाहुः नित्यश्चायंवलनिमित्तोविघातीतिअस्या
र्थः भाविष्यतइत्यादौभूस्यइतिस्थितेयमपिवलादिलक्षणमिटंबाधित्वाचिणवदिडेवभवतिस्त्यामपिशब्दांतरप्राप्तौकृताकृतप्रसंगित्वमात्रेण।
भुवोवुकइवनित्यत्वात्बलादित्वनिरपेक्षोह्यसौ परत्वनित्यः अस्मिन्कृतेवलादित्वविघातात् एवंचनित्यत्वात्तेडभ्योप्ययमेवेड्भवति एते
नउपदेशइतिकिं भाविष्यते अत्रगुणावादेशयोःकृतयोर्नस्यादितिप्रसादग्रंथः प्रयुक्तः चिणवदिटोविषयेवल्निमित्तस्याप्रवृत्तेरवादेशस्यासंभ।
वात् गुणमात्रेप्रवृत्तेपि...त्वानपायात् उपदेशग्रहणफलंतुमूलएवस्फुटीभविष्यति चिणवदिटइति ननुण्यंतस्यधातोरुपदेशाभावात्का।
र्य्यमिहचिण्वदिट् नचणोरुपदेशादुपदेशेयोचूतदंतत्वमस्त्येवेतिवाच्यं आरिता स्मारितेत्यादौपरत्वान्नित्यत्वाच्चपरेगुणेकृतेचिणवदिडभाव
प्रतेः नहिण्यंतस्यउपदेशेयोचेतदंतत्वमस्तीतिचेत् मैवं उपदेशेयोजितिव्याख्यानेपिउपदेशग्रहणसामर्थ्यादेवआरितेत्यादौप्रवृत्तिस्वीकारात्।
अस्तुवाउपदेशेयदजंतंतस्येतिव्याख्यानं अंगस्येतिव्यधिकरणषष्ठी अंगावयवस्याजंतस्येति ...रिष्यतइत्यादौचव्यपदेशिवद्भावः सर्वथापि।
णिजंतेचिणवद्भावोस्त्येव तदाह चिणवद्भाव... चहंतेश्च...दीर्घोक्तोयोमितांवा चिणीति ह्रस्वो...लुप्यतेणिर्नित्यश्चायंवलनि।
मित्तोविघातीति यत्तुण्यंतस्येनाजंतत्वाच्चिणवदिडिति प्राचोग्रंथस्यव्याख्यानं...धात्वंतरं नतूपदेशावस्थायांभवत्ययमजंतइति तन्माप
विरुद्धं स्वोक्तिविरुद्धंच उपदेशोहिशास्त्रादुच्चारणं नचण्यंतस्यतदस्ति किंच धात्वादेः षः सइत्यत्रसुब्धातोः प्रतिषेधमुक्त्वाउपदेशग्रहणबले
नतत्प्रत्याख्यानमाकरेस्थितं स्वयमपितत्रतथैवोक्तं तदि...रुध्येतेतिदिक् आतोयुक् चिण्कृतोः किम् चौडिः बालाकिः बाह्वादित्वादिञ् दौ

उ.

म·ति अदापिषातामिति स्याद्योरिच्चे सेतद्बाधित्वापरत्वाच्चिण्वदिटि कृते ऽझलादित्वात् पुनर्नेत्याहुः सत्स्वपि तस्मिन्नेह काचित् क्षतिः अनिगलक्षणापाद्य
५१ ह्यारूपनिष्पत्तेः आशीर्लिङीति ननु लुङि स्त्र्यौ स्थयोरपि वैकल्पिकतया येनना प्राप्तिन्यायाभावादिति भावः विशेषविहितत्वादिति लिङीति हि पदद्व
यसाधारणं सीयुट् तु आत्मनेपद एवेति विशेष इति भावः एतेन स्यसिच्सूत्रे प्रतिपदविधेर्बलीयस्त्वात् चिण्वद्भाव इति कैयटाग्रंथो व्याख्यातः
यत्तु तत्र नारायणेनोक्तं अत्र यद्यपि वधादेशोपि प्रतिपदविधिस्तथापि विप्रतिषेधाच्चि एवङ्भाव इत्याशय इति यच्च तत्परिष्कारार्थं प्राचो ग्रंथं व्या
चक्षाणेनोक्तं यद्यपि परादप्यंतरंगं बलीयस्तथापि परशब्दस्येष्टवाचित्वाच्चिण्वद्भावेन व्यवस्थेति तस्याप्याशय इति तदेतत्सर्वं कैयटग्रंथार्थाप
र्यालोचनमूलकमिति मूल एव ध्वनितं पक्षे वधिषीष्टेति इह प्राचा पक्षे वधादेश इत्युक्तं तत्सम्यगेव यत्तु तत्र तत्पौत्रेणोक्तं वधादेश इति पर
मतं स्वमते तु वधादेशोत्र न भवत्येव तथा चोक्तं महाभाष्ये चिण्वद्भावे कृते पुनः प्रसंगाद्वधभावः कस्मान्न भवति सकृद्गतौ विप्रतिषेधे यद्बाधि
तं तद्बाधितमेवेति कृत्वा हेनिणिङादेशप्रतिषेधश्चेति तदेतद्भाष्यार्थानवबोधविजृंभितं लिङीति परसप्तमी स्यसिच्सूत्रे आर्द्धधातुक इत्यस्या
संबंधं च प्रौढिवादेन स्वीकृत्य प्रवृत्तं वधभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेनेति वार्त्तिकं व्याचक्षाणेन भाष्यकृता चिण्वद्भावपक्षे खलु वधाद
शाभाव उक्तः ननु चिण्वद्भावविरहेपि तत्कथं स्यसिच्सूत्रारूढमपि विकल्पं विस्मृत्याशुद्धमपि मूलमशुद्धीक्रियते यदपि हनिणिङादेशस्या।
प्युक्तं तदपि न अनागस्याप्यतिदेशप्राप्तेर्वार्त्तिककृता घानिष्पत्तय इत्यादौ तदुक्तेः भाष्यकृता अंगाधिकारबलेन तत्समाधानाच्च न च लिङि लुङि च।
र्थसाद्युपदिष्टस्य वधेरतिदेशापेक्षास्ति उदाहृतश्चात्र वधादेशः भाष्यकारप्रभृतिमाधवांतैः सर्वैरेवेति दिक् अहसातामिति चिण्वदिटो ऽभावे ह
न्सिजिति कित्वादनुदात्तोपदेशेत्यनुनासिकलोपः चतुर्भिरधिकं शतमिति यत्तु ध्वे सलोपो वा सस्य द इति केचिदिति पुनर्द्वित्वमिति च प्रामा। राम·
णिकद्वयं संचार्य लोपविकल्पादिप्रपंचेनेह अष्टत्रिंशद्रूपाणि भवंतीति वदंति तत्रोक्तिसंभवं न पश्यामः पुनर्द्वित्वे रूपानंतस्य दुर्वारत्वात् अष्ट ५१

ि[illegible]त्तं रव्यायाएवपुरस्कारे मूलाभावाच्चेत्याशंतावत् अवष्टभ्येतितदपिपूर्वत्रासिद्धमितिसूत्रसिद्धार्थकथनमित्युक्तं नविस्मर्त्तव्यं अस्मिन्निष्ट
ष्टपक्षेचिस्ममुलोरितिसूत्रेदीर्घग्रहणंकर्त्तव्यमेव तथाहि· हेड् अनादरे घटादिः एचइकुह्रिडयति अत्रचिस्ममुल्लोः कृतयोर्ह्रस्वेविकल्प्यमानेअ
हिडि अहेडीतिस्यात् दीर्घेतुअहिडि अहीडीतिभवति एतच्चचिस्ममुलोरितिसूत्रेकैयटग्रंथेकमेणिङ्·सूत्रेहरदत्तग्रंथेचस्पष्टम् दीर्घोनास्तीति।
यङोऽन्त्योपधस्यानिवत्वेन णिच्परत्वाभावादुपधावृद्धेरप्रवृत्तेरितिभावः नोदात्तो· कथंतर्हि हरेर्यदक्रामिपदैककेन खमितिश्रीहर्षः प्रमाद एवा
यं· यदिसमाधेयमेवेत्याग्रहः तर्हि निवृत्तप्रेषणाद्याकृतेर्थेणिचितत्क्विएवोध्यः कथमुद्यमउपरमइति संज्ञापूर्वकविधेरनित्यत्वात् तथाचनि।
र्दिश्यते अड उद्यमे· यमउपरमेइति अथयेद्विकर्मकास्तेषुतिङ्कृत्यक्तखलर्थाः किम्मुख्येकर्मणि उतगौणे· किंचोभयोरितिसंदेहेव्यवस्थामाह द्विक
र्मकाणांत्विति इतिभावकर्मप्रक्रिया प्राक्सकर्मकाअपीति· फलावच्छिन्नव्यापारपरत्वेहिदेवदत्तादिनिष्ठव्यापारव्यधिकरणविक्लित्तिद्विधाभव
नन्यगभवनादिफलाश्रयाणांमोदनादीनांकर्मत्वमुचितंकर्त्तुरीप्सिततमत्वात् व्यापारांशपरित्यागे नफलांशमात्रपरत्वेतुपचिभिदिरुहामपि
गध्यतिद्विधाभवतिस्यगभवतीत्यादिविवरणविषयीभूतानांगध्यत्यादिवदेवाकर्मकता नह्यस्यामवस्थायामोदनादेः कर्मत्वंसंभवतिकिंतुक।
र्तृत्वमेवस्वतंत्रःकर्त्तेतिलक्षणात् एतच्चकारणविति सूत्रएवप्रपंचितंस्यादेतत् द्विकर्मकाणामेकस्यकर्मणःप्राधान्यविवक्षायामपित्रपरे
णसकर्मकत्वमस्त्येव· स्वयंप्रदुग्धे[illegible]गुणोरूपस्तुतावसूपमानस्यवसूनिमेदिनीत्यादौयथेतिचेत् सत्यं एककर्मकाणामेवाकर्मकतायाउच्यमा
नत्वान्नदोषः तदेतद्ध्वनयति· प्रायेणेति· अकर्मकत्वमुस्यादनस्यफलमाह तेभ्योभावइति भावेचाकर्मकेभ्यइत्युक्तेरितिभावः क[illegible]कर्म
स्याक्रियालक्ष्यतेतदाह कर्मस्थयेति लकारवाच्यइति लकारेणोपस्थापितइत्यर्थः द्विलकारकादिति· अयंभावः व्यस्ययोर्वह्रलंलिङ्[illegible]तिसं
हितयापाठेपरसवर्णविधिलब्धलकारोपश्लिष्टमंनव्यंजनपरत्वेकस्यानेकस्यवोच्चारणेविशेषोस्तीतिभाष्योक्तेः यद्वालुप्तनिर्दिष्टो[illegible]यसुसंयं

उ
म· ति· गांतस्येतिपक्षांतरे तु हल्लोयमामिति तत्वतग्रहणमिहानुवृत्तं षष्ठ्या विपरिणम्यते लुप्तषष्ठीकं वा षष्ठ्यर्थे प्रथमा तदुपस्थाप्यत्वं· कर्त्तरि शब्विति सूत्रात् कर्त्तृग्रह
५२ णमनुवर्त्त्य प्रथमया विपरिणम्यते तेनाभिमतार्थलाभ इति करणाधिकरणाभ्यामिति नन्विह करणत्वाद्यवस्थायां वस्तुतः सन्नपि असिस्थाल्योर्व्या
पारो धातुनानोपात्त इति चेत् किं ततः न ह्येतस्मिन् सूत्रे साध्यस्य प्रतियोगिभूता क्रिया धातूपात्तत्वेन विशेषिता एवं चासति कर्मणोऽस्मिन्नप्यादेवाति प्रसं
ग इति भावः अधिगच्छतीत्यादिश्लोकस्योत्तरार्द्धं नु यन्नपावशांतस्तस्मैन मोस्तु गुरवे सदेति बोध्यं स्यादेतत् पच्यादीनां गम्यादीनां च फलाभिधायि
त्वे फलस्य च कर्मनिष्ठत्वे तुल्ये· कथं कर्मवद्भावप्रवृत्त्यव्यवस्था तत्राह यत्रकर्मणीति· उक्तं च हरिणा विषयदर्शनं यत्र क्रिया तत्र व्यवस्थि
ता क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पितेति अन्येषां धातूनां शब्दैः क्रियाव्यवस्था शब्देन कर्त्तृव्यापारस्यैव प्राधान्येनावगमात् कर्त्तृस्थत्वेऽस्या
र्थः उद्देश्यतापि कचित्कर्मस्थांशस्य किं तु व्यापारांशस्येति सापि नियामिका तथा हि दर्शनारोहणाभ्यां विषये स्य ग भूते च विशेषानुपलंभात् कर्त्तृ
स्थता उद्देशानुरोधाच्च अहं पश्येयमिति ह्युद्देशो न त्वयं विषयो भवत्विति· एवमहमुपरिगच्छेयमित्युद्देशो न तु हस्तिनोऽस्य गभावो भवत्विति उपरिगम
नरूप एव व्यापारविशेषो रुहेरर्थो न तु न्यग्भावनमात्रं भूमिष्ठे वृक्षस्य शाखां हस्ताभ्यामवनमयत्यपि आरोहतीत्यप्रयोगात् अत एव हि
पद्धिनु पर्ण्छंदसीत्यत्र भाष्ये· रुहिर्गत्यर्थ इति· अत एव चारोहणो कर्त्तुर्णोकर्मत्वं पचिछ्रियोस्तु विक्लित्तिर्द्विधाभवनरूपो विशेषः कर्मणि दृष्टस्तदुद्दे
शेनैव च कारकव्यापार इति महद्वैषम्यं एवं चारुह्यते हस्तीति कर्मवद्भावं प्रदर्शयंतो भाष्यन्यायविरोधादुपेक्ष्या इति कैयटः हरदत्तादयोऽप्येवं नन्वेव
मिहैव सूत्रे सकर्मकाणां प्रतिषेधोऽन्योन्यमाश्लिष्यत इति भाष्यवार्त्तिकग्रंथः संयोगरूपस्य फलस्य कर्मस्थत्वात् प्राप्तिरिति कैयटादिग्रंथश्च विरुध्येते
रुहिगमिभ्यां सह श्लिषेर्वैषम्यस्य दुरुपपादत्वात् संयोगाख्यफलस्य सर्वत्र तुल्यत्वादिति चेत् सत्यं· उदाहरणदिङ्मात्रं ततु न नु स्थितोदाहरणमिति राम·
गत्वं स्यादेतत् ज्ञानेच्छयोरिव यत्नस्यापि कर्त्तृस्थत्वात् तद्वाचिनः करोतेरपि कर्त्तानकर्मवत्स्यादित्याशंक्य करोतेर्यत्नार्थत्वमेव नास्तीत्याह करो ५२

तिपिति एतच्च भूवादिसूत्रे भाष्ये स्पष्टं नैतद्दिक्षुपलक्षणं सकर्मकत्वैवतावन्नस्याद्यतत इतिवदिति बोध्यम् एतेनेति· ज्ञानस्य कर्तृस्थत्वमुपपादनेनेत्यर्थः
अनुव्यवस्यमान इति खंडनकारप्रयोगः सकर्मकाणामिति एतेन सृजस्यात्मानामात्मनेति व्याख्यातं तथाहि आत्मानमात्मना वेत्तीत्यस्य कर्तृस्थभा
वकत्वेन सुसाधत्वेपि सृजसीत्यंशे प्रकृतवार्त्तिकेनैव निर्वाहः सृजेः कर्मस्थफलकत्वात् अन्योन्यमिति स्यादेतत्· यद्यपीह संयोगानुकूला क्रिया।
कर्मत्वकर्तृत्वोपयोगिनी उभयनिष्ठा च तथापि व्यक्तिभेदोस्त्येव अत एवान्यनिष्ठां प्रत्यन्यस्य कर्मत्वं· अन्यथा उभयोरपि कर्तृत्वमेव स्यान्न तु
कर्मत्वं इमौ गंगौ स्पृशत इत्यत्र यथा एवं स्थिते कर्मत्वोपयोगिनी या क्रिया तया तुल्यक्रियस्य तदीयकर्तुर्विधीयमानः कर्मवद्भाव इह न प्राप्नोत्येव·
एवं सृजस्यात्मानमात्मनेत्यत्रापि· तत्किं वार्त्तिकारंभेणेत्याशंक्योदाहरणांतरमाह· अजेति· नयतेर्हि कर्मकतयाजारूपस्य कर्मणः कर्तृत्वे।
नविवक्षायामपि ग्रामरूपेण कर्मणा सकर्मकत्वान्नातिदेश इति भावः स्यादेतत्· कर्मवत्कर्मणेति सूत्रे मेवमास्तु ननु तर्ह्येवं वार्त्तिके प्रयोगास्तु सर्वेपि
प्रकारांतरेणैव व्याख्यास्यंते· तद्यथा एकस्यापि वस्तुनोऽवस्थाविशेषादिविशिष्टाविशिष्टत्वाभ्यामौपाधिकं भेदमाश्रित्य कर्तृत्वं कर्मत्वं च औप
देशिकमेव सिद्धांतेपि कश्चित्स्वीक्रियते आत्मानमात्मना वेत्ति सृजस्यात्मानमात्मनेति· एवं पच्यते ओदन इत्यत्रापि मुख्यकर्मण्येव प्रत्ययोस्तु मा
स्तु च निवृत्तप्रेषणाता स्वयमित्यस्यात्मनेत्यर्थात्· एवं च स्थाली पचतीत्यत्राधिकरणइव कृत्स्न एव धात्वर्थः कर्मण्यप्युपलभ्यत इत्यपरमनुकू।
लं कथं तर्हि पच्यते ओदनेनेति भावे लकार इति चेन्न माभूत् भावे कर्मण्येवास्तु कर्म चात्मैव· न चैवं भेत्तव्यं कुसूलेन भिन्नमौषइदमिति भावे क्तः स्यादयो
नस्तुः कर्मणि चेदात्मेति विशेष्यानुरोधेन पुंस्त्वं स्यादिति वाच्यं· सामान्येन नपुंसकसंभवात् स्वरूपमित्यस्य विशेष्यत्वसंभवाच्च आत्मेति त्विवक्षा
यां तु पुंलिंगतायाः उक्तविवक्षायामुक्तपक्षेपि दुर्वारत्वाच्च अत्रोच्यते कर्मवत्सूत्रप्रत्याख्याने न दुहस्नुनमामिति प्रतिषेध आरभ्यो क्रेवां आद्ये
शुद्धकर्मैवास्य विषयः स्यात् तत्र च दुह्यते गौर्गोपालेनेत्यादि न सिध्येत् दुग्धे गोपालेनेत्यादिच स्यात् द्वितीये तु· नमते दंड इत्यादि न स्यात् कर्मणि

उ·
म·ति· यक्प्रसंगात् कर्त्तरितङो दुर्लभत्वात्· किंचाचः कर्मकर्त्तरीति चिणिवत्कल्पो निर्विषय एव स्यात्· कर्मवदित्यतिदेशस्य विषयीभूतः कर्त्ता हि कर्मकर्त्ता· न
५३ चास्मिन्तवास्ति त्वद्रीस्यात्मनात्मा ज्ञापीत्यस्यापि चिण्वत्कल्पापत्तेश्च· ननु निवृत्तप्रेषणानामाश्रिसभूतपूर्वकर्मणि सांप्रतिके कर्त्तरि चिण्वत्कोऽयं श्रू
मइतिचेत्· तर्हि तत्रैव लङादिषु यथायथं शबादेयः स्युः यक्च न स्यादिति कर्मवत्सूत्रमवश्यमारभ्यमेवेति दिक्· सृजियुज्योः श्यनोनित्त्वं स्निस्यादिर्नित्स
मितिस्वरार्थं यकि तु लसार्वधातुकानुदात्तत्वे कृते यक उदात्तत्वं श्रूयेत यत्तु प्राचा श्रद्धावत्कर्त्तृकात्सृजेर्यक्चिणोः कर्त्तरीति केचिदित्युक्तं तत्र यगिस्य
स्युइं आत्मनेपदानुक्तेश्च न्यूनतेति दिक्· भूषाकर्मेति यत्तु प्राचा कृगृह्श्रित्रभूषार्थेभ्यः सन्नन्ताच्च यक्चिणौ नेत्युक्तं तत्र कृगृह इति न्यूनं किरादीनां सर्वेषां
ग्राह्यत्वात् एतच्च आद्रियते· आदृते इत्युदाहरणाभ्यां मूले ध्वनितं यदपि चिण्वदिडपि नेति केचिदित्युक्तं तत्र केचिदित्यस्वरसोऽनुचितः उक्तार्थस्य भा
ष्यवार्त्तिकारूढत्वात् प्राप्तात्मविष्टेति चिण्वदिटः यत्तु प्राचा न दुहेति चिण्वदिपि निषेधं मन्वानेनोक्तं न निषेध इति केचिदिति तन्न चिण्वदिटि हि चि
णिवत्कार्यमतिदिश्यते· न च चिणाने युक्त्यासोतिदेशो निषेद्धुं शक्यते येन चिण्वदिटो निषेधः स्यात् एवं च निषेधाभावस्यन्याय्यत्वे सर्वसम्मतत्वे
च केचिदित्युक्तेरनुचितत्वात् यत्तु वदन्ति चिणि निषेधस्य चिणि परे विहितत्वाभावात् तस्मिन्कर्तव्ये नास्त्यतिदेश इति तदतिरभसात् आतिदेशेन
निषिध्यत इति वक्तव्ये निषेधो नातिदिश्यत इत्युक्तेरनुचितत्वात् अचीकरतेति चिणि प्रतिषिद्धे णिश्रीति चङ् यत्तु प्राचा कर्मकर्तरि स्विङ् नेत्युक्त्वा अ
कारयिष्ट इत्युदाहृतं तन्निर्मूलत्वादुपेक्ष्यं यत्तु परिष्कुर्वन्ति चङ् विधौ कर्त्तरीति न कर्तव्यं सामान्येन चङ् विधीयतां तस्य भावकर्मणोः परत्वाच्चिण्वाध
को भविष्यति किंच चिणाते पद इत्यतः चिणीति वर्त्तमाने पुनश्चिण्ग्रहणं बाधकबाधनार्थं· तथा च कर्त्तृचिण्ग्रहणसामर्थ्यात्· चिणेवात्र भाव्यं न रम·
तु चङ् स्यादिति तदस्त्यं तरभसात् चिणि निषेधस्यैव प्रक्रान्तत्वेन चिणैवात्र भाव्यमित्युक्तेर्व्याहतत्वात् किंच· कर्त्तरीति मास्त्विस्यसंगतमेव· कर्मणि तश ५३

[illegible]भिन्नेष्वपि प्रसक्तेः नहि तत्रापि चिण्णिपश्च्लेङ् वाधेत एवंच कर्तृचिण्ग्रहणयोः सामर्थ्यापवर्गानमपि कथमुक्तिसंभवं लभतामित्यास्तां तावत्।
चिण्वदिट्येपि निषेध इति प्राचो भ्रमं खंडयति स्यादेवेति यत्तु परिष्कुर्वंति स्यसिच्सूत्रे चिण्वदिति तृतीयांतादृतेर्विज्ञानात् चिण्निषेधोपि चिणः
कर्तव्यमित्यतिदिश्यत इति तन्न सप्तम्यंतादेव वतिरिति तत्रैव वर्णितत्वात् आत्मनेपदविधौ योः कर्मकर्तुमुदाहरंति विकुर्वते सैंधवाइति कुषि
नदुहेति सूत्रान्नेत्यनुवर्तते तदाह नयगिति किं त्विति तस्मिन्नेव विषये इति भावः अनुवृत्तेः फलमाह यग्विषये त्विति प्रसक्तिपूर्वको हि निषेधः य
त्र तु यको न प्रसक्तिस्तत्र न निषेधः नापि श्यन् नापि तत्सन्नियोगशिष्टं परस्मैपदमित्यर्थः तेन लिङाशीर्लिङोः स्यादीनां च विषये नेदं सूत्रं प्रवर्तत इति
फलितं ——— श्यन्यको नुमि विशेषः कुष्यती जंघा नित्यनुम् स्वरे विशेषोप्युक्त एव अत्रेदमवधेयम् कर्मकर्तरि वृत्तिकारादिभिः प्रायेणात्मनेपदमेवेति
प्रयुज्यते तदविवक्षितं आत्मनाकरणेनेति व्याख्येयं न तु कत्रैति तथा सति कर्मणोपवलः स्यात् स्पष्टं चेदं कैयटादौ इति कर्मकर्तृप्रक्रिया अभिज्ञा अ
भिज्ञास्मृतिः सा उच्यते बोध्यतेनेनेति विग्रहः तदाह स्मृतिबोधिनीति स्मरसीत्यत्र वाक्यार्थः कर्म पश्य मृगो धावतीतिवत् क्तस्मेति क्रियायां विशेष-
णं गोकुलाधिकरणकास्मत्कर्तृकभूतानद्यतनवासकर्मकं कृत्स्नसंबोध्यकं स्मरणमिति फलितोर्थः वासोलक्षणमिति प्रसिद्धत्वात् चारणं लक्ष्यमि
ति सहसा बुद्ध्यनारोहात्स्मारयितव्यमित्यर्थः असंतापहृवइति अपन्हवोपलापः नाहमित्यादि कलिंगो नाम जुगुप्सितो देशः तत्र प्रविश्य त्वया चिरं स्थि
तमिति कश्चिदुक्तः सन्नाह नाहं कलिंगान् जगामेति न केवलमवस्थानमेव निषिध्यते किं तर्हि तद्धेतुभूतं गमनमपि इति भवत्यसंतापह्नवः यदा तु गमन
मेवाभियुक्तस्तदेवापलपति न तदास्त्यतापन्हवइति लङेव भवति प्रष्टव्यः प्रश्न इति कर्मणि नङ् आसन्नेति पंचवर्षाभ्यंतर आसन्नकाले पंचवर्षातीते॥
तं तु विप्रकृष्टकालमिति विवर्णयति ननौ पृष्टप्रतिवचनमिति विग्रहः मावत्सुरानिपातयोर्लट् लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वज्ञापनार्थं
[illegible]ग्रहणं भुवश्चेत्स्मर्महाव्याहृतिग्रहणमप्येवमेव तत्रान्यतरस्यां शक्यमकर्तुम् विभाषा ननु कोर्हि शब्दोयमनद्यतनविषयः अनद्यतने र्हिल

उ·
म·ति· न्यत्र स्यामिति किमोर्हि लिप्सु स्यादनात् ततश्चतद्योगे लुटैवभाव्यं नतु लृटा तत्कथमुदाह्रियते कर्हि भोक्ष्यत इति अत्राहुः भविष्यत्सामान्ये भोक्ष्यत इति लृट्स्वक
५४ र्हिशब्देन संवध्यत इति भोक्तेति ननु भविष्यत्सामान्येयं लट् विहितः सोनद्यतने लुटा वाध्येत तत्कथं विकल्पोदाहृतिः अत्राहुः अनद्यतने लुडित्यत्र वृद्योः
गोनुवर्त्तते तेन लुड्विषयेपिपक्षे लृट् एवमुत्तरमेपियोगत्रयं तत्रानुवर्त्तते तेनतत्तद्विषयेपि लुट् पाक्षिक एव न तु वाधकः लिप्स्यपूर्वेणासिद्धे सत्यत्र किं छ
नार्थमिदमिति ध्वनयन्नुदाहरति· यो न्नमिति· वर्त्तमा ये नोपाधिनेत्ति तथा हि पृङ्·यजोः शानन्निहितः सत्ताभ्यामेव न तु धात्वन्तरात् तच्छीलादि विशि
ष्टे कर्त्तरि अलंपूर्वोत्कृञ इष्णुजुक्तः सोपि तस्मिन्नुपाधौ सत्येवेत्यादि कदा आगतोसीति· भूतकाले न प्रश्नवाक्यमुदाहरणे भूतकालाभिव्यक्तये एवं क
दा गमिष्यसीत्यत्रापि प्रश्नं उदाहरणापोरयमेष इति पदाभ्यामागमनाविनाभूतं यद्रूपं प्रस्वेदपरिकरवंधादि युक्तं तत्स्मर्तिनिर्दिश्यते इदानीमागमनमिति
अनयितुं तेनकदेतिप्रश्नं प्रति आर्थिकमुत्तरं संगच्छते सामीप्यं च द्योतितं भवति आरोपेणोपपत्तिमाश्रित्य प्रत्याख्यातमिदमाकरे क्षिप्रवचनग्रहणं स्व
रूपस्यैव ग्रहणं माभूदित्येवमर्थम् तदाह क्षिप्रपर्यायइति पंचदशाणात्र इति भाष्यकारप्रयोगात्संख्यापूर्वमिति क्लीवत्वेनेति भूतेच अस्योदाहरण
मि उताप्योरित्यतः प्रभृतिवोध्यानि· ततः प्राचीनेषूत्तरसूत्रेण विकल्पोक्तेः किंकिला· अस्ति भवतीति त्वत्कर्तृकं शूद्रोगमनमसृतेत्यादिरर्थः जातु यच्च
नवक्लृप्त्यमर्षयोरिति लिङ्· लृटोः सिद्धौ वचनमिदं लृटो वाधनार्थं· तदाह लृटोपवाद इति संभावनेल संभावनमिति प्रथमया सत्सम्यन्तं विपरिणम्यते अ
लमिति च सप्तम्यन्तेति संबंधः एतच्च गौरवं सिद्धस्य गतिश्चिन्तनीयेति न्यायेनाश्रीयते· अलमिति संभावने सिद्धाप्रयोगश्चेदिति सूत्रपि तु मुचितं· अलमि
ति चेत् किम् प्रायेणागमिष्यति हंतीति पलायन इति हननं हेतुः पलायनं हेतुमत् लक्षणहेत्वोरिति शत्रादेशस्तु न भवति देवत्रातो गलोग्राह इतियोगे।
च सिद्धि धिरिति व्यवस्थित विभाषा सुपाठात्· इच्छार्थे· ननुकामप्रवेदन इत्युपसंख्यायते एवं च कामप्रवेदने कच्चितीति सूत्रं मास्तु अनेनैव सिद्धेरि। तप·
ति चेत् तमेवं· यत्रार्थप्रकरणादिना कामप्रवेदनं गम्यते तदर्थं तदारंभात् तर्हि तेनैव सिद्धत्वात् सकृत्सूत्रं मास्त्विति· चेन्न· तेन लिङि सिद्धेपि लोडर्थं सप्तारं। ५४

भोतु लोयच लिङो वा धामाभूदिति लिङ्प्युक्तस्तर्हि लोड्वे सेवो ध्यतामिति चेन्न· लिङनुकर्षेतत्संवद्धस्य विभाषाग्रहणस्याप्यनुकर्षप्रसंगादिति दिक् लिङ्
सर्वानेककर्तृकेषु तुमुन्सूत्रितः स यथेच्छार्थेषु लिङ्लोटाविति प्राप्तं लोटं वाधते एवं लिङमपि वाधेत न च वासरूपविधिः [illegible]तुमुन्ण्वुलर्थेषु तद
र्थादिति लिङ्बाध्यते धातुसंबंधे इह धात्वोः संबंधोनुपपन्नः स्वार्थे स्मारतोनोपक्षीणत्वात् पदार्थसंसर्गः कारकविशिष्टक्रियावाक्यार्थः इ
त्यभ्युपगमात् शाब्दबोधे शब्दोपि भासत इत्यभ्युपगमेपि शब्दस्य स्वार्थे प्रत्येव प्रकारत्वेन तु शब्दान्तरं प्रति अथोच्येत यथा सन्निधौ कर्मत्वं समानक
र्तृकत्वं च धातोरर्थद्वारकं विशेषणमाश्रितं यथा कश्चिद्बोधं सुवतस्य कर्मत्वं तथेहापि धात्वोरर्थद्वारकसंबंध इति तदपि न· तथा हि सति परस्परसं
बंधार्थबोधकानेकधातुप्रयोगे प्रत्ययाइति फलितं स्यात् ततश्च गोमानासीद्भविता वेति न सिद्ध्येत् न ह्यत्र वर्त्तमानकाले लिः प्रयुज्यते न चाप्रयुज्यमा
मानस्य संबंधोस्ति तस्माद्धातुशब्देन तदर्थो लक्ष्यत इत्यभिप्रेत्याह· धात्वर्थानामिति विषयबहुत्वापेक्षं बहुवचनं एकैकविषयापेक्षायां तु धात्व
र्थयोरिति वोध्यं स्यादेतत् तत्तद्विधिवाक्यैरेव स्वविषयप्रत्ययाः सिद्धाः तत् किमनेन पदिनुपत्राप्राप्तास्तत्राप्येतत्सूत्रेण प्राप्येरन् तर्हि उपप दोपा
धिप्रकृतिप्रत्ययार्थानां संकरे सति सर्वोपप्लवः स्यादित्याशंक्याह यत्र काल इति अयं भावः कालमात्रमनेन बाध्यते न त्वन्यदपि अल्पबाधेनोपपत्तौ
बहुबाधस्यान्याय्यत्वात् अन्यदेव तर्हि किंचिदेकं बाध्यतामिति चेन्न· किं तदिति विनिगमकाभावात् कालांशेपि किं विनिगमकमिति चेत् प्रायदर्श
नमिति महाभाष्य वर्त्तमानसामीप्ये इत्यादिष्वपि कालान्यत्वप्रतिपादनमेव प्रायेण दृश्यत इति भावः स्यादेतत् व नानिपश्यन् यो निवेदयिष्यतो मनोन्म
विचयच्चेत्यादि महाभाष्यविप्रयोगेषु दर्शनात् वैदिकानामतीतानामपि लङ्लुङादि[illegible] संबंधो दृश्यते स च कालवाधेपि समर्थनीय इत्येतदर्थमिदं सूत्रं
तत्र यथा विध्यथ इति लिङर्थस्य वाधः किं च स्यात् तत्राह तिङन्तवाक्येति प्रधानानुरोधेन गुणानामेव व्ययनं न तु विपरीतमिति भावः ये तु प्रथमान्तविशेष्य
कं बोधं स्वेच्छामात्रेण स्यायं क्रियाप्रधानमाख्यातमिति भाष्यवार्त्तिकनिरुक्तादि महर्षिवचनान्युपेक्षन्ते· तेषामयमपि दोषः प्रसज्येत उक्ताश्चान्ये

म·ति· पिकारकप्रकरणे स्यादेतत् व्यवहारस्य विषयेऽध्याहृते लक्षितेपि वा भूतभाविप्रस्ययार्थाः संबध्यतां यथायथं तथाहि अग्निष्टोमयाजीति भूत एव णिनिः ज
५५ निते सेतत्समभिव्याहारे तु इत्थं व्यवहरिष्यमाण इत्यध्याहारो लु लक्षणा वा एवं गोमानासीदित्यत्रापि ईदृशव्यवहारविषय आसीदित्यर्थः अवश्यं चैतद
भ्युपगंतव्यं अन्यथा हि भाविकृत्समासीदित्यत्र कृत्तरीत्या भाविशब्दस्य भूतकालत्वे भाव्यासीच्छब्दयोः पर्यायत्वाद्युगपत्प्रयोगो न स्यात् तस्माद्[illegible]वंत
कालं भावितया व्यवहृते· तद्धीदानीमासीदिति तत्रार्थः एवं सर्वसामंजस्ये किं सूत्रेणेति चेत् मैवं अध्याहारलक्षणाप्रयुक्तक्लेशं विनैव प्रायशो निर्वा
हार्थं सूत्रारंभात् नहि क्वचिदध्याहारादिकमंगत्वापततीति सर्वत्र तत्स्वीकर्त्तुमुचितमिति दिक् क्रियासमभिहारे अन्यदि लोट् इति षष्ठ्यंतेन तदादे
शात्तिङेलस्य पर न् वा च तध्वमोरिति वाक्यशेषात् तत्र हि तिङ् विशेषः स्थानित्वेनोपादीयते· तच्च पूर्वत्र लोट्शब्दस्य तिङ्परत्वे सत्येव संगच्छते अ
न्यथा सामान्याभिहितानां तिङां हिस्वाभ्यां वाधे सति तध्वमोरिति वाक्यशेषो निर्विषयः स्यात्· तथा सति तिङ्त्वासदत्वे लभ्यत इति गुणोप्यस्ति तथा
पि वहवोत्र दोषाः तथा हि· तिप्सिप्मिपां स्थाने विहितस्य हेः स्थानिवद्भावेन पित्वात् ङित्वाभावात् लुनीहीतीत्वं न स्यात् ब्रूहीति ब्रुव ईट् स्यात् तृण्
ति तृणहम् स्यात् किंच सर्वेषां तिङां द्वावपि हिस्वौ पर्यायेण स्यातां न तु पदव्यवस्थया अपि च· लोट्शब्दस्य तिङ् लक्षणाप्यन्याय्या असंजातविरो
धितया उपक्रमस्य प्राबल्यात् वाक्यशेषस्य विषयसमर्पकत्वाच्च तस्मात्त्रकारस्यैवादेशौ हिस्वौ न तु तिङामिति सिद्धांतः तदाह तस्य चेत्यादि
ना नन्वेवं द्वयोरपि लः परस्मैपदमिति परस्मैपदसंज्ञा स्यात्· ततश्च परस्मैपदिभ्य एव कर्त्तर्येव च द्वावपि स्यातामत आह· तौ चेति अयं भावः लोटो हि
स्वौ तिस्यत्र पूर्ववाक्यात्त्रो डिस नुवर्त्तते तच्च हिस्वाविस्यस्य विशेषणं न च हिस्वौ लोटौ भवत इति सामर्थ्यात्तद्धर्माणाविस्यर्थः संपद्यते तत्रापि मुख्यत्वे
ह संबंधिनो धर्मस्यातिदेशो व्यर्थः स्थानिवत्सूत्रेणैव लाभात् अतः स्थानिवद्भावलब्धलोडव्यपदेशौ तिङ्भूतौ यौ हिस्वौ तयोरेव धर्म इहातिदिश्यत राम·
इति सिद्धमिष्टं हिस्वविधानेति यदि हि पुरुषवचनसंज्ञे अपि स्यातां न हि पुरुषत्वसामानाधिकरण्ये एकत्वे च सत्येव हिस्वाभ्यां भाव्यं तत्र च यथाविधि ५५

तिप्रत्ययः समुच्चयेऽन्यतरस्यां प्रागुक्तमिति· लोट् तस्य च प्रसिद्धं हि स्वसदृशौ हिस्वौ तध्वमोर्विषये वेत्यर्थः यथाविध्यनुप्रयोगः पूर्वस्मिन्नित्यस्य यथार्थं समुच्च।
यविशेषस्य वक्ष्यमाणत्वात् यद्यपि संख्याकारकपुरुषकालविशेषाणां हिस्वाभ्यां तादृप्रतीतेस्तदभिव्यक्तिः समस्यन्यायत एवानुप्रयोगे लभ्यते· तथा।
विध्यर्थं वचनं तेन याहि याहीति यातीत्येवानुप्रयुज्यते न गच्छतीति करोतीति वा देवाच्य इति वार्त्तिकमिदं हरदत्तप्रक्रियायां व्याख्यातं यत्तु वदंति अ।
स्य वक्तव्यस्य भाष्येनाश्रितत्वादिति· तद्भ्रमसात् इतिशब्दस्त्विति· नु चते नैव व्यवधानाद्यातीत्यस्यानुप्रयोगत्वं कथमिति वाच्यं अनुशब्दस्येहानुवादि।
मात्रपरत्वात् व्यवहितविपरीतप्रयोगयोरिष्टापत्तेः एतच्च कैयटहरदत्तग्रंथयोः स्फुटं एतच्च भाष्यकारीयोदाहरणसूत्रप्रसंख्यानाभ्यां निर्णीय
ते भ्रममूलकमेवेति एतेन सक्तून्पिबेत्याद्युदाहृत्य यदुक्तं प्राचा लोडभावपक्षे लडादि पुनः पुनः पिबति पुनः पुनः खादतीत्यभ्यवहरतीत्यादीति तद
पि भ्रममूलकमेवेति ध्वनितं· तथा हि पुनः पुनरित्यधिकावापः पूर्वत्रापि तद्विवक्षायां द्वित्वाद्यापत्तेः किंच लोडभावपक्षे प्रक्रम्य अभ्यवहरतीत्यनुप्र
योगस्य हि स्वां वयो विहितस्यापन्यसनं कथं संगच्छतां कथं वोपयुज्यतां कालकारकसंख्यानां लटैवाभिव्यक्तत्वादिति दिक् भ्रम एवेति पुरुषांशे वा।
चनांशे चेति भावः एवं च पुरीमवस्कंदेत्यादौ तिङंतत्वं यथा पथं प[illegible]त्मनेपदांतत्वं च सिद्धांते स्थितं· पुरुषवचनसंज्ञे तु न स्त एवेति सर्वं सु।
सिद्धिः इति लकारार्थप्रक्रिया· इति भट्टोजिदीक्षितविरचितायां सिद्धांतकौमुदीव्याख्यायां प्रौढमनोरमायां तिङंतकांडं समाप्तं ॥ ॥ धातोः यद्य
पि धातोरेकाचो हलादेरिति सूत्राद्धातोरित्यनुवर्त्तत एव तथापि आर्द्धधातुकसंज्ञायाः आश्रितशब्दव्यापारत्वलाभाय पुनर्धात्वनुग्रहणं अन्यथा लूभ्यां
पूभ्यामित्यादौ इडुणौ स्यातां धातोर्विहितत्वेन भ्यामादेरार्द्धधातुकत्वात् सिद्धांते तु धातोरित्येवमविधानान्नेति दिक् ण्वुलः प्रागिति अर्हे कृत्यतृ।
चश्चेति सूत्रे कृत्साद्दस्येव वक्तव्ये तृजग्रहणं योगापेक्षं ज्ञापकं ण्वुल्तृचावित्येतस्माद्योगात् प्रागेव कृत्साद्दस्यधिकारस्येति भावः वृत्तिकारस्तु सूत्रे प्राड्
ण्वुल इति प्रविक्षेपके लिमर इति· कृत्याः इति बहुवचनेनेदं सूच्यते ककारो गुणवृद्धिनिषेधार्थः रेफः स्वरार्थः कृत्सचः उपसर्गादित्यनुवर्त्तते रषाभ्यां

म·ति· मितिच· तत्रतास्थ्यात्राछदम मित्याह उपसर्गस्थादितियकेतिन चाङ्ग्रावायेपीतिभविष्यतीतिवाच्यं रषाभ्यांपरस्यनस्येसंज्ञोनिर्दिष्टग्रहणमापितस्याव्य
५६ वधानस्यव्यवायेपीतियोगविभागेनवाधेसति आदर्शेनेस्यादावतिप्रसंगेप्राप्ते अट्कुप्वाङ्नुम्भिरिस्ये शोनियमार्थः आङ·तिपदव्यवायेपीतिनिषेधं
वाधितुमितिस्थितं· इहतुणपतक्कतोरव्यवधानस्यापेक्षा कथमङ्ग्रहणेनवाध्येतेतिभावः हलश्चेजुपधात् इजुपधस्यहलंतस्य भिचारणतहलइस
नेनतदादित्वंलभ्यतेइत्याहहलादेरिति इजादेःसनुमः इहहलइत्यनुवृत्तंतदंतपरंनतुतदादिपरंइजादेर्हलादित्वासंभवात् तदाह हलंतादिति·वि
हितइति यदितुविहितविशेषणंनव्याख्यायेततर्हि नियमार्थतानलभ्येतणिज्लोपेकृतेहलंतात्परत्वेनणेर्विभाषेतिविकल्पेवाधितुंविधेःसंभवा
दितिभावः नुमूग्रहणमिति तेनास्यग्रेन्वनमित्यादौविध्यर्थतात्त्वितिनशंक्यमितिभावः वानिंस· कृतिपरइति· तिङंतोदाहरणंतुमाचः मामादि
क्रमित्यवोच्चम एपिक्रमादीनामिति एषंतस्यप्रकृत्यंतरत्वादप्राप्तेवचनं यत्तुवदंति हेरचङीतिसूत्रे ऽचङीतिपर्युदासेनप्रकृतिग्रहणेण्यधिकस्या
पिग्रहणमितिज्ञापनादेतत्सिद्धमितितद्भ्रमात् ज्ञापनंकुत्वमात्रविषयकमितिभाष्यादौसिद्धांतितत्वात् अचोयत् शक्यमकर्तुमिति यत्तुव
दंति अजंतभूतपूर्वादपियथास्यादित्येतदर्थमज्ग्रहणंतेनदित्स्यंधित्स्यंइत्यत्रयतिकृतेयतोनावइत्याद्युदात्तत्वंसिध्यतीति तदापाततः आर्द्ध।
धातुकेविवक्षितेयद्यतोलोपःस्यात्तदाहीदंसंभवेत् लोपस्त्वार्द्धधातुकपरएवोचितः अन्यथापरनिमित्तत्वाभावेनस्थानिवत्वाभावेगणायतोत्सा
दौउपधावृद्धिप्रसंगादितिभावः तकिशसीति शसुहिंसायां यत्तुकेचित्कसिंसानुस्वारंपठंतितन्न·ईडवंदवृशंसदुहांण्यतः इतिसूत्रविरोधात् नानु
वंधेति· अनुवंधानामनेकांतत्वात् एकांतत्वपक्षेपिददातिदधात्योर्विभाषेतिविभाषाग्रहणाल्लिंगादितिभावः आलंभ्यागोरिति· समासांतो
दात्तत्वंवाधित्वाकृदुत्तरपदप्रकृतिस्वरः तत्रण्यतितित्स्वरोवतिष्ठते· यतितुयतोनावइत्याद्युदात्तःप्रसज्येत उपात्प्रशंसायां प्रशंसेहगम्यमानत राम·
याविशेषणं धात्वर्थस्तुप्राप्तिरेव तेनयस्ययस्माद्धाप्राप्तिः प्रशंसाहेतुः तदिहोदाहरणं विपरीतंतुप्रत्युदाहरणं अत्रापियद्दौप्रत्ययेविवक्षितेइ। ५६

नि[?]र्वे वर्वेवसूत्रार्थः तेनएयति कृते ऽन्तस्वरितत्वं · प्राचातुयतिपर इति व्याख्यातं तदाकरविरोधादुपेक्ष्यं गदमदः व्यत्ययेन पंचम्यर्थे सप्तमी · एभ्योऽनु
प[?]र्गेभ्यो यस्मात् अनुपसर्गे किं न नैषधे कार्य्यमिदं निगाद्यं यमेरिति पूर्वेणैव सिद्धेरिति भावः नियमे साधुरिति · यमः समुपनिविषु चेति वैकल्
ये ऽपि पितद्वितीयादिरस्य र्थः पद्यप्यस्मिन्नस्ये कृत्यानां कर्त्तरीत्यस्याप्रवृत्तेः कर्त्तरित्तृतीयादुर्लभा कर्तृकर्मणोः कृतीति षष्ठ्या दुर्वारत्वात् तथापि।
त्वपेतितेनेतिच करणत्वविवक्षयातृतीयावोध्या · यद्वा · यमोऽपरिवेषणेमिदिति मतमाश्रित्य सपर्य्येवमितं नियमपन्नित्यादाविव मितत्वं स्वीकृ
त्यएयं तादृतृवोध्यः अथवा एयस्यैव संज्ञापूर्वकत्वान्न वृद्धिरिति दिक् · एवं च वार्त्तिकप्रयोगेण्यन्यथासिद्धतया निपूर्वाद्यतं ज्ञापयितुं न प्रभवतीति
भावः सुत्यहमिति · यद्यपि प्रणितव्यशब्दोऽर्थद्वयसाधारणस्तथापि पएयशब्दस्य व्यवहर्त्तव्य एव रूढत्वात् अर्थनियमो लभ्यते एतदर्थमेव बहि
२ निपातनमाश्रितं यदाहुः धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च अनुबंधविकाराणां रूढ्यर्थं च निपातनमिति शत्तेनेति शतशब्दोऽनियतपरः क्व
त्याश्चावरत्वेन प्रसिद्धेणां नियमो नास्तीत्यर्थः वृङ इति · अनिरोधरूपस्यार्थस्य संभक्तिवाचिन्येव सौष्ठवादिदं लभ्यते इत्याहुः अनिरोधे ऽपि स्यात्तु क्तो
नुवृत्तोऽपि स्यादिति ध्वनयन्नाह वृत्येति एति स्तुशास्वृ इत्यादिना वृञः क्यप् इह सूत्रे अवद्यादीनि निर्विभक्तिकानि न तु ढंढः तेन वर्य्येति स्त्रियामे
व निपात्यते · अस्त्रियां तु वृङः ऋहलोरिति एयत् वार्या ऋत्विजः इति वृत्तिकारमतं न चात्र एति स्त्विति क्यप् शंक्यः तत्र वृञ एव ग्रहणं न तु वृङ इति सि
द्धांतात् भट्टिस्तु ढंढः स्त्र समानिर्देशं मन्वानः पुल्लिंगेऽपि यतमप्रायुंक्त सुग्रीवो मम वर्य्योसाविति उपसर्य्या · प्रजननं प्रजनः गर्भग्रहणं कालः प्राप्तोऽस्याः का
त्यात दस्य प्राप्तमिति वर्त्तमाने कालायलिति एयत् अध्याहार्य्यमिति यदि तु अजर्य्यशब्दस्यैव योगरूढिरिष्यते तर्हि भट्टिप्रयोगेषु न रूढः स्यात् इति
भावः मृगैरजर्य्यमिति कालिदासप्रयोगे ऽजर्य्यशब्दस्य जरणाभावविशिष्टसंगते ऽजहत्स्वार्थलक्षणापि स्तुवचा सर्वथापि संगतत्वेन रूपेण वाच्यतानास्तीत्य
तासर्य्यम् अतएव भाष्ये संगतं चेत्कर्त्तृ इति व्याख्यातमितिभावः भावग्रहणमुत्तरार्थमिति भाष्यस्य स्वरसमनुरुंधानानां मतमाह कर्मणीति एति।

म॰ नि॰ ...एभ्य इति सुप्यनुपसर्गाभावइति सर्वं निरुक्तमिति भावः इसइति॰ कथं तर्हि उपेयमिति ईङोदेवादिकाद्यत् नहृङ इति ईङ् वंदेमित्याप्रकात् तत्रहि ईङिवं दि।
५७ सा साहचर्यादात्मनेपदिनो ग्रहणमिति भावः परस्यापीति॰ ओरावश्यक इति प्राप्तस्य आङ्पूर्वादिति नेत्वैवमाज्यं किमासीदित्सत्रावग्रहः स्यादितिका
च्यम् ऋत्विज पूर्वैभिरित्यादावविवसस्यप्यवांतरपदत्वे संप्रदायानुरोधेन क्वचित्तद्करणात् यत्तु प्राचा ऽजगताविस्य स्याज्यमित्युक्तं तद्भाष्यादिविरोधा
दर्थानुगमाच्चोपेक्ष्यं अनिसेति इह च तपरकरणं लिंगमिति भावः ईचे खनः ह्रस्वः सुपठ इति दीर्घपठ तस्सूत्रकृतस्त्व समाशयः इङ् इति मध्यलोपे णाद्धि
तो यङ्कारो ये विभाषेत्यात्वं बाधितुं विधीयते अन्यथा ये विभाषेत्यस्यावकाशः खायते॰ खन्यते॰ इत्वस्यावकाशः यस्मिन्पक्षे आत्वं नास्ति आत्वपक्षे
तु मयप्रसमेपरत्वादंतरंगत्वाच्चात्वं स्यात् ये विभाषेत्यत्र हि ये इति विपयसप्तमी तेन यकारादौ बुद्धिस्थे एव प्राप्तमात्वमन्तरंगं॰ इकारस्तु कपा सह विधानाद्ब।
हिरंग इति॰ दीर्घप्रसं[illegible]णस्य माष्यकृतस्त्वयं भावः इत्वमन्तरंगं क्यप्सन्नियोगशिष्टत्वात् आत्वं तु बहिरंगं य इति परसप्तम्याश्रयणात् एवं च इ
त्वेनात्वबाधोऽन्याय्य एव न च ह्रस्वादेशे ह्रस्वस्यापि तीति तुक्प्रसंगः आङुणस्य षत्वं तु को ऽरित्यसिद्धत्वादिति वाच्य पदांतपदाद्योरेकादेशो ऽसिद्धो न त्व
भ्यो पीति सिद्धांतात् अन्यथा वृक्षे छत्रमित्यत्र ह्रस्वाश्रयो नित्यस्तुक् स्यात् इष्यते तु दीर्घात्सदान्तादिति वैकल्पि—— क इति दिक् विमर्त्तेः क्यपो ऽप्रसं
गे बीजमाह॰ तदनुबंधेति राजसूयः यद्वेति राजानं क्रीणंतीत्यादौ तथा दर्शनादिति भावः ह्रूक्यर्थे निपातनं तेनाद्य पुंसो ऽश्वमेधादौ द्वितीये ज्योतिष्टोमा
भि चनाति प्रसंगः उत्वमिति॰ तस्य रपरत्वाद्धलि चेति दीर्घ इति भावः नित्यं क्यपि विति तेन यत्सस्य योनेति भावः भिद्योद्ध्यौ क्यपि विति कर्त्तरीति शेषः पापमिति
वेति॰ तपोनकल्कोध्ययनं न कल्क इत्युपक्रम्यतान्येव भावो पहतानि कल्क इति भारते दर्शनात् कल्कः पापाशये पापे दंभे विष्किद्वयोरपीति कोशाच्च
ति भावः वक्तव्यमिति॰ वृत्तिकृतानुसूत्रे प्रक्षिप्तं क्यप उदाहरणं तु॰ मत्तस्य न प्रतिगृह्यं तस्मान्नापि गृह्य लोके त्विति॰ णय देवेति भावः पदास्वैरि॰ अव
गृह्यमिति॰ अवग्रहो विच्छेदः अवांतरपदसंज्ञासूचयितुं पदपाठकाले किंचित्कालमवसानं प्रग्रहस्तु॰ प्रकृतिभावाद्यणाद्यभावे परस्य म चोर राम॰ ५७

सन्निकर्षे स्यवगृह्यमगृह्यशब्दौ प्रातिशाख्यादिषु पदविशेषपरतया निरूढौ गृह्यकाः इति · गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाः स्युरितेर्य्यमरः अत्रे वाह
नमिति पतेस्यनेनेस्यर्थे दाम्नीशसेत्यादिना करणे ष्ट्रन् युग्यो गौरिति · यद्यपि तद्वहति रथयुगप्रासंगमिति तद्धितेनापीदं सिद्ध्यति तथापि एयतं व्यावर्त्तयि
तुं सूत्रे · अन्यथा हि योग्यो गौरिति स्यात् · वृद्धोऽस्य सामिति · तेन अमावास्या या वेति विहितस्तद्धितो ह्रस्वपक्षेपि सिध्यति यदि तु यत्ससस्य यान्तस्येदं यासि
कं निपातनमाश्रीयेत तदा पतामुक्तेऽधिकरणे एयदेवता वद्दुर्लभः अथापि बाहुलकात्स्वभ्यस्त एवमपि एयदंतमनूद्य विहितस्तद्धितो यदंतान्नस्या
दितिदिक् · ऋहलोः पंचम्यर्थे षष्ठी ऋदिति न अत्रे ग्रहणं किंतु वर्णमात्रस्य हलासाहचर्यात् परं कार्य्यमिति निर्देशात् ईडवंदेत्यादि लिंगाच्च लपि दृभि
भ्यां चेति पोरदुपधादिति प्राप्तस्य यतोपवादः जयादिस्त्वसुत्रासुपुवयीति सूत्रे लपि रपे हपी प्रक्षिप्य अनुक्तसमुच्चयार्थेन चकारेण दभेः संग्र
हमाह तत्र वैरूप्यं निर्वीजिम् भाष्यादि विरोधश्च स्पष्ट एवेति बोध्यं स्वीकार्य्य इति चलं पादिवदिति भावः तथा च प्रयुज्यते —— नतानशंतिनद
भावितम्[illegible] विल्लुर्ग्राम्या अदाभ्य इत्यादि ओरावश्यके अवश्यभाव आवश्यकं मनोज्ञादित्वाद्वुञ् अव्ययानां भमात्रे इति टिलोपः लाव्यमिति के
चित्तु द्योतितार्थस्यापि प्रयोगो दृश्यते लाघवं प्रस्तनादरात् · अवश्यलाव्यं अत्रोपपदसमासासंभवेपि मयूरव्यंसकादेराकृतिगणत्वात्समासः युमि
अण् इति युत्र् बंधन इति तु न गृह्यते सानुबंधकत्वादिति भावः वैश्यकुलादेरिति दक्षिणाग्नेर्हियोनिर्विकल्प्यते · वैश्यकुलाद्वित्तवतः भ्राष्ट्राद्वा गार्हपत्याद्वेति प्र
णा · कर्मव्यापार इति · वस्तुतस्तु सम्मतिः प्रीतिः सा यस्मिन् चौरादौ नास्ति लोकानां सोऽसंमतिः यद्वा · सम्मतिर्यस्य विषयेषु नास्ति स विरक्तोऽसम्मतिः तत्रे णार्थ इ
ष्यमपि गृह्यते पाय्यसान्नाय्य · मीयते नेनेति · माङः करणे एयत् · मेयम्यत् · धीयतेनयेति अत्र च सर्वासामिधेनीन धाय्या किंतु समिध्यमानवतीं समिद्धवतीं
चांतरेणा विकृतिषु प्रक्षिप्यमाणा [illegible] धुपा जातवेदसं [illegible] इत्यादिकैव · सूत्रे सामिधेनी ग्रहणं प्रयोगविषयोपलक्षणार्थं [illegible] सामिधेन्यामपि दृश्यते · ।।
धाय्याः शंसनीति न हि शंस्त्रेण समित्सिध्यते · ऋतौ कुंड पाय्य इति · पिबतेरधिकरणे यत् स्य योयुगागमश्चनेतु एयत् · त्तित्व [illegible] ततोनाव इत्याद्युदात्तः ।

उ:

म·ति· कृदुत्तरपदप्रकृतिस्वरः तथा च प्रयुज्यते· प्रणाय्यात्कुंडपाय्य इति सम्पूर्वाच्चिनोतेस्तु ण्यदायौ निपात्येते क्रतौ किं कुण्डपानं संचेयः अग्नेरुपरि अग्निरि

५८ हनज्वलनः किंतु तद्धारणार्थं इष्टकाचयनेन निर्मितं स्थलं· तस्मिन्नभिधेये परि पूर्वादुपपूर्वाच्च चिनोतेर्ण्यत् आयादेशश्च संपूर्वस्य वंहस्तु संमसार

णादीर्घश्च निपात्यते चित्योग्निरिति चिनोतेः कर्मणि क्यप् यतोपवादः इह सूत्रे अग्नाविस्यनुवर्त्तते· तच्च चित्यशब्दस्यैव विशेषणं नाद्धितीयस्य· तस्य

भावार्थकत्वेनाग्निवाचकत्वासंभवात् अग्नेरन्यत्र तु चेयमित्येवं क्तल्युडिति हसितं· हसनं· छात्रस्य अत्र क्तल्युटो विषयेन पुंसके भावे घञ्न इत्

तिभोक्तुं अत्र इच्छार्थेषु लिङ्लोटाविति लोपन लिङ् तु भवत्येव· लिङ्चेति वचनात् ईषत्पानः आतो युच् अत्र खलन· शकि लिङ् च· लाघवादिति· इह

हि· चकारमात्रेणावासरूपविधेरनित्यता ज्ञापयितुं शक्या इत स्त्रत्तु कृत्यग्रहणेन कृत्यतृज्ग्रहणेन च ज्ञापने प्रैम्‌ खमिति भावः इति कृत्यप्रक्रिया एवु

लनृचौ चकारस्तु [illegible]सितु ऋ्छिमे यः सुइत्यत्र सामान्यग्रहणाविघातार्थः नेष्टानशितेति रधादिभ्यश्चेति वेट् प्रकं तेति· प्रोपाभ्यां समर्थाभ्यामिति क्रमेण

त्मनेपदविषयता· अहन्नोपस्येति· यत्तु प्राचोक्तं न धातुलोपे इत्यत्र इकइत्यनुवृत्तेः पापाचक इति तन्न· यङंते अह्नोपस्य स्थानिवत्वात्· यङ्लुगंते तु न धा

तुलोपे इति निषेधस्याप्रसक्तत्वादिति प्रागेव प्रपंचितम् जारभरेति· जारं बिभर्त्तीति विग्रहः श्वपाकोपीति· कर्मण्यपणि पि यह्त्र भवतीति भावः चेक्रिय इति·।

संयोगपूर्वकत्वाभ्ययण् लोलुव इति· उवङ्ग्यणस्तु न· ओः सुपी सुक्तेरिह च सुबभावात् पाघ्राध्मा· इह सूत्रे उपसर्ग इति केचिदनुवर्त्तयंति तद्भूनाम संमतं

तथा च श्रीहर्षः फलानि धूमस्य धयानिति· श्रूयते च पदापश्यः पश्यते हृकाक्नवर्णामिति· अनुपसर्गात्लिंपइह लिंपविंदेति भाविना नुमा सहितो निर्दिष्टोतेन।

धाभार्थस्यैव विदेर्ग्रहणं न तु सत्ताद्यर्थानाम् धारय इति धृञ् धारणे· धृङ् अवस्थाने णंतयोर्द्वयोरपि ग्रहणं अथ कथं नमस्य मत्रोत्तरधारयस्यते इति श्री

हर्षः परलाद्धिकर्मण्ययणाभाव्यं सूत्रधारादिषु यथा· तथा च वार्त्तिकम् अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेनेति सत्यं कर्मणः शेषत्वविवक्षाया

माणोः [illegible]स्यां शेकृते शेषषष्ठ्यं तेन समासो भविष्यति वेदप इति· विदचेतनाख्यानादिषु चुरादिः ज्ञानाद्यर्थानामन्यतमो वा हेतुं प्रापंतः इहोदाहरणेषु लि। ५८

पिविदिभ्यां मुदादिभ्यः शः शे मुचादीनामिति नुम् धार्यादिभ्यः शप् गुणायादेशौ अरविंदमिति चक्रस्य नाभिनेम्योरंतराले स्थितानि कीलानि अराः तद्वदाकाराणि
दलानि तत्सादृश्यादराः तान् विंदति लभत इत्यर्थः कर्मण्यणो वाधनायेदम् ददाति दधात्योर्विभाषा ननु ददाने दध धारणे आभ्यामस्विदंदादध इतिर्दाधाभ्वां
णो दयोर्धाप इति च सिद्धम् सत्यं स्वार्थमिदं सूत्रं अददः अदधः इह हि अव्ययपूर्वपदप्रकृतिस्वर इष्यते अजं तत्वे तु अच्कावशक्ताविति अंतोदात्तत्वं स्यात्
श्यासुधा अनुपसर्गादिति निवृत्तं उत्तरसूत्रे पुनरनुपसर्गग्रहणात् एवं च तत्संबद्धं विभाषाग्रहणमपि निवर्त्तते तेन दाह नित्यमिति ग्रेपेङ इति इह हि शीङो
यणादेशेन तथा अततेः अक्षुब्धांतानां वापति प्रभृतीनां अकारांतानां वा न ग्रहणं व्याख्यानादिति भावः स्नुगतौ विति प्राचा तु सूत्रे आश्रुसंश्रुविति तालव्यं पठित्वा
प्रणो ति हृ दाह तस्तदनाकरम् तथा च प्रयुंजते अनाश्रवाः किमहमिति अमरोप्याह वचने स्थित आश्रवः दाव इति दवदावौ वनारण्यवन्ही इत्यमरः गे
हे कः गेह इति मत्सपार्थस्य कर्तृविशेषणानोपपदं गृहपतिना संयुक्तेन्य इति निर्देशादित्यभिप्रेत्याह गेहे कर्त्तरीति एतत्सूत्रं शक्यमकर्तुं गृहूग्रहणादिति भ्वा
दिस्तिपुष्यवलक्ष्मोःक्प्रत्यये कृते गृहशब्दस्य सिद्धेः भाष्यमते त्विति तथा च षष्ठे रजकरजनरजः सूपसंख्यानमिति वार्त्तिकं प्रत्याख्यातं भाष्यकृतोक्तं कितए
ते अणादिका इति गस्थकन् गामादाग्रहणेष्वविशेषेति गेशब्द इति गृह्यते न तु गाङ् गताविति गाथकशब्दस्य गायत्यर्थे विषयक शिल्पिन्येव निरूढत्वा
दित्याकारः तदाह गायते रिति जहा सुदकमिति उदकादधिकं दहनात् प्रसृत्वः लक्ष्यत इति भूयः सहचारात् यो हि यां क्रियां पुनः पुनरनुतिष्ठति स तत्र
प्रावीण्यं कौशलं लभते तेन सकृदपि यः सुष्टु करोति तत्र वुन् बहुशोपि दुष्टं कुर्वती नेति भावः कर्मण्यण् कुंभकार इति अणि कृते कर्तृकर्मणोः कृतीति षष्ठ्यंत
स्य कुंभशब्दस्य कारशब्देन समासः ह्वावामश्च ह्वापवार इति आतोनुपसर्गे क इति प्राप्ते बाधा माङ् मेङो रिह ग्रहणं [illegible] स्य अकर्मकत्वा
गोसंदाय इति अण् युक् ब्रह्मज्य इति कप्रत्यये हि सति संप्रसारणे पूर्वरूपत्वे च कृते [illegible] ब्रह्मज्य इति स्यात् न च [illegible] इति यण् अंगस्येकाच्
त्वात् आरंभसामर्थ्यादिति कर्त्तरि पूर्वेणैव सिद्धे इह कर्त्तरि कृतादिति [illegible] अनिर्दिष्टार्थाश्च स्वार्थे धातोः [illegible] वंघञर्थे कविधा

नमित्यनेन गतार्थतेति चेन्न· वार्त्तिकं दृष्ट्वा सूत्रकृतो प्रवृत्तेः किंच· नित्यसमासार्थमिदं अत एव सुडं तेनास्वपदविग्रहमाह आखूनामुत्थानमिति· नन्वेवं घ
अर्थे विधानं स्यात्तथा च कथमिह निपुण्यर्थमिति वार्त्तिके स्याग्रहणं व्यर्थं स्यादिति चेन्नैवं अकर्त्तरि च कारके चरितार्थत्वात् इह प्राचा आखूत्थं वर्त्तत इति नपुं
सं कं पठितं तत्सौत्रेण च तथैवाभिनिवेशेन व्याख्यातं तदुपेक्ष्यं भाष्यादौ सर्वत्र पुल्लिंगस्यैवोदाहृतत्वात्· स्नुः कर्त्तरीमनिज्भावे कः किघोः प्रादितोन्यतः इ
त्यमरकोशे भावे कस्य पुंस्त्वविधानात्· भावेनणकचिद्भ्योन्य इति नपुंसकविधाने कस्य पर्युदासाच्चेति दिक्· अंबाम्ब· कप्रत्ययांतस्येति तेन भूमिस्थितं
गोस्थानमित्यादौ नेति भावः यत्तु प्राचा स्थः सत्येति व्याख्यातं तदाकरविरुद्धं कप्रत्ययांतस्येत्यध्याहृत्य वा व्याख्येयं द्विष्ठः त्रिष्ठ इति· एवं अम्बष्ठः आ
म्बष्ठः गोष्ठः भूमिष्ठः सव्यष्ठः अपष्ठः कुष्ठः इत्यादि तुंदपरिमृज इति अत्र मृजेरजादाविति पाक्षिकी वृद्धिः प्राप्ता व्यवस्थितविभाषयानेत्येके स्यादेवेत्य
न्ये· आदन्यत्विन्नित्रि· अनुपसर्गग्रहणेन प्रेन पर्युदस्यते सूत्रे विशिष्योपात्तत्वात् इति भावः गोसंख्य इति· गाः संचष्टे इति विग्रहः ख्याप्रकथन इत्य
स्य तु संपूर्वस्य प्रयोगो नास्तीति न्यासकारः सार्वधातुकमात्रविषयो सौ धातुरिति चावोचाम गापोष्टक् गायते रेव ग्रहणं न तु गाङ् गतौ गा स्तुता वित्यनयोः
अनभिधानात् पिबतेरिति· लुग्विकरणालुग्विकरणपरिभाषालभ्यार्थकथनं उपपदपरिगणनं तु वाचनिकमेव· कवचहर इति· कवचोद्यमनं क्रि
यमाणं संभाव्यमानं वा वयो गमयतीति तेनास्त्यपि कवचग्रहणे कवचहर इति भवत्येव हस्तिसूचकयोरिति· अन्यत्र तु सत्वेरन्ता· कर्णेजपिताशमिधाते
शमि उपपदे धातुमात्रात् संज्ञायां अचु स्यात् भिक्षांचरतीति· चरतिरत्र चरणपूर्वके जने वर्त्तते चरणेन भिक्षामर्जयतीत्यर्थः सेनाचर इति· सेनां चरति प्रवि
शतीत्यर्थः· पचादिष्विति टविधानं तु नित्यसमासार्थम् इति वार्त्तिकमिति· केयरं हरदत्तादिरीत्योक्तं· माधवस्तु इष्टिरियमित्याह· पत्त्वादिति· यत्तु न्यासकृतो
क्तं हेत्वादिषु तु पूर्वसूत्रेण ट एव भवति· तेन किंकरीत्युपपन्नमिति· तन्न· पूर्वविप्रतिषेधस्य निर्मूलत्वादिति भावः यदपीह किं यत्तद्बहुषु कृञो ति प्राचा प।
ठितं तत्रा किं किंस्यात्क्रियाकरविरुद्धा अयुक्ता च कर्मण्यणापि प्रसंगात् न चाजभावे दिवाविभेत्तिर इति वाच्यम् सूत्रे किमादिग्रहणस्य पनयनस्य हरदत्तादिभि

हृत्वा लुप्यत्तु परिष्कुर्वेति हेत्वाद्यभावेऽच हेत्वादौ टः एवं च भिन्नविषयेणाचाऽस्य बाधासंभवादुभयमपि भवतीत्याशयेनाचार्यैरेवं सुपनिबद्धमिति ॥ अत्रे
दं वक्तव्यम् अन्विधौ हेत्वाद्यभाव इति विशेषणं न तावन्मुनित्रयेणादत्तं येन भिन्नविषयत्वं स्यात् पूर्वविप्रतिषेधस्तु निर्मूल इत्युक्तमेव ॥ अत एव पुंयो।
गादन्यत्र किंकरीत्यसाधुरेवेति कैय्यटहरदत्तादयः तस्मान्नैवं प्राचो ग्रंथस्य निर्वाहः यदि तु तन्निर्वाहे आग्रहः तर्ह्यस्य मुक्तिसंभवः वृत्तौ हि कविदुक्त
कं पठ्यते ॥ अथवा पचादिपाठः करिष्यत इति ॥ इह किमादिग्रहणमपनीय पचादिष्वेव किंयत्तद्बहुषु कृञ इति पाठ्यं वार्त्तिकमपीत्थमेव नेयमिति तस्या
शयः अस्मिन्पक्षे कर्मण्यणं बाधित्वा चरितार्थमिदं वचनं हेत्वादिविवक्षायां परत्वाट्टेन बाध्यते तेन पुंयोगं विनापि किंकरी स्यादेव ॥ व्याख्यानांतरे तु नेत्युक्त
मेव एवं च विषयविशेषे व्याख्याभेदात्फलितं विकल्पमाश्रित्य प्राचा एवं त्युक्तमिति सहृदयैराकलनीयम् कर्मणि भृतौ कर्मानुवृत्तौ पुनः कर्मग्रहण
त्स्वरूपपरतेत्याह ॥ कर्मशब्द इति अर्हद्विंषत वर्णग्रहणेन तदंतविधेः सिद्धावप्यंतग्रहणं शुनिधय इत्यादौ ह्रस्वकृते मुमर्थम् तथा हि ॥ अंत
शब्दः समीपपरः अत्यासांवंतश्चेति विग्रहः समीपः खित्यनव्ययस्येति सूत्रे विहितो योऽवृत् तदंतस्य मुम् इति व्याख्यायते एवं च जनमेजय इत्यादौ स्व
तो ह्रस्वेपि मुम् सिद्धये प्रथमं खित्तोति ह्रस्वः प्रवर्तनीयः इत्यवधेयम् शर्द्धंजहा इति शर्द्धं शर्द्धः पृथुशब्दकुत्सायां घञ् यत्तु प्राचो ग्रंथं व्याचक्षाणेन ह
त्तं आकरे तु वातशुनीतिलशर्द्धेष्विति पठित्वा शर्द्धंजह इत्युदाहृतमिति तदप्यमात् भाष्यवृत्त्यादिषु सर्वत्र तालव्यादिपाठस्यैव दृश्यमानत्वात् शर्द्धो पा
नशब्द इति माधवादिभिर्विवृतत्वात् दुर्गसिंहादिग्रंथेपि तथैव दर्शनाच्चेति दिक् यथासंख्यं वाऽपि तु माह ॥ अत्रेति ॥ घेटष्टित्वादिति अवयवेऽचरिता
र्थत्वादिति भावः खश्प्रत्ययांतादेव घेटो ङीविष्टो नान्यत इति वर्द्धमानसीरस्वामिहरदत्तादयः तेन पा[illegible]ति [illegible] आतोनुपसर्गे क इति कप्रत्ययेऽपि च
यथैव ॥ अत्र च संप्रदाय एव शरणम् नाडीमुष्ट्योश्च ॥ यथासंख्यमनेति एतच्चेहैव भाष्ये [illegible] स्थितं यत्तु यथासंख्यमिति सूत्रे नाडीमुष्ट्योरित्युदाहृतं भा।
ष्ये तत्स्वातिमात्राभिप्रायेणेति बोध्यम् उदि कूले ॥ ननु कूलस्यैव उत्कर्षस्यापि स समं तत्रा[illegible] उपपदत्वं स्यात् [illegible] जिवहिभ्यां सह यथासंख्यं स्या

दिति चेन्न· एवं हि मतिलाघवाद् उत्कूलपोस्त्येव ब्रूयात्· नाडीमुष्ट्योरितिवत् तस्माद् द्रीति पंचम्याः स्थाने सप्तमी हृ[illegible]होरिति तु पंचम्याः स्थाने षष्ठी एतच्च य
थासंख्यसूत्रे कैयटे स्पष्टं· किंच· रुजेः सकर्मकत्वात् कर्मणि सुप्युपतिष्ठते तेन कूलं विशेष्यते नोच्छब्दो ऽसत्त्ववाचित्वेनासंभवात् तदेतदाह उत्कूलाभ्यामि
त्यादिना· अरुंतुद इति· अरुंतुदं तु मर्मस्पृक् इत्यमरः व्रणोऽस्त्रियामीर्ममरुरिति च· असूर्यंपश्या इति गुप्तिपरं चेदं· पदपरिहार्ये दर्शने सूर्यमपि न प
श्यंति· सत्यपि सूर्यदर्शने प्रयोगो भवत्येव· यदा तु सूर्यदर्शनाभावमात्रं सूर्येतरस्य चंद्रादेर्दर्शनं वा विवक्षितं तदा खश् न भवति अनभिधानात् प्रि
यवशे खशि प्रकृते प्रत्ययांतरकरणमुत्तरार्थम्· द्विषंतप इत्यत्र ह्रस्वणिलोपौ यथास्यातां शब्मा भूत् नन्वेवमुत्तरत्रैव क्रियतामिति चेत्सत्यं· इह
करणादन्यत्रापि क्वचित् तदेतद् वृत्तिकृन्मुखेनाह गमेरिति· असंज्ञार्थमिति· संज्ञायां तु गमश्चेति सूत्रेण सिद्धमिति भावः वाचंयमपुरंदरौ च अमंता
त्वमिति· अत्र हरदत्तः खच्प्रत्ययोऽप्यनेनैवास्तु न चैवं वाचंयम इत्यस्य व्रतविषयता न लभ्येतेति वाच्यम् निपातनबलादेव तल्लाभसंभवात् अथवा
वाचंयमो व्रते· पुरंदरश्चेति सूत्र्यतां· सर्वथापि वाचियमो व्रत इति सूत्रं पूःसर्वयोरित्यत्र पुरि दारेरित्संशश्च त्यज्यतां इति पूःसर्वयोः दृ विदारणे· अयमे
व गृह्यते· ननु दृ भये दृङ् आदरे इत्येतावितिसंप्रदायः आशितंभव इति· यावता ओदनेन अतिथ्यादिर्भोजितो भवति स एवमुच्यते· इह वासरूपविधि
ना ल्युडपि आशितंभवनः आशितंभवनम् सरूपत्वात्तु घञ्बाध्यत एवेति प्रांचः यत्तु वदंति क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नेति निषेधात् ल्युड्यु
क्त इति अत्रेदं वक्तव्यं यत्र घञादेर्बाधकत्वेन क्तल्युडादयः प्रसक्तास्तत्रनिसंबाधो न तु विकल्पेनेति तस्यार्थः इह तु ल्युटोऽपवादः खच् तत्र वासरूपन्यायो नि
र्बाध एव अत एवेह जयादिस्थेन ल्युडुदाहृतः इत्यास्तां तावत् संज्ञायां भृ· विश्वंभरः कैटभजित् रसा विश्वंभरा स्थिरेत्यमरः व्युत्पत्तिमात्रमिति· तत्फलं तु स्वरा
वग्रहौ· स्पष्टं[illegible]माजभारावशिष्टः इह हि कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तमधीयते रथमित्यवग्रहं तु तिव अखंडत्वे तु न विंध्य एव स्यात्युदात्तः निरवग्र
हत्वाच्च स्पष्ट[illegible] इत्युक्तमिति· माधवाद्यनुरोधेनेत्यर्थः मतांतरे त्विति हरदत्तादिमते इत्यर्थः चित्तेन्द्रिययोर्व्यापारोपरमरूपौ शमदमौ क्विप्सादिवेदं तत्र ग्रंथः

अहानुकल्लुःगमेश्च॰ योगविभाग उत्तरार्थः कुमारशीर्षयोर्णिनिः एतयोः कर्मण्युपपदयोर्हन्तेर्णिनिः स्यात्॰ सुप्यजाताविस्यादिभिः सिद्धे ताच्छील्यार्थमेव
पिणिनीयं॰ शिरसः शीर्षभावार्थं च वचनम् लक्षणवतीति सूत्रे लक्षणशब्दोऽर्श आद्यजन्त इति भावः जायाघ्न इति॰ जायामरणसूचकं पाणिरेखावि
शेषादिकं यस्यास्ति स तां हन्तीति गौणो व्यवहारः एवं पतिघ्नीत्यत्रापि शक्तौ हस्तिशक्तावितिकिम् विषेण हस्तिनं हन्तीति हस्तिघातः शक्तिग्रहण।
सामर्थ्याद्धि प्रकर्षो विज्ञायते स्वबलेनैव हन्तुं या शक्तिरिति॰ कपाटघ्न इति कं शिरः पाटयति प्रविशत इति कपाटम् पाठान्तरे तु अटतेः पचाद्यच्॰ कवं चो
[illegible]इत्यत्र योगविभागात् कोः कवादेशः इति हरदत्तः आढ्यसुभगे॰ प्रतिषेधसामर्थ्यादिति॰ तथाहि आढ्यीकरणमिति रूपं ल्युट्ख्युनोस्तुल्यं नच।
ख्युनि मुम्ह्रस्वौ स्यातामिति वाच्यम् अव्ययपर्युदासात् च्व्यन्तस्य चाव्ययत्वात् नच ख्युनि उपपदसमासो विशेषः ल्युट्यपि गतिसमाससंभवात् उ
भयोरपि नित्त्वाविशेषात् नच स्त्रीप्रत्यये विशेषः टिड्ढेति सूत्रेण ख्युन उपसंख्यानेन च ङीप्तुल्यत्वात् नापि स्वरे विशेषः ल्युटि लित्स्वरेण ख्यु।
नि नित्स्वरेण कृत्स्न उदात्तत्वाविशेषात् नच उत्तरार्थमत्रावित्युक्तमिति वाच्यम् केवलोत्तरार्थत्वे हि तत्रैव ब्रूयात् तदेतदुक्तमिहेति भाष्यमते त्विति
भाष्यवार्त्तिकस्वरसेन ल्युडिष्ट इति निर्णीतेऽत्रावित्यस्य केवलोत्तरार्थत्वमगत्या स्वीकर्तव्यमिति भावः कर्तरि भुवः कर्तृग्रहणं करणानुवृत्तिभ्रमनि
रासार्थमुत्तरार्थं चेति प्राञ्चः वस्तुतस्तु व्यर्थमेव॰ अस्वरितत्वादेवाननुवृत्तिसिद्धेः उत्तरत्राप्यनुपयोगः स्पष्टीकरिष्यते खिष्णुच्ः खकारो मुमर्थः ना
न्विकारो माऽस्तु इडागमेन रूपसिद्धेः एवं चकारो माऽस्तु प्रत्ययस्वरेणैष्ट सिद्धेः नच कृत्सो के ल्लुच्चावादयश्चेति स्वरसूत्रेऽस्य ग्रहणं न स्यात् चकार
भावात्॰ इकारस्योच्चारणार्थत्वाभावात् स्वरणत्वयोरसिद्धत्वेन ष्णु[illegible]रूपाभावश्चेति वाच्यम् कृतेऽपि इकारेऽनुबन्धपरिभाषया[illegible]नादौ ष्णुच एव ग्रह
णस्य न्याय्यत्वात् इकारोच्चारणसामर्थ्यादस्यापि ग्रहणमिति चेत् हन्तैवं [illegible]कारमात्रमस्तु तत्सामर्थ्या[illegible]स्यापि ग्रहणसिद्धेः कि॰ मिकारेणेति चिन्त्यमेत
त् यत्तु हरदत्तेनोक्तं षलत्वयोः सामर्थ्यादस्य ग्रहणमिति॰ तदुपात्तः [illegible]

क्तौ प्रक्रियालाघवेन सामर्थ्यायोगादिति क्विप् निवृत्तमिति । ननु स्पृशेः सकर्मकत्वात्कर्मण्युपपदे क्विन्स्यादेवोचितं इति चेत् अत्र प्राञ्चः । पूर्वसूत्रात्कर्त्तरीत्य
नुवर्त्तते तच्च व्यर्थं सत्कर्तृप्रत्ययार्थं संपद्यते कर्मण्युपपदे एकः कर्त्ता करणादौ चापर इति कर्तृप्रत्ययः एवं च सुवत उपपदे ते फलितं भवतीति । वस्तुतस्तु व्यर्थोयं य
त्नः मंत्रे स्पृशि स्यादेः क्विपापि सिद्धेः क्विन्प्रत्ययो यस्मादिति बहुव्रीहिबलादेव कुत्वसंभवादिति दिक् सहगिति । कर्मकर्त्तरि प्रत्ययः कृत्यर्थानुगुणत्वात् द्युसदिति
पूर्वपदादिति षत्वं तु न भवति छंदसीत्यनुवृत्तेः आदित्यादिविषद इत्यत्र तु सुषामादित्वात्सत्वमिति माधवादयः उपनिषदिति सदिरप्रतेरिति षः अग्रग्रामा
भ्यामिति सएषां ग्रामणीरिति निर्देशेन ज्ञापितमेतत् । निरूपप्रत्ययविषयं चेदं तेन कर्मण्यणि णत्वं न ग्रामनायः अदोनन्ने विडित्यादि
ति । जनसनखनक्रमगमो विडिति पूर्वसूत्रादनुवृत्तेः पूर्वसूत्रे तु छंदसि सह इत्यतश्छंदसीत्यनुवर्त्तते इत्याकरः अत एवेह तत्रोपन्यस्तम् विजुपे छंदसि
आतो मनिन्क्वनिब्वनिपश्चेत्यधिकृत्याह अन्येभ्योपीति सुशर्मेति सुष्टु शृणातीति विग्रहः प्रातः एतीति प्रातरित्वा वाहभ्रडिति वाहाद् श्वात् भ्रश्यती
ति विग्रहः वृत्तौ तु वहाभ्रडिति पाठः वहः स्कंधः अन्येषामपि दृश्यते इति पूर्वपदान्तस्य दीर्घ इति हरदत्तः आशासइति । आशिषि लिङ्स्यादिनिर्देशेन दं
सिद्धं न च शास इदङ्हलोरित्येव वाच्यम् । तत्र परस्मैपदिन एव शासेर्ग्रहणात् तद्धीजंतु अङा साहचर्य्यम् यद्यपि सर्त्तिशास्तीति सूत्रे पृथग्योगकरणात्सद
त्स्ये प्यङि ति सिद्धांतस्तथाप्युत्तरार्थतयायं परस्मैपदग्रहणानुवृत्तेरप्याकरे स्पष्टतया परस्मैपदे दृष्टो यः शासिस्तस्मात्परस्याङि ति निष्कर्षः अत एवाशास्ते इ
त्यादावनित्त्वमिति भावः सुम्नाविति । ओः सुपीति यण् । स्वः कर्वचंशस्था इति क्विपि लुप्ते घुमास्थेतीत्त्वं न स्थानिवद्भावस्यानल्विधाविति निषेधात् प्रत्ययल
क्षणसूत्रं तु नियमार्थमिति निष्कर्षात् यत्तु केषुचित् पठेनोक्तमीत्त्वमवकारादाविति वचनात् भाष्यकारीयोदाहरणामारणाद्यप्रत्ययलक्षणेन ईत्वं नेति तत् अ
तरोङि स्याद्दिति सिद्धये प्रत्ययप्राधान्ये ल्विध्यर्थं प्रत्ययलक्षणसत्वमिति पक्षे बोध्यम् एतेन मित्राणि शास्ति मित्रशीरित्यत्र इत्त्वं व्याख्यातमनिष्कर्षेतु ।
शास इत् क्विति ततः अङि नियमार्थमिदं अजादौ चेदङ्येव नान्यत्रेति । हलग्रहणं मास्तु इत्यवधेयम् । स्यादेतत् सुपि स्थः क्विप् च अस्मात्सूत्राभ्यां क्विपो रि

तन्नाह शमीति· धातुग्रहणसामर्थ्याद्धि धातुमात्रात् भवन्नचूप्रत्ययो हेत्वामदिपुकृत्त्वं प्रथा बाधते तथा तिष्ठतेः क्विपावपि वायौ रेति भावः ननु एवं शमि
धातो[illegible]नंतरस्थः कचेति सूत्रस्थं तेन चकारेण चिसमुच्चिते सवर्णदीर्घेण शंस्यादिति भविष्यति एवं चोत्सर्गापवादयोः समानदेशतया संदर्भशुद्धिः
इत्याभाणार्थं चनयतनीयमिति महत्वाद्यवमिति चेत् मैवम् अक्वावशक्ताविति सूत्रेण अशंस्यादिसत्रोत्तरपदांतोदात्तत्वापत्तेः कृद्ग्रहणेगतिका
रकपूर्वस्यापीति शंस्याशब्दस्याजंतत्वात् क्विवंतेन नञ्समासे तु नञ्पूर्वपदप्रकृतिस्वरः सिध्यति आमंत्रयितेति· ताच्छील्यस्याविवक्षितत्वात्तृन्
अत एवं ग्राह्यणानितिकर्मणि षष्ठी न कृता भाष्यविरोधादिति· उक्तं हि भाष्ये सुपीति वर्तमाने पुनः सुपग्रहणं किमर्थम् अनुपसर्ग इत्येवं तदभूत्
इदं तु सुप्मात्रे यथा स्यात् उदासारिण्यः प्रसासारिण्य इति· प्रसिद्धश्चेति· एवं च व्यापीत्यादिप्रयोगा अपि निर्बाधा एव· अमरश्च प्रायुक्तलिंगशेषविधि
व्यापीतिशेषे यथाबाधितः इति यत्तु सप्तपदार्थीटीकायां व्यापी स्यात्प्रश्नेषादुदासारिण्यः प्रसासारिण्यः इतिवत्साधुरित्युक्तं तस्योक्तिसंभवमपि
चिकीर्षता भ्रमपरंपराशरणीकर्तव्या तथा हि सुपुक्तिरुपसर्गनिवृत्त्यर्थेति तावदेको भ्रमः तथा सति पाणिनीयानुसारिणामित्यादावसंगतिमाशं
क्य उपसर्गग्रहणं केवलोपसर्गपरं· इह तु पाणिनीयादिपदांतरमप्यस्तीति प्रसादादिग्रंथं पुरस्कृत्य तत्र त्यक्तेवलपदस्य असहायपरतया नेकोपसर्ग
सद्भावेऽपि निर्भवस्येवेत्यपरो भ्रमः एवं सति [illegible]प्रतिभ्यामाङि· सर्ते[illegible]प[illegible]न्यान मिति स्वोपजीव्यग्रंथविरोधापर्यालोचनं· उपसर्गेपीत्येतद्दशव्यावृत्तिफ
लकमिह सुपग्रहणमिति वृत्तिमते [illegible]रकिं विराश्रि[illegible]णिनिः प्रवर्ततेनत्वनेकमप्युपसर्गमिति मतशरीरस्यापर्यालोचनं च तन्मूलं इत्यास्तां ता
वत् साधुकारिणीति एतच्च ज्ञापकमिदं [illegible]केति सूत्रेऽपि· [illegible]स्य च साधुकारिशब्दः [illegible]मेव संगच्छते ब्रह्मणि
वदइति वाचनिकमेवेदम् अत[illegible]मिति· एतच्चवे[illegible]थेऽस्य दृम यत्तु [illegible]मेतत्साधुकारिप
रतया व्याख्यानं दृष्टा आकेरित्यधिकारेणानिविधायकं वार्त्तिकमस्तीति केचिद्बा[illegible]सुप्यजातौ विति सूत्रेण

उ·
म·ति· ताछील्येणिनिः उपसंख्यानेनज्ञापकेनवासाधुकारिणि आवश्यकाधमर्ण्ययोर्णिनिरित्यावश्यके णिनिस्तु । इ[illegible]वस्यति एवंचब्रह्मणिनदइति ।
६२ वार्त्तिकेनताछील्यादिविरहेयद्यपिणिनिरुपसंख्यांतस्तथापिप्रागुक्तरीत्याताछील्यादिष्वप्यर्थेषुसुलभइति · एवंचफलितार्थकथनपरमिदंवार्त्ति
कम् नत्वाप्ते इतिसूत्रव्यापारप्रदर्शनपरमितिस्थितं · मनः बहुलग्रहणानुवृत्तेरिहदेवादिकस्यैवग्रहणंनतुतानादिकस्य · तेनोत्तरसूत्रेखशिश्यनेव
भवतिनतूप्रत्ययस्तदाहमन्यतेरितिआत्ममाने · मननंमानः आत्मशब्दः स्वपरः कर्मणिषष्ठ्यासमासः तस्मिन् स्वकर्मकइत्यादिप्रत्ययार्थत्वेनसन्नि
हितः कर्त्तास्वपदार्थः चादिति · यद्यपिवासरूपविधिनालभ्यतएवणिनिस्तथाप्यविछेदायसमुच्चीयतेतेनकरणीयजइत्यादौणिनिरेवानुवर्त्ततेनखु
खशितिभावः पंडितमात्मानमिति एकस्याप्यात्मनःस्वरूपेणकर्तृत्वं पंडितत्वविशिष्टरूपेणचकर्मत्वंबोध्यम् कालिमन्येति स्त्रियाःपुंवदितिप्रा
प्तंपुंवद्भावंबाधित्वापरत्वाद्ध्रस्वः यत्त्वत्रक्यङ्मानिनोश्चेतिप्राप्तःपुंवद्भावइतिप्रसादकृतोक्तंतत्सामादिकमेव दिवामन्येति अधिकर
णशक्तिः प्रधानस्याप्यस्यवृत्तिस्वभावात्कर्मत्वं इचएकाचः अम्ग्रहणमिहानुवर्त्तते तत्रैकेनअम्विधीयतेपरेणास्ययोविशेष्यतेतदाह · स्वायम्भ
दिति भाष्यकारेति अयंभावः यथाप्रष्ठादयः शब्दाःपुंयोगात्स्त्रियांवर्त्तन्ते प्रष्ठीगणिकेतितथेहश्रीशब्दःपरित्यक्तस्वलिंगः क्लीबः सन्कुलेवर्त्तते त
त्रह्रस्वोनपुंसकइतिह्रस्वः मुमतुन; अपवादेनामावाधात् स्वमोर्नपुंसकादित्यमोर्लुक् नचैवंगांमन्यइत्यादावपिसुपोधातुप्रातिपदिकयोरितिलुक्स्या
दितिवाच्यं अम्विधिसामर्थ्यादेवंतद्बाधात् · श्रीशब्दस्येहक्लीवत्वेप्रमाणंतुभाष्यमेवेतिदिक् भूते धात्वर्थस्यविशेषणमिदं · धातोरित्यधिकारात् · भू
तेर्थेविद्यमानाद्धातोरित्यर्थः सोमेनेति · लताविशेषेणयागंकृतवानित्यर्थः अग्निष्टोमेति अग्निष्टोमसंस्थापकेनयागेनापूर्वंभावितवानित्यर्थः उक्तं
चकाशिकायां अग्निष्टोमः फलभावनायांकरणमिति · एतच्चभावकर्मप्रक्रियायामेवोपपादितं कर्मणिहनः पितृव्यघातीति अत्रकाशिका · कुत्सित राम·
ग्रहणंकर्त्तव्यं · इहमाभूच्चोरंहतवानिति · यद्यपीदंभाष्येनास्तितथापिशक्तिस्वाभाव्यात्लभ्यतइत्याह चतुर्विधइति · यप[redacted] ६२

सूर्वेव ह्यात्स्य उद्देश्याः ततो नंतरं प्रकृतित्वादिति। ततः परिशेषाद्भूत इति। क्विप्तु सर्वान्ते निर्देष्टव्यः विधेयत्वात्तदेवं वचनव्यक्तिः ब्रह्मादिषूपपदेषु हंते
भूते क्विप् [illegible] एवं स्थिते यत्रैवकारस्ततोऽन्यत्र नियम इति न्यायेन नियमोऽत्र भवन्ननंतरे भवति। ततश्च ब्रह्मादिष्वेवेत्सव धारणा हंतेस्तदनंतरं निर्दिष्टा।
त्वादुपपदसान्तरसंबंधनिवृत्तिफलो नियमो भवति ब्रह्मादिषु हंतेरेव भूत इति तु अनंतरत्वाविशेषेपि प्राथम्यादुपपदनियमः ब्रह्मादिषु हंते भूत एव क्वि
विति तु आनंतर्ये क्विप्हंत्योरविशिष्टेपि प्राधान्यात्प्रत्ययनियमः ब्रह्मादिषु हंतेर्भूते क्विबेवेति वचनव्यक्तौ कालनियमः सोयं प्रकृत्युपपदप्रत्ययकाल
नियमानां विवेकः अगृह्यमाणविशेषत्वात्तु चतुर्विधस्यापीह ग्रहणम् तत्र ब्रह्मादिष्वेव हंतेरिति प्रकृतिनियमे भूत इत्याश्रयणात् कालांतरे उपपदा
न्तरेपि भवत्येव। पुरुषं हंति हनिष्यति वा पुरुषहा। हरिहयोरिहयोगविचक्षणः ब्रह्मादिषु हंतेरेवेत्युपपदनियमेपि भूत इत्याश्रयणात् कालांतरे धात्वं
तरादपि भवत्येव वृत्रं जयति जेष्यति वा वृत्रजिदिति। भूत एव क्विबिति प्रत्ययनियमेपि ब्रह्मादिष्विस्युक्तेः पुरुषहा अरिहेति प्रागवत्। भूते क्विबेवे
ति कालनियमेपि उपपदांतरे भूतेपि प्रत्ययांतरं भवत्येव पितृव्यं हतवान् पितृव्यघातीति। सोपपदश्च प्रत्ययो नियमेनव्यावर्त्यते। निष्ठा तु भवत्येव
वृत्रं हतवान् इति भाष्यकारस्तु प्रकृतिकालनियमावेवाशिश्रियत्। तस्यायमाशयः धातुकालौ हि नेह सूत्रे श्रुतौ किं तु प्रकरणाल्लक्षणाज्जघन्यप्रमा
णेनोपस्थितौ। अतस्तयोरेव उपरोधो न्याय्यः नतूपपदप्रत्यययोः श्रुत्युपस्थापितत्वात्। एवं न्यायोपष्टंभेन भाष्येण सह विरोधाद्वृत्तिमतेउपेक्ष्यमेवे
तिकेप्यटे स्थितं यत्त्विह हरदत्तेनोक्तं। धातूपपद[illegible]विषयं नियमद्वयं भाष्यप्रदर्शितमिति तत्र धातुकालविषयमिति वक्तव्येउपपदग्रहणं प्रामादिकमित्यव
धेयम्। सुकर्म त्रिविधइति। धातुनियम[illegible]इति भावः सोमे सुञः इहापि चतुर्विधो नियम इति वृत्तिः। एवमुत्तरसूत्रेपि। कर्मण्यग्न्याख्यायां श्येन
चिदिति। समुदायोयम् आहवनीयधारणार्थइष्टकानिर्मितस्थलविशेषे निरूढः [illegible] नियमार्थमिदं क्वनिवेवयथा
स्यात् तत्सह निर्दिष्टं मनिनादि सोपपद[illegible]दि माभूदिति। निष्ठा तु भवत्येव। पारं[illegible]वानिति एवं स्थिते वि[illegible]गावयवे स्यादौ विश्वं पश्यतीति

उ·
म·ति·
६३

लयविग्रहेपिनस्रुतिः मस्यांतरनिवृत्त्यर्थं सूत्रमित्येवं वृत्तिकारादिभिर्व्याख्यातत्वात् कालांतरनिवृत्त्यर्थत्वस्य चाभियुक्तैरनुक्तत्वादितिदिक् मंदुरायामि
ति·वाजिशालातुमंदुरेत्यमरः·पुमनुजेति·इहजनिः सकर्मकः अनुरोधविशिष्टजननवृत्तित्वात् अन्येष्वपिदृश्यते अपिशब्द इतियत्तु अंतास्तंताध्वेतिप्र
करणेऽन्यत्रापिदृश्यतेइत्युपसंख्यानं तं तङ्कृते कालं विनापि यथा स्यादित्येवमर्थं वस्तुतस्तु प्रकृतसूत्रस्थस्य अपिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् तद्वार्त्तिक
म् अनेनैवगतार्थं विभावितं चेदमिको गुणवृद्धीतिसूत्रे जनेर्डे प्रकृत्यगमेरप्ययं डो वक्तव्य इति वदता भाष्यकारेण· एवं च प्रकृतसूत्रस्थं अन्येभ्यो
पिदृश्यत इति वार्तिकमपि गतार्थं बोध्यम् निष्ठायामण्यदर्थे भावकर्मणीति यद्यपि याज्या ऋगित्यादौ करणादावपि बाहुलकाद्यद्भवति तथापि
तयोरेवेति वचनाद्भावकर्मणी एव साक्षादुपात्तोऽर्थ इति स एवेह विवक्षित इति भावः क्षियो क्षिक्षये क्षिनिवासगत्योः द्वयोरपि ग्रहणं क्षितः काम
इति अंतर्भावितण्यर्थात्कर्मणिक्तः एतच्च अक्षितोभिः सनेदिममिति मंत्रव्याख्यायां माधवग्रंथे स्पष्टम् भावेतु क्षितं कामेनेत्युदाहार्यं रदाभ्याम् इ
हरदाभ्यामित्यनेन तकारो विशेष्यते न निष्ठा तेन चरितं मुदितमित्यत्र न· तकारस्येयव्यवहितत्वात् तदेतदाह परस्य निष्ठातस्येति· एकविंशतेरिति· आ
दिपुलादयो द्वाविंशतिः तन्मध्ये पूञं विहाय ल्वादयोज्ञेयाः जीन इति सिद्धत्वान्नित्यत्वाच्च संप्रसारणे कृते संयोगादेरित्यस्याप्राप्तिः गून इति·गुपुरी
षोत्सर्गे विनष्टा इति· धातूनामनेकार्थत्वात्सुनाते विनाशे वृत्तिः सिनो ग्रास इति· पिंडीक्रियमाणो ग्रासो यदा दध्यादिव्यंजनवशात् बंधनेऽनुकूलो भव।
ति तदा कर्मण एव कर्तृत्वं बोध्यम्: पस्य विभाषा·यस्येत्यार्द्धधातुकापेक्षा षष्ठी पदीपस्यार्द्धधातुकस्येत्यर्थः उदक्तमिति उत्थितमित्यर्थः द्यून इति।
क्षीण इत्यर्थः· द्यूतमिति· विजिगीषयाहितत्राक्षाः पास्यंत इति गम्यते विजिगीषा क्षीवादिष्विति· क्षीवृ मदे· कृश तनुत्वे· लाघृ शक्तावुत्पूर्व एभ्यः क्तः न
नु फुल्लर्विकसने ऽस्मादुत्वाद्येश्च पचाद्यचि इतराभ्यामिगुपधलक्षणकप्रत्यये च फुल्लादयः सिध्यन्ति तत्र किं सूत्रेणेत्यत आह सूत्रं त्विति निवृत्त्या॥ राम·
र्थमित्युपलक्षणं· फुल्लवानिति रूपस्य निष्ठा च द्व्यजनादिति स्वरस्य च सिध्यर्थमिति बोध्यम् वेत्तेस्त्विति· तथा च भाष्यं· वेत्तेस्तु विदितो निष्ठा विद्यते ६३

र्विन्नइत्यत्र· वित्तेर्विन्नश्चविन्नश्चभोगेवित्तश्चविंदतेरिति· पूर्त्तइति· श्युकः क्तितीतिनेट् मूर्त्तइति· आदितश्चेति· मत्तइति श्वीदितइति भुग्नइतिभोग
प्रतिपत्तइतिप्रत्ययइतिकर्मसाधनाविति व्याचष्टे भोग्यप्रतीतेचेति भिन्नंशकलं· भिदेः क्तेनत्वाभावोनिपात्यते· भिन्नशकलखंडइत्यमरः भिन्नमन्यदिति
विदीर्णमित्यर्थः ऋणमाधमर्ण्ये अधमंदुःखप्रदमृणंयस्यसोधमर्णः तस्यभावआधमर्ण्यं· तेनचव्यवहारविशेषोलक्ष्यते· तेनोत्तमर्णोपिसिध्यति।
धारेरुत्तमर्णइतिनिर्देशश्चेहलिंगं· स्फायः स्फी· कथंतर्हि स्फीतिकामइति· स्फीतइतिप्रसिद्धिः स्फीतिः आख्यानमपतादचइःयस्येति· निरः कुषइति वि
कल्पितत्वादितिभावः उषितइति· यजादित्वात्संप्रसारणंशासिवसीतिषः क्षुधितइति· एवंचतस्यालमेषाक्षुधितस्येतिप्रयोगमुद्दंकस्तुधेर्भावेक्तिपिता
रक्तादितजितियद्यानुष्टन्निष्टक्तंतद्धृथैव· समानन्यायतायाक्षुधितादावुपपत्तेःस्यतइतिवाबोध्यम्· अंचेःउदित्वात्· क्त्वायांविकल्पेप्राप्तेनिष्ठायांयस्य
विभाषेतिनिषेधेप्राप्तेवचनम् अञ्चितइति· नांचेःपूजायामितिनलोपनिषेधः लुभःतोषसहेतिक्त्वायांविकल्पेनिष्ठायांनिषेधेचप्राप्ते वचनम् पू
ङः श्च श्युकः क्तितीतिनिषेधेप्राप्तेवचनम्· पूङःक्त्वाचउत्तरार्थमिति· इहतुनक्त्वासेडित्येवसिद्धमितिभावः क्लेशेवेतिनतुनिष्ठाचानुकृष्टत्वादितिभा
वः शेश्यितइति एरनेकाचइतियण् चादिति· अन्यथातक्रकौंडिन्यन्यायेनवाधःस्यादितिभावः भ्वादिरिति· स्नेहनमोचनयोरितिपठितः स्विद्यतेस्वि
ति· गात्रप्रक्षरणेपठितस्य· नचायमपिजीदितिवाच्यमुहरदत्तग्रंथविरोधादितिभावः अत्रहरदत्तः त्रिष्विदास्नेहमोचनयोरितिदिवादिग्रहणेनतु
त्रिष्विदाअव्यक्तेशब्दइतिभ्वादि[illegible]· मिदिनासाहचर्यादित्याह तच्चिंत्यं भ्वादिष्वपिमिदेःपठ्यमानत्वात्· तस्मादविशेषादुभयोर्ग्रहणंन्याय्यमतद
तदाह दिवादौभ्वादौचेति स्विदादीनामादितश्चेति निषेधात्सेरिनष्टादुक्तेभ[illegible]तत्रादिकर्मणिनिष्ठोदाहृता क्षुब्धस्वांत· अनायाससाध्यइति· क्षुस्म
मौषधजातमुष्णोदकेप्रक्षिप्यमर्योभिषुत्यपरित्वापत्तीयतेत[illegible]मिश्राहुः वेदभाष्यइति तद्धैनवनीतंभवतिघृतंवैदेवानांफाण्टंमनुष्याणामिति
शनपथश्रुतेर्व्याख्यायामित्यर्थः अन्यत्रेति· मन्थादेरवाच्यत्वेइत्यर्थः वाहितमितिवाहप्रयत्नेघ्वषिशासी· विरुद्धयानोविनीतः अविनीतः तस्यभा

उ·
म·ति· वोवेयात्स्येनियामार्थेचेद्वचनं त्रिधृषाप्रागल्भ्येशंसु हिंसायां अनयोः आदितश्च· यस्य विभाषेति सूत्राभ्यामिट्प्रतिषेधसिद्धेः तदेतदाह अविनयएव।
६४ वेति· नास्तीति अनभिधानादिति भावः अत्रप्रमाणमाह अतएवेति· अन्यथा विभाषाभावादिकर्मणोरिति विकल्पेप्राप्तेनिसार्थेसूत्रंस्यादिति भा
वः माधव त्त्विति· एवंच हरदत्तोक्तंचिंत्यमुद्धृतमिति भावः वलमस्यास्तीति वलः अर्शआदिभ्योच् तदाह वलवतीति· तस्येतितकारस्येत्यर्थः ह्रस्येति
ननुहोढइतिढत्वे ढोढेलोपेनैवसिद्धमितिचेत् मैवं तथाहिसतिढलोपस्यासिद्धत्वेनवृद्धिमेत्यत्रस्त्रात्तोहलादेर्लघोरिति स्वभावोनस्यात् परिवृढ
प्पगतइतिवत् पिलघुपूर्वादित्स्यादेशोनस्यात्परिवृढस्यापत्यंपारिवृढीकन्येत्यत्रगुरूपोत्तमलक्षणःष्यङ्स्यात् अतोसिद्धत्वनिवृत्तयेहलोपोनि
पात्यतेइतिमहाभाष्यादौस्थितं· अतएवढलोपइतिसूत्रेअणः किंवृढइतिप्राचोग्रंथस्याप्रामादिकतामवोचाम प्रभो· निपातनमिति हलोपेप्रयोज
नमपिप्राग्वदेवबोध्यं कृच्छ्रगहनयोः कृच्छ्रं दुःखं· तत्कारणंचगृह्यते कषतिर्हिंसार्थः कष्टोमोहइति· दुःखहेतुरित्यर्थः अभेः अविदूरस्यभावः।
आविदूर्यं ब्राह्मणादित्वात्ष्यञ्· अस्मादेवनिर्देशान्ननञ्पूर्वादितिनिषेधोनभवति· सामीप्यइत्येवतुनोक्तं· नातिदूरस्यासंग्रहापत्तेः तदेतद्धृनय।
न्याचष्टे नातिदूरमासन्नंवेति· एवंचसामीप्यइतिव्याचक्षाणस्यप्राचोन्यूनतेतिभावः णेः अधीयतइत्यध्ययनं· वहुलवचनात्कर्मणिल्युट्वादं
तशमुदमुउपशमे पूरीआप्यायने दिवादिःस्फुरादिश्च दसुउपक्षये· स्पशवाधने· छदअपवारणे· ज्ञपिर्मित्संज्ञायामुक्तः रुष्यमःरुषरोषे अत्यतोषसहे
तिपिकृत्सितेइत्वात् यस्यविभाषेतिनिषेधेप्राप्तेविकल्पोविधीयते· अमगत्यादिषु· अमरोगेइतिचौरादिकस्तुनगृह्यते एकाचइत्यधिकारादि।
त्याहुः हृषेरिति· त्विषसंभ्रमे· ज्वरत्वरेत्यूठ् आदितश्चेतिनिषेधेप्राप्तेविकल्पः आदित्वस्यफलंतु आत्मनेपदमात्रम् तदेतदाह फलंमंदमि।
ति· तथाचएधत्यादिवत्ह्रस्वानुवंधत्वमेवन्याय्यमितिभावः संघुष्टइति· अविशब्दनेपिसंपूर्वस्यपाठत्वादयंविकल्पएव आस्वांतइति· आङ् राम·
पूर्वस्यस्वनमेनाभिधानेप्ययमेवविकल्पः परत्वात् प्रह्लन्नइति· ह्लादीसुखेईदित्वान्नेट्· द्यतिस्यतीति· श्तिपानिर्देशोधातुविशेषणार्थः नहितेन ६४

वेनाश्यन सुलभः यत्तुप्रसादकृतोक्तं श्तिपानिर्देशो यङ्लुङि निवृत्त्यर्थः दा दत्तः सासात इति तन्न यङ्लुकि हीटाभाव्यं दादितः सासितइति तत्रास्ति विवक्तौ निवचनात्त्वा लिप्र
संगः अभ्युपेत्यत्वम् दोदद्घोरिति विधीयमान आदेशः अनेकाल्त्वात्सर्वस्येति निर्विवादं तथाच साभ्यासस्य प्रवर्त्तेत [illegible] गतस्यैव वधिः तथाच
दाद्स्तद्भावस्त्वदुदाहृतं रूपं कथमुक्तिसंभवं लभेत् । दधातेर्हिः श्निपानिर्देशो धेटो निवृत्त्यर्थः तेनानुवृत्तेर्यङ्लुकि न दाधितः [illegible] पिप्रसादकृ
ताश्तिपानिर्देशस्य यङ्लुङ् निवृत्त्यर्थत्वाद्दाधीत इति धुमास्थेतीत्वमुदाहृतं तत्र सूर्वेवदेव हेयं दो दद्घोः इह आदेशः स्यात्तस्य न तु तद्धातोः संहितायां
स्तुत्यत्वेपि प्रक्रियायां दोषादितिप्राचः तथाचाहुः तानेदोषो दीर्घत्वारब्धोदांतेदोषानिष्ठानत्वं धांतेदोषो धत्वारब्धः स्यान्निर्दोषत्वात्स्यांतोमाम्ह इति तद
नुसारेणाहृदेयमस्यादिति वस्तुतस्तु सर्वे पस्माद्इह रूपपादाइत्याह तांतोवेत्यादिना अचउपसर्गात्तः अचइत्यावर्त्तते तत्रैकं पञ्चम्यंतमुपसर्गविशि।
नष्टि पर्युपक्षंतं स्थानिलाभायेतिव्याचष्टे अजंतादित्यादिना यद्वा द्वितकारकोपमादेशः तेनानेकाल्त्वात्सर्वस्य घो भविष्यति अचइतितु अनावृत्तप।
चम्यंतमेवास्तु नचैवमपो मीत्युत्तरसूत्रेपि सर्वादेशत्वापत्तिः अचइत्यनुवर्त्त्य अचः परस्य पकारस्यादेशविधानात्तत्रांत्यस्य [illegible] योगांतलोपे पूर्वस्य ज।
श्त्वे रूपसिद्धेः अवदत्तमित्यादि आदिकर्मणीत्येतस्मदत्तमित्यस्यैव विशेषणं धीतमिति दधातेर्हिरित्यत्र श्नुविकरणस्य निर्देशा [illegible]टो हिर्न नापिद
त् तद्धि धौदङ्स्युपादानात इति भावः ऊरीकृरीति अनेन पाक्षिको धलोप इत्यर्थः प्रकृत इति कर्त्तुमारब्धवानित्यर्थः न [illegible]लइति नदीष्णानेकुशल इत्यर्थः
गंगां प्राप्त इति प्रपूर्व आसव्यासो प्राप्तिरणीह [illegible] गतिशब्देन विवक्षितेति भावः उपोषित इति वसतिक्षुधोरितीट् शासिवसीति षः मुकुंदस्येति आ
स्पतेस्मिन्निस्यासितं आसनमित्यर्थः यातं [illegible]न्निति यातं मार्गः भुज्यतेस्मिन्निति भुक्तं भाजनं अधिकरणवाचिनश्चेति त्रिष्वपि कर्त्तरि षष्ठी
·[illegible]साः इड इति आदितश्च प्रोदित इति नेट् इष्ट इति तीषसहेति वैकल्पात्यस्य विभाषेति नेट् सुपजोर्द्ध निप इह सुस्नमतो षुप्रभ
सवैश्वर्ययोरिति [illegible] धकयो [illegible] अनभिधानादुभयपदिनासाहचर्याद्धा न भवतीत्याह सुनोतेरिति उकारः सुनोतेर्गुणप्रतिषेधार्थः पकारः
स्वरार्थस्तुगर्थश्च छंदसि लिडिति सूत्रस्यायमा [illegible] भूतसामान्य इति नव छंदसि लुङ् लङ् लिट इत्यनेन गतार्थता धातुसंबंध इत्यधिकारे हि सर्वविधिः इदं

उ.

म. ति. तुधातुसंबंधंविनापिभसूतोतिविशेषात्. त्रिमुनिमतमिति. सूत्रकृताछंदसीतिप्रक्रांतत्वादुत्तरसूत्रेभाषाग्रहणाच्च. भाष्यवार्तिकयोरपिक्वसुकानचोश्छं
६५ दस्युभयथेतिवचनात्सार्वधातुकत्वेनसार्वधातुकमपिदितिङित्वादेव आजिवान्इत्यादौनलोपादीनांकित्कार्याणामन्यथासिद्धेर्मांशंकितितौवान्. नि
लिराणइत्यादौसर्वेषांमिति प्रास्तस्यगुणबाधनार्थेकितकरणमितिसिद्धांतितत्वात्. अतएवकित्करणसामर्थ्याद्भाषायामपिक्वसुकानचौलङि
तिकेषांचिदुत्प्रेक्षानादर्तव्येतिहरदत्तमाधवादिग्रंथेषुस्पष्टमितिभावः कवयस्त्विति. गतोनुगतिकतयेतिभावः अत्रभाष्यादाश्वानसाह्वान्मीढ्वां
श्चेतिसूत्रमुपन्यस्तम् तच्चयद्यपिछंदसिभाषायांचाविशेषेणप्रवर्त्ततेइतिहृस्यादौस्थितंतथापीहोपेक्षितं. छंदस्येवप्राचुर्येणदाश्वानइत्यादिप्र
योगाणामुपलंभात्. उक्तसूत्रस्यद्वित्वाभावादिनिपातनमात्रोपक्षीणत्वात्कसोश्चछांदसतायानिर्णीतत्वात्. अनेनैवक्वसोरपिविधानेगौरवात्.
यदाहुः अल्पार्थविधिसंतुष्टोनानेकार्थविधिक्षमइति अतएवहितत्सूत्रमनावश्यकंतथाचपदकाराःसाह्वानविश्वइतिमंत्रेसह्वानितिह्रस्वं।
विच्छेदुर्मिदिकू उपेयिवाननाश्वाननूचानश्च ईडिति. वलादिलक्षणएवेट्नेड्वशिकृतीतिप्रतिषिद्धः क्रादिनियमात्प्राप्तःवस्वेकाजाद्घसामि
तिसूत्रेणकृतद्वित्वानांएकाचामादंतानांघसेश्चवसोरिट्स्यान्नान्येषामितिनियच्छतःप्रतिषिद्धः नियत्वाद्धिस्वेकृतेऽनेकाच्त्वात् नवसवर्णदीर्घे
रौ काच्त्वंदीर्घइणः कितीतिदीर्घेकृतेतत्सामर्थ्यात्सवर्णदीर्घाभावइतिपृक्षाश्रयणात्सएवेट्इहप्रसूयतेनापूर्वोविधीयतेतेनसम्प्रसारणविषये
नभवति. अतएवोदाहरति. उपेयुषइति. अविवक्षितमिति. व्याख्यानमेवात्रशरणं. ववःकर्त्तरीति. ननुभावकर्मणोःएतच्चनिपातनात्त्रश्चम् लटः
शतृशानचौ: सामानाधिकरण्येसतीति. यद्यपिकेवलस्यलटः प्रयोगाभावात्सामानाधिकरण्यंदुर्लभंतथापिआदेशयोःशतृशानचोंस्तद्दृष्टाख्या
निर्यांषज्ञकल्प्यते पचंतमिति विक्लित्यनुकूलवर्त्तमानव्यापाराश्रयमित्यर्थः पचतीतिविग्रहप्रदर्शनंतुईषत्साम्येन. क्रियाप्रधानमाख्यातंसत्व एम.
प्रधानानिनामानीतिसिद्धांतात्. आनेमुक्. अतोपेयइतिसूत्रादनुवृत्तंपंचम्यंतमपिआनइतिपदंषष्ठ्याविपरिणम्यते आनइतिसप्तमीबलात्। ६५

नेवविप्रोप्तीतंशंकंपंचम्याः पूर्वसूत्रेचरितार्थत्वात्· सप्तम्याश्च अचरितार्थत्वात्· तदेतदाह अंगस्यात इति· यत्तु प्राचा अदंतो [illegible] स्यात्तंतन्न पचमान इत्या
दो अउपदेशात्वसार्वधातुकमनुदात्तमितिशानचः स्वरस्यासिद्धिप्रसंगात् त्वसत्येहि अंगभक्तोमुक्सचतदेवनम्यवदध्यात्· तदवयवमकारंतुव्यवदध्यादे
वस्युष्टंचेमदाके लडिति· यद्यपिप्रथमांतप्रकृतंतथापिषष्ठ्याविपरिणम्यत इतिभावः पुनरिति· एवंहिपुनर्विधिः संपद्यते सचप्रथमेनाप्राप्तेपिकचित्स्यष्टस्य
र्थ इतिभावः प्रथमेति उपलक्षणमिदं· अप्रथमांतेनसामानाधिकरण्याभावेपीत्यर्थः तेनकुर्वतोपश्यकौर्वतः कुर्वतोभक्तिः कुर्वद्भक्तिः कुर्वाणभक्तिरित्तिप्रस
योत्तरपदयोरपिसिध्यति· विदेः शतुर्वसुः स्थानिवत्वादेवसिद्धेवसोरुगित्करणं वसोः संप्रसारणमित्यत्र क्वसोरपिसामान्यग्रहणार्थम् अनुबंधग्रहणप
रिभाषापितत्सामर्थ्यादेवनप्रवर्त्तते· पूङ्यजोः एवुलादिवत्स्वतंत्रोयंनतुशत्रादिवत्त्रादेशः तथाहिसतिवेतिवाच्यमस्यात्· पवतेयजत इतितिङोपिय
थासुनर्थ[illegible]सरूपन्यायेननिर्वाहः लादेशेषुतदभावस्याकरेस्थितत्वात्· किंच· लादेशत्वेभावकर्मणोरपिस्यात्· कर्त्तर्य्येव[illegible]विष्यते· एवंचानशः वस्य
माणशतुश्चस्वातंत्र्यंबोध्यम्· यत्तुशानचोलादेशत्वेत्वसार्वधातुकानुदात्तत्वंस्यादितिवदन्ति· तच्चिंत्यं निस्वरस्यजागरूकत्वात्· अनुदात्तेत्त्वइष्टापत्तेश्चेत्या
त्तावत्· नन्वेषांलादेशत्वाभावे सोमंपवमानइत्यादौकर्मणिषष्ठीस्यादितिचेत्· मैवं· नलोकेतिसूत्रेतृन्नितिप्रत्याहारनिर्देश इत्युक्तत्वात् ताच्छील्य चा
नशोलादेशत्वाभावेन अनात्मनेपदत्वात् परस्मैपदिभ्योपिविधानमितिध्वनयन्नुदाहरति· शत्रुंनिघ्नान इति· सुञोयज्ञसंयोगे· सुनोतेः शतृप्रत्ययः स्या
त् यज्ञेनसंपुज्यमानेचेत्तिश्चेत् नन्विहसुञो[illegible]इत्येवास्तुयज्ञविषयकश्चेत्सुनोत्यर्थः इतिव्याख्यायसुरांसुनोतीत्यादेर्व्यावर्त्तयितुंशक्यत्वात् अत्राहुः।
संयोगग्रहणंप्रधानकर्त्तृसंप्रत्ययार्थं· तेनयजमानादन्यत्रनभवतीति· एवंचाप्रधानेकर्त्तरि लटः शतृशानचावित्यनेनापिनभवति· संयोगग्रहणसा
मर्थ्यादितिहरदत्तः यत्तुसुञ्जनयतिइत्यादीनाम्एकवचनांतानां अधिकारिपरत्वंनिर्वाधमेव· बहुवचनान्तानांतुस्थलविशेषएवसंभवतीतिदर्शयितु
मुदाहरति· सर्वेसुन्वंत इति· त[illegible]· सर्वइत्यादि· अर्हः प्रशंसायांकिम् अर्हतीतिचोरोवधम्· आकेः शीलादीनांत्रयाणांविशेषणांसमर्थयितुंनि

उ॰ म॰ति॰ ६६

दिष्टे स्त्रिभित्तकृत्वेः प्रकृतेति भूतधात्वर्थो निर्दिश्यते॰ अलंकृञ् कृञिति करोते ग्रेहणां प्रसिद्धेः नहिंसार्थस्य इह पच्यादय स्त्वप उत्पूर्वाः पठ्यंते तत्र उदः प
चपतमदइत्येवमवर्त्तवैश्रे स्येकमुत्पूर्वेस्यपाठः उपसर्गान्तरनिवृत्त्यर्थः तेन समुत्पतिष्णुरितिनभवतीत्याहुः इह पचेरनंतरं पति स्तोतः पठ्यते तथा च भट्टि
उत्पतिष्णुसहिष्णूचचार तुःस्वरदूषणाविधि कालिदासोपि॰ समं जुरुषुवस्तुसमाना मेलानामुत्पतिष्णवइति॰ केचित्तु तस्यानेदांतं पठित्वापदगताविस्पष्टा
स्त्रयमाहुः पारयिष्णवइति॰ अयामंतास्वाय्येत्ययः नैतदिति॰ चकारस्यानुक्तसमुच्चयार्थत्वमित्यर्थः गकारेति॰ नन्वेवं गकारस्य वत्त्वस्यासिद्धत्वमाह श्चिवे
त्युत्वस्यादिति चेत्सत्यं॰ सौत्रोयं निर्देशः तथाच वार्त्तिकं॰ ग्लोर्गित्वान्नस्थईकारः क्ङितोरीत्वशासनात् गुणाभावस्त्रिषु स्मार्य्यः श्रुकोनिट्त्वं कगोरितो
रिति त्रसित्रस्नुरिति॰ नेड्वशीतिनेट्शाभिसङ्ख्याभ्यः इतिशब्दः आद्यर्थः संपृच्चापरिदेवीति॰ देवदेवने॰ भ्वादिः एयंतस्यैव्यतेस्तुनेहग्रहणं लाससाक
त्वात्॰ अरायतेः साहचर्य्याच्च वौकषकृषिर्हिंसार्थः लसश्लेषणक्रीडनयोः कस्यश्लाघायां स्रंभुविश्वासे अपेचलषः लषकांतौ प्रमाथीति॰ मथे
विलोडने॰ अर्दहिंस इहसूत्रेविनाशेतिविपूर्वस्यनशेर्णयंतस्यभाविनाणिलोपेननिर्देशः अकारस्त्वागंतुकः केचित्तुविनाशीतिण्यंतमेवपठंति पस्वा
दीति जुर्वदर्णयंतस्यपाठोनिर्विवाद एव॰ असूयतिः कंड्वादियगंतः निंदादीनामसूयांतानांसमाहारद्वंद्वे सौत्रंपुंस्त्वं स्यादेतत्॰ असूयतेरेव वुञ्वि
धेयोनेतरेभ्यः निंदादीनोण्वुलैवसिद्धेः नहितत्रलित्स्वरजित्स्वरयोर्विशेषोस्ति॰ उभयथाप्याद्युदात्तत्वात् असूयतेस्तुण्वुलिप्रत्ययात्पूर्वमुदात्तं वु
ञि तु आदिरुदात्त इति विशेषः तत्राह ण्वुलेति तृजादयोनेति॰ नकेवलं ण्वुल्विषयकमेवज्ञापकं किंतुप्रत्ययमात्रविषयकमित्यर्थः देविक्रुशोःदीव्या
तेर्हेतुमण्यंतस्यदिवुपरिकूजन इत्यस्य चुरादिर्णयंतस्य च ग्रहणम् शब्दनइति॰ शब्दशब्दने चुरादिः अनुदात्तेतश्च हलादेः आदिग्रहणाभावे हलंता
दित्यर्थः स्यात् तथाच जुगुप्सन इत्यादि न सिद्ध्येत् अस्तिचेहानुदात्तेत्वं गुपादिष्ववयवेषु अचरितार्थस्यानुबंधस्य समुदायविशेषकत्वात् जुचंक्र एम॰
म्यजंमिद्रमीयङंतोपरस्परमिति निंदादिसूत्रेहि तच्छीलादिषु वासरूपविधिनातृजादयोनेतिज्ञापितं इहतुताच्छीलिकेषु परस्परं वासरूपविधिर्नेति ६६

[illegible]इतिभावः नयेः अयपयतयनयगतावितिपठितस्यनयतेर्नोयंनिर्देशः अनुदात्तेत्वादेवयुचः सिद्धत्वात् किं[illegible]परमितिमत्वा[illegible] पकारांता दि
ति [illegible]पिताक्ष्मा प्यिमीति· क्नूपीशब्दे क्ष्मापीविधूनने·सूददीप ताच्छीलिकेष्विति· परस्परमितिभावः प्रापिव[illegible]मिति [illegible] भाष्यमवलंव्ययुज
योस्वसमावेशइतिमतव्यंकिंतुप्रापिकत्वएवभाष्यस्यतात्पर्यम् तेनगमेर्लषपतपदेत्युकञ्विषयेतृन्नपि·गंताघातुकः बोकयनसेति विंतुणिविषयेपु ज[illegible]
विकल्पीति कल्यनइत्यादिसिध्यतीतिभावः जल्पभिक्ष· कुट्टच्छेदने·लुंठस्तेये चौरादिकौ जि दृक्षि जिञ्अभिभवे द्दङादरे क्षि क्षये क्षि निवासगत्योः श्रित्रं सेवा
याविपूर्वः व्यथभयचलनयोः नञ्पूर्वः निपातनान्नञोधातुनासमासेनलोपेततः प्रसयः प्रसवीति· सूप्रेरणे· अस्मादिनिः सूतिसूपत्योस्तुसानुबंधः
त्वान्नेह ग्रहणं जिदृक्षीत्यन्नैव प्रजुं पठित्वा पूर्वसूत्रं त्यक्तुमुचितं·एवंहि पृथक्विभक्तिश्चकारश्च मास्त्विति सुवचम् स्पृहिगृहि·तन्पूर्व इति·नञ्
[illegible]पिनिपातनादितिवाध्य[illegible] दाधेट्सिशदसदो रुः इत्येवं त्रयाणामेवग्रहणमित्याहुः भंजभा·भंगुरइति·भजेः कर्मकर्त्र्येव·अभिधानस्व
भावादित्याहुः विदिभिदि·विदेर्ज्ञानार्थस्यैवग्रहणं नलाभार्थस्य व्याख्यानात् छिदुरमिति कर्मकर्त्तरीति वृत्तिः नेदं[illegible] तथाचमाघः मु
ख्येकर्त्तरि प्रायुंक्त प्रियतमायवपुर्गुरुमत्सरच्छिदुरमादुरयाचितमंगना इति जागुरूकः जागुरितिपंचम्यंतं ततश्चाच[illegible] जागर्त्तेरिति जागरूकइतिसि
द्धरूपमेवनतुनिपातितम् उत्तरत्र [illegible]इति प्रसंगात् यजजपदंश[illegible] पूकइति· जपजभदहदशभंजपसांचेतिनुक् वावदूकशब्दस्तुउलू
कादयश्चेत्यत्रवक्ष्यते माघ[illegible] कुमोदिगणे[illegible] ऊकेतिपाठाद्वेयङ्ताइदेरूकप्रत्यय इति· सनाशंस सन्निति प्रत्ययग्रहणं तदंतग्रहणं ष
णुदाने षणसंभक्तौ वितिधात्वोस्तु नेह ग्रहणम् [illegible]दिषु विजिगीषुशब्दस्यपाठात् आङःशंसुइच्छायां विंदुरिच्छुः वेत्तेरिति· ज्ञानार्थस्यैवग्रहणं ने
तरेषाम् एवमिषेरपीच्छार्थस्यैवग्रहणम्· नतुइष्यतीष्यत्योः अनभिधानात्· निपातनाद्वेतिभावः क्याच्छंदसि कित्ययः [illegible]इतिव्याख्यानात् कंडू
दियगपिगृह्यते· तेननतु[illegible] नस्तनः सपर्यैमसंपर्य्येवः यमस्ययोनौ शकुनंभुरण्युमित्यादिसिद्धम् अथकथंसततः प्रणापिवाक्या[illegible]

उ·

म·ति· नित्यनसपव: इति भट्टपादाः मृग्याण्वादिषु अस्यश शब्दो द्रष्टव्यः सुम्नयुरिति· नच्छंदस्यपुत्रस्येति निषेधात्क्यचिचेतिईत्वमछंदस्यात्वेतिदीर्घश्च न भव
६७ ति आदः आदितिदकारोमुखसुखार्थः नत्वयंतकारः तेनतास्परत्वाभावात् ऋइत्यनेनदीर्घोपिगृह्यते· ततुरिः जगुरिः तरते गिरतेश्च वहुलंछंदसीत्युत्वे
रूपमइतिप्राचः वस्तुतस्तु आदिप्रकृतिविशेषग्रहणमुदाहरणप्रपंचमात्रं· किकिनौ लिड्वत्येतावन्मात्रंतु विवक्षितं तथाचवार्त्तिकं
किनावुत्सर्गश्छंदसिसदादिभ्योदर्शनादिति· उदाहृतंचभाष्ये· सेदिर्नेमिरित्यादि· एवंस्थिते आदितितपरकरणेपि नक्षतिरितिध्वनयन्नाह· आदंताद्दृंतादिति·
वभ्रिर्वज्रमिति नलोकेतिषष्ठीनिषेधाद्वितीया· किकिनोस्यानेतिकादय्रस्तुन· लिड्वदित्यतिदेशेन स्वरूपावाधेनैव कार्यातिदेशात् छांदसस्तत्र ह।
योपन्यसनंभाषायामित्यादिवार्त्तिकविशेषविवेचनार्थम्· इहचवार्त्तिकेगमिर्यद्यपिन दृश्यते तथापि धातुवृत्तौ कचिद्वृत्तिपुस्तके च दर्शनादुपन्य
स्तः नीगभावश्चेति· नीग्वंचिंत्यादिसूत्रेणान्तस्यनीगागमस्याभावइत्यर्थः प्रयति हरिं श्रीरिति· प्राचातु अयं स्येतामिति कर्मणि क्विबुदाहृतः तत्र क।
र्त्तरिकृदितिहत्रविरोधः स्पष्ट एव वैकल्पिकंतु अगतिकगतिः एतेन श्रीयतेइति श्रीरिति कर्मणि तिङ्विग्रहोनतु श्रयंतीतिकर्त्रर्थेन कर्मणि क्वि
पोविधानादिति प्राचो ग्रंथव्याख्यातॄणामुक्तिरपिप्रत्युक्ता· अतएव जुहूरित्यस्य जुहोत्यनयेति प्राचां विग्रहोप्युपेक्ष्यः तथाच जुहूरित्यत्र ह
रदत्तेनोक्तं करणस्यात्रकर्तृत्वविवक्षेति· एतेन धीरितिव्याख्यातं· भुवः संज्ञांतरयोः धनिकेत्यादि· तेनग्रामयोरंतरे यत्तिष्ठति तत्र भवनेति भावः ए
तच्च दृष्टिग्रहणानुवृत्तेर्लभ्यते· नन्वेवं प्रतिभूशब्दः संज्ञेति फलिते तत्र संज्ञायामित्येवसिद्धं किमनंतरग्रहणेन अत्राहुः यावद्द्रव्यभा[illegible] विन्यः सं
ज्ञाः प्रतिभूशब्दस्तु सत्येवतस्मिन्नृणप्रदानेन निवर्त्तते इति दाम्नी· दशेति नलोपिनो निर्देशो ज्ञापक कचिदक्ति त्यपि दंशेर्नलोपोभवतीति ते
न श्रुटिदर्शनादंशाः दंशदर्शने इति सिद्धं नचसन्निधानात् ष्ट्रन्येव नलोपः स्यादितिवाच्यं शुनो दंतदंष्ट्रेति निर्देशात् तच्चेदिति· एतेन हलस्तरकर
णाभिधेयत्वमुपपादत्वंचनिरस्यति· मुखमित्यर्थइति तत्रैवरूढेरितिभावः आर्त्तिलूधू· धूइति कुटादिरेवगृह्यतेनिरनुवंधकत्वात् अतए एम
वगाङ्कुटेतिडित्वाद्गुणनिषेधेउवङ् तदाह धुवित्रमिति अर्थोणादयः क्तवापाकारुभिशस्यनिकारके इति धरणिको भिप्रेत्याह· कारि ६७

स्याद्... योगरूढिः द्वितीये तु योगमात्रमिति विवेकः अत एव द्वितीये धात्वर्थप्रतिकारकान्वयो भवत्येव तथा च भट्टिः राघवस्ततः कार्मुकात्पीन पंग
वः सर्वबाणासेनो नामाश्वागमनमादिशत् इति· पायुः पुंसि गुदं त्व पानं पायुर्नेत्यमरः पिबत्यनेन तैलादिकमिति विग्रहः पातिरक्षतिइति विग्रहे ... ।
पि· तथा च मंत्रः भुवस्त्वं स्वतवांः पायुरग्ने इति· स्वतवान्पायाविति रुत्वं· जायुरिति· भेषजौषधभैषज्यान्यगदो जायुरित्यपि इत्यमरः साहचर्यात्सु
त्वंमायुः पित्तमित्यमरः शब्दोपि मायुः पश्यशुर्मायुमकृत· गोमायुरेको अजमायुरेक इत्यादौ वेदभाष्यकारादिभिस्तथैव व्याख्यानात् स्वदते रोचते इति स्व
दुः विशेष्यं निघ्नोयम् एवं साधुरपि· आशु शीघ्रमिति· विलंबाभावमात्रपरत्वे क्लीवं तद्विशिष्टद्रव्यपरत्वे तु त्रिलिंगम् अथ शीघ्र मित्यमरः ... क्लीवे शी
घ्रोघस्त्रेस्यात्रि ष्वेषां भेघगामियदित्यमरः व्रीहौ तु पुंस्येव· छंदसीणः उणानुवर्तते· मान आयाविति· आयुशब्दो मनुष्यपर्यायेषु वैदिकनिघंटौ प
ठितः अत एव त्वामग्ने प्रथममायुम...वे· मानस्तोक इत्यादिमंत्रेषु वेदभाष्ये तथैव व्याख्यातं अर्वाचीनास्तु छंदसीण इति सूत्रे बहुलवचनाद्भाषा
यामपि प्रवर्तत इति स्वीकृत्य आयुः ... चिरकालो नाइत्यमरग्रंथे आयुशब्दमुकारांतं व्याचख्युः । वायुना जगदायुनेति वर्णविवेकः एतेषां ... स्वा
त्ययेसकारांतो वक्ष्यमाण आयुःशब्दस्तु लोकवेदयोर्निर्विवाद एव अत एव जरा आयुरस्येति विग्रहे गृध्रं हत्वा जटायुषमिति प्रयोगः कथं तर्हि मा
वधिष्टा जटायुं मामिति भट्टिः तदीयं विंध्यपादे ... जतजटायोः प्रथयन्जिह्रति विंध्यवर्णने अभिनंदश्चेति चेत्· अर्वाचीनमते तावदद्रमेव वस्तुतस्तु
जटायुयाति माप्नोतीति जयपुः मृगय्वादित्वात्कुः ... आयाति स्मायुः ... जयायुवविद्यादायुं तथायुषेति द्विरूपकोशः चाट्विति चटु चाटु प्रियं वाक्य
मिति हृद्वचंद्रः चाटु चाटुकतकसंभ्रम ... गात्त्वमगमद्रमणीषु इति माघः चाटुर्नरि प्रियोक्तिः स्यादिति रत्नमालाकोशः नरि पुंसि च कारः त्ववहुभ
चाटून्प्रौढयोषिद्वदस्य ... इति माघः ... पिपठित्वा आहुरित्येके बाहुलकादिति तु वहवः सस्येति किंशारुर्नो सस्यशूके विशिखे कंकपत्रिणी
तिमेदिनीकोशः ओरच्छलः ... न इति तरतेः ... निर्देशः केचित्तु त्रोरिति छित्वा त्राधातोरपि प्रत्ययात् इयर्त्ति अर्यते वा आलुः शाकविशेषो घटी वेत्यादि

उ॰ म॰ ति॰ कर्कर्यो लुर्गलंतिके स्यमरः नृमृशी कूरीति भर्भः स्वर्गो हरे पुंसीति मेदिनी भरुर्भर्त्तृकनकयोरिति हेमचंद्रः शयुरिति अजगरे शयुर्वाहस इत्युभौ इत्यमरः
६८ तरुरिति तरंति नरकमनेन, रोपकाः तरुरिति अनवलाविंतानरूपक्व अदन इत्याज्ञिकाः त्रि वृद्धर्वे अधिकरणोप्येवं उगणादिभ्यो यदिति सूत्रेकेष
ट स्वाहस्थालीवाची चरुः शरुः नास्त्र्यायुधे नेभाकृ इति विश्वप्रकाशे तु चरुर्भांडे च हव्यान्ने इति नानार्थे तोक्ता अथ पुमान् चरुर्हव्यान्नभांडयोरिति मे
दिनी च हव्यपाके चरुः पुमानित्यमरः अथ कर्मार्थे तेन कर्मधारयमधिकरणाद्यन्तं तेन षष्ठीतत्पुरुषं वा श्रिसह धाम्या वृसायणाः स्वाम्यादयोर्थे नाना
र्थतायामनुकूलाः तनुः काये त्वचि स्त्री स्यात्रिष्वल्पे विरले कृशे धनुः पुमान्प्रियालद्रौ राशिभेदे शरासने इति नानार्थे मेदिनी विश्वप्रकाशमुदाहृत्येति धनुभ
वात्वेसादि स्यात् तनुस्तनुषासार्धमित्युत [illegible] मिरनुषज्यते शुद्धवंशजनितोपि गुणास्यस्थानतामनुभवन्नपि शङ्कः शिंजुरेनमृजु [illegible] पसंतापभ
कमिति श्रीहर्षश्लोकशेषः धनुर्वंशविशुद्धोपि निर्गुणः किं करिष्यतीति धन्वंतरिः केचित्तु इह हस्वं धनिन्न पठंति तेषां मते सकारांत धनुषशब्दमेवाश्रि
त्योक्तग्रंथस्य निर्वाह्याः तस्यापि पुंस्त्वात् उक्तं ह्यमरेण अथास्त्रियौ धनुश्चापाविति किन्नरइति तुरंगवदनो मयुरित्यमरः [illegible] त्वं तुने
ह वाहुलकात् कर्तरि रसनामिति कद्रुः कद्रुः स्त्री कद्रोर्हिरण्यां लताराजिकयोरपि नपुंसकमकार्यं स्यात् पुंल्लिंगोरसमात्रके त्रिषुतद्वद् [illegible] गंध्योश्च म
त्सरेपि स्वरेपि चेति मेदिनी वटनीति वटुर्द्विजसुतः स्मृत इति संसारावर्त्तः नटवटुरिति तूपचारात् दंसोस्त्यादिरयम् कविकल्पद्रुमादि [illegible] णपात् ।
अभिव्याप्येति यद्यपि फलिपाटीत्यादि सूत्रं यावदनुवर्त्तत इति न्यासग्रंथेन मर्यादीकृत्येसपि प्रतीयते तथापि अभिव्याप्येत्येवोचितं पिवंते सोम्यमध्वि
त्यादीमूर्ण्या [illegible] शब्दस्याद्युदात्ततादर्शनात् वोतोगुणवचनादिति सूत्रे हरदत्तेन अभिव्याप्येति स्पष्टमभिधानाच्चेति भावः त्रपुसीसमिति तद्धि अग्निं दृ
ष्ट्वा त्रपु [illegible] जतइव त्रपुसीसकरंगयोः इति मेदिनी कोशः हनुरिति हनुः पुमान्कपोलगंडादिति वररुचि कोशः स्त्रीलिंगोप्ययं हनुर्हट्टविलासिन्यामस्त्र राम॰
योर्वलगर्दस्त्रियां द्वयोः कपोलावयवे इति मेदिनी कोशः अतिशायने मतुप् हनुमान् अन्येषामपि दृश्यत इति दी [illegible] दीर्घः हनूमा ६८

नं लोके आधातीतिवंधुः प्रज्ञादित्वाद्बांधवः मनुरादिराजो मंत्रश्च विंदुः पवर्गीयादिः कंदुरिति स्कंदत्यस्मिन् जनं तां पवर्गीयसंयामो गरस्थानमित्याद्द्रुः अ
मरस्तु द्वे वा क्लीवे ऽवरीषं भ्राष्ट्रोनाकंदुर्वास्वेदनी स्त्रियामिति कंदुर्वानाइति पूर्वेणान्वयाद्धापुमानित्यर्थः सृजेः सुगम च सृजतीति रज्जुः रियां र
ज्जुर्वेणयोः सेयोषिदिति मेदिनी आगमसकारस्य श्चुत्वेन शः जश्त्वेन जः तर्कुरिति कृत्सते नेनेति विग्रहः तर्कुः टी सूत्रलात तर्कुरिति हारावली कोशः
फलि पाटि सकारोपि षष्ठी विषयभेदाद्विद्यते गुणागमे हि फलेरेवमेव षष्ठी पद्यायादेशचतुष्टय विधौ तु पाद्यादिभ्यः स्थानषष्ठी सापिध्न तयोर्विभो
अंरस्य लुपं संहियतइति विवेकः अनागमकानां सागमका आदेशाइति पक्षे तु स्थानषष्ठ्येवेति बोध्यम् फल्गु वसारेऽभिधेयवत् मिरीभेदे मलया
स्त्रीति मेदिनी वल्गु वल्गु वलसंवरणाइतिदंतोष्ठ्यादिः यत्तु ज्वलदत्तेन सूत्रे पवर्गीयादिं पठित्वा वलप्राणन इत्युपन्यस्तं तत् विरोधाद्दुष्टम्
अयं नाभावदतिवल्गु वोगृहे इत्यादौ दंत्योष्ठ्यपाठस्य निर्विवादत्वात् धरणिकोशस्य माह वल्गुरित्यादि वल्गुर्वे श्वानरे स्तूलभाराणि चमरु ड्वजे ।
विशालेन कुलेपुंसि पिंगले त्वभिधेयवत् इति मेदिनी कोशः अन्यतोपीति भः कुश्चेति वक्तव्ये प्रोक्तप्रत्ययनिर्देशादित्याद्दुः अश्चेति भ कुं सृष्टेन च
कारेण प्रकृत्यंतरसमुच्चयाच्चेति बोध्यम् एभिः सृकुः प्राज्ये ऽभिधेयवत् सुभि त्यादेवलोके कृपभेदपरागयोरिति मेदिनी विधुरित्यादिर्विश्च को
शः इह सूत्रे धृषि हृषिभ्यश्चेति पठित्वाह धृषुर्हर्षुः स्याग्निशनिगृहवोपि धृषव इति केचित् कृगोः करोतीति केचित्तु सूत्रे कृ इति दीर्घं पठित्वा किरती
ति विगृह्णंति कुरुर्नृपांतरे भक्ते पुमानसुभूम्नि नीवृति मेदिनी सुकामे त्यादि एतच्चन्यासाद्यनुरोधेनोक्तम् वार्त्तिककृता तु स्थास्थिन्स्थूनामिति सू
पसंख्यातम् अपष्ठुः पुंसि वाले च वामे स्यादन्यलिंगक इति मेदिनी अजिहृशि अर्जं अर्जने अस्य ऋजिरादेशः दृशेः पशि कमेस्तु गागमः अम
रोगगत्यादिषु अस्य धुगागमः पणि नाशने धातुः अस्य दीर्घः वा ष्टुलोडने अस्य हादेशः षड्भ्योपि कुप्रत्ययः स्यादित्यर्थः श्रविशोवेतोति भ
वादिगणे तु पश्चिति पठितम् प उदर्शस्यर्थे मंत्रयमिति धारणिः कंतुः कंदर्पः इः कंतुर्मकरांक इति त्रिकांडशेषः पांसुरिति पडि पांसिनाशने वार

म·ति सांतः स्त्रीपुंसयोरिति उक्तंच मरोपाद्दो परौ द्वयोः भुजवाहू इति परौ द्वौ भुजवाहु शब्दौ द्वयोः स्त्रीपुंसयोरिति तदर्थः अकारांतो [illegible]
६९ दोश्च भुजयोः पुमानिति द्यामोदः स्याद्बाहा भुजे पुंसामानमानमेदाश्च दृषवा पुष्विति मेदिन्यां टावंतोप्ययम् प्रथिम्रदिप्रथते इति पृथुः पृथुः स्यान्मह
ति त्रिषु त्वक्पत्र्यां कृष्णजीरे च पुमान् [illegible] उच्यते इति मेदिनी म्रदिंतुं शक्यते अकठिनत्वादिति मृदुः कोमलः भृगुः पुमान् मुनौ हरे तटे शुक्रे इति मे
दिनी भृगुः शुक्रे प्रपाते च जमदग्नौ पिनाकिनि [illegible] शांतरम् लघुरिति एकापां स्त्री लघुः क्लीवं शीघ्रे कृष्णागुरुण्यपीति त्रिकांडशेषः लघुरीरी
चमनोज्ञे निःसारे वाच्यवत् क्लीवं शीघ्रे कृष्णागुरु [illegible] च पृक्कानामौषधौ तु स्त्रीति मेदिनी नृपप्रभेद इति एतेन अवेस्सधातोर्गमनार्थम थेवि [illegible] कारना
सारघुमात्मसंभवमिति व्याख्यातम् वहुरिति बहुस्त्र्यादि संख्यासु विपुले त्वभिधेयवदिति मेदिनी उरुः स्त्र्यथ्यातियत्तु ऊरुर्जंघेति उज्ज्वलदत्तः [illegible]
जंघा तु प्रसृतास्त्र सक्थि क्लीवे पुमानूरु [illegible] मरः ऊर्णूयते आच्छाद्यते इत्यूरुः कर्मणि प्रत्ययः ऊरुमहदिति कर्त्तरि प्रत्ययः उय [illegible] हिंसार्थः का
र्येष्विष्यतिल गतिव्याप्रियत इति यावी पर्शुरपीति पर्शुः पार्श्वनामहेति विश्वः हरिद्रुर्दुस्स इति दारुहरिद्राइत्येके तन्द्वा [illegible] घुंडुभ्यामिति म
खरुशब्दस्य क्रूरे मूर्खे इत्यर्थद्वयं दशपादीवृत्त्यनुसारेणोक्तम् खरुः पतिंवराकन्येत्यपि बोध्यम् खरुर्दर्पे हरे दर्पे हये श्वेते तु वाच्यवदिति विश्व
त्रिकांडशेषो मंकुरिति शकिशंकायां शंकते स्मादिति शंकुः कीलेगरे शस्त्रे संख्यापादपभेदयोः पादोभेदे च पापे च स्थाणावपि च दशपत इति वि
श्वः पीपुरिति पीपुः काले रवौ घूक इति मेदिनी क्रिमिविशेष इति नीलंगुः क्रिमिजातौ स्याइंभराली प्रसूनयोरिति विश्वः पाठांतरमिति नीलंगुरप
पिनीलंभ [illegible] विश्वः धातोरपीति केचित्तु नीलशब्दे उपपदे गमेष्टिलोपः उपपदस्य मुम् दीर्घश्च पाक्षिकोनि पात इत्याहुः लिंगवृत्ते नपुंसक
मितिर्विवरहश्चिः मृगयादयश्च मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनीति मेदिनी मृगयुर्ब्रह्मणि व्याघ्रे गोमायुव्याधयोरपि देवयुर्धार्मिके स्यात्तो राम·
मित्रयुर्लोकयात्रिक इति विश्वः आकृतिगण इति तेन पील प्रतिष्टंभे अस्मात्कुः पीलुर्गजे द्रुमे कांडे परमाणुप्रसूनयो रिति विश्वः [illegible] पीलुशः ६९

स्यार्थमसिद्धिः गजेतुम्लेच्छप्रसिद्धिरित्याश्रित्य स्यव जहुः कुडिमदे कंडुरित्यादिवो ध्यं· वा[illegible]इति वा[illegible]स्यामितिमे
विश्वरः वाष्पुरोगर्द्भ इत्यन्ये वाष्पुराबाशिताराश्यौरितिमेदिनी चंकुर इति चकिः सौत्रो धातुः चंकुरः स्यंदने [illegible] इति मेदिनी अंकुरो हृधिरे लोम्नि पानीं
येऽभिनवोद्भिदीति च खर्जूरेति अंकूरोंकुर एव चेति विश्वप्रकाशः व्यथेः व्यथ भयचलनयोः अस्मादुरच् [illegible] त्याद्यातोः संप्रसारणं च दशपादां तु
धः कि चेत्यपि परित्याधकारमंतादेशं विधाय विधुरोऽग्निकर इत्युदाहृतं माधवेनापि तदेवानुसृतम् न त्वेतद्युक्तम् स्वमे षां विथुराशवांसि अतिविद्धा वि
थुरेणा चिदस्रा इत्यादिमंत्रेषु थकारपाठस्य निर्विवादत्वात् पदपि माधवेनोक्तं विदिभिदी स्तत्र व्यथेः संप्रसारणं चेति वचनात्कुरचि थांतरूपमिति तन्न
दतिष्ष्वीपः कुरच्विधायके सूत्रे व्यथेरूपसंख्यानस्याप्रसिद्धत्वात् तस्मादिह धः किच्चेति दशपादीपाठं पुरस्कुर्वतः प्रमादकार्य्योपेक्ष्या कथं
तर्हि विधुर इति प्रयोगस्य निर्वाह इति चेत् धुरो विगत इति प्रादिसमासेनेत्यवधेहि समासांता इति सूत्रे वृत्तिपदमंजयोलिख[illegible] तमकुर इति मकि मंडने
अस्मादुरच् नलोपश्च बाहुलकादिति [illegible] ओरूप धायाः पक्षे उकार इति भावः मुकुरो मकुरोपि [illegible] इति विश्वः मुकुरः स्यात्म कुरवत् दर्पणे बकुलद्रुमे कुला
लदंड इति मेदिनी च० धातोरिति के चित् [illegible] गुणोदुम गमश्चनिरस्तत्त्साहुः कर्बुरश्चेति कर्बुरं सलिले हेम्नि कर्बुरः पापरक्षसोः [illegible]
शवले पुनरन्यवदिति मेदिनी मस श्व मसूरा मसुरा [illegible] वेश्या व्रीहिभेदयोः मसूरी पापरोगे स्या दुपधाने पुनः पुमानिति मेदिनी श्वशुर इति पतिपत्न्योः
प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोरित्यमरः [illegible] इति राजा [illegible] षो महान् तुरीयधाम महिषो विवक्ति उत माता महिषमन्ववेनद् [illegible] इत्यादौ
पु महिषी राजपत्नी [illegible] रोहिषा मृगभेदः स्याद्रोहिषं चतृणमतमिति [illegible] वेदभाष्यमिति इंद्रो वृत्रस्य तविषीम् इंद्रस्यात्र तविषीभिरेनसा
दिमंत्रेष्विति भावः वैदिकनिघंटौ ओजः पाज इत्यादिषु बलनामसु तविषीशब्दस्य पाठश्चेह मूलमिति बोध्यम् तविषः शोभनाकारे [illegible] एव स
पयोः तविषी देवकन्यायां [illegible] स्वर्गे महोदधौ ना विषी चंद्रकन्यायां नास्त्वर्गा बुधिकांचने इति मेदिनी किलेर्वुक् किलश्वै [illegible] क्रीडनयोः किल्विषं

उ·

म·ति· पापरोगयोः अपराधेपीतिमेदिनी इषिरोग्निरिति आहारइत्यन्ये छिदिरः पावकेग्नौ करवालेपरश्वधे मंदिरं नगरेऽगारे क्लीबं ना मकरालये चं

७० दिरो नेकर्पूरे चंद्रे तिमिरं ध्वांते नेत्रामयांतरे मिहिरः सूर्यवृद्धयोः मुहिरः कामिमूर्खयोः रुधिरोंगारके पुंसि क्लीबं तु कुंकुमासृजोः शुषिरं वंशवा

द्येविवरे च नपुंसकम् मूषिके नास्त्रियां [illegible] धीरं धान्विते त्रिषु आशिरो वीतिहोत्रे स्याद्राक्षसे भास्करे पुमान् इति मेदिनी अजिरमंगणं मिरि

अंगे स्फुटि अनादेशस्य बाहुलकात्सत्वमित्येके अन्ये तु विश्वकोशाद्युपष्टंभेन दंस मेवेच्छंति इह दशपादी स्तौ न पूर्वस्य चीर्येते ऋवर्णसे ...ने ।

पास्यतेइत्युक्तं तदपिग्राह्यम् आशुद्रुतमजिरमस्त्रं भौमोऽमित्यादौ नजौ येतौ सजिरइत्यर्थस्यानुगुणत्वात् अजिरं प्रांगणे कायेविषये दर्दुरे ऽ विलेशि

शिशेरानाहिमेनस्त्री ऋतुभेदे जडे त्रिषु सुषिरं शाकभेदे स्त्री ना चंद्रे दंतधावन इति मेदिनी शिविरमिति शेरते स्मिन् राजबलानि निकेतनं ... स्थिरं

मित्यमरः सलिक लि कलिल इति मिहि... मुहनश्च महिलेति महिला फलिनी स्त्रियोरिति मेदिनी पृषोदरेति तथा च दमयंती काव्ये परमहेलारतो यः

पारदारिक इति परस्य महेला स्त्री अथ च परमा उत्कृष्टा हेला क्रीडा तत्र रत इत्यर्थः कपिल इति कपिला रेणुकायां च शिंशपागो विशेषयोः पुंडरी

ककरिण्यां स्त्री वर्णभेदे त्रिलिंगकम् नानले वासुदेवे च मुनिभेदे च कुक्कुर इति मेदिनी रेणुके हलता विशेषः हरेणू रेणुका कौंती कपिला भस्मगं

धिनी समस्त मिथिलादयश्च मथे विलोडने अकारस्येत्वं निपातनात् कुठेर इति कठ कृच्छ्रजीवने कुठिच द्वितीयस्य इत्त्वात् नुमि प्राप्ते आह बा

हुलकादिति केचित्तु पादि सूत्रादारभ्य एतदंतानि सप्त सूत्राणि केषांचिदसम्मतानि कपोत इति कपोतः स्याच्चित्रकंठे पारावतविहंगयोरि

ति मेदिनी कपोतः पक्षिमात्रेपीति त्रिकांडशेषः अत्रौ तच श्वित्वं प्रामादिकम् यत्कपोतः पदमग्नौ कृणोति देवाः कपोत इषितो यदिच्छन् इत्या

दौ सर्वत्र प्रत्ययस्वरेण मध्योदात्तस्यैव पठ्यमानत्वात् कठोर इति कठिनः पूर्णश्च कठोरताराधिपलांछनच्छविरिति माघः किशोर इति किशोरोश्व राम

स्याशावके तैलपर्णौषधौ च स्यात्तरुणावस्थसूर्ययोरिति मेदिनी कटोल इति कटे वर्षावरणयोः केचित्तु सूत्रे कडि मदे इति पठंति कडि मदे कडोलः पिनाक ७८

चंडालस्य चंडालिकातु कंडोलवीणा चंडालवल्लकी त्यमरः पटोल इति पटोलं वस्त्रभेदे नौषधौ ज्योत्स्नातु गोषितीति मे[illegible]नी कल्लशब्दे वा हुल[illegible]दनो
थ्यो [illegible] रन चू कल्लोलः पुंसि हर्षे स्यान्महत्सूर्मिषु वारिणा इति मेदिनी स्पंदेः सिंदूरस्तरुभेदे स्यात्सिंदूरं रक्तचूर्णके सिंदूरी रोचना रक्तचेलिका धातकी
षु चेति मेदिनी विश्वप्रकाशा सितनिसे तु नीलो कुमारक इति मेदिनी सेतु[illegible]लौ स्त्रियां पुमानिति मंडं दधिभवं मस्तु इति चामरः धातुर्नद्रियेषु च श[illegible]सा
नि महाभूतेषु [illegible]रसादिषु मनःशिलादौ श्लेष्मादौ विशेषाद्गैरिके स्त्रियां वेति मेदिनी श्लेष्मादिरसरक्तादिमहाभूतानि तद्गुणाः इंद्रियाण्यश्मविकारः
शब्दयोनिश्च धातवः इत्यमरः आर्तेश्च तुः तुनि प्रकृते अंतोदात्तत्वार्थं तुः क्रियते क्रतुना यज्ञम् यक्रतुर्जनीनामित्यादि क्रतुर्वर्षादिषट्सु च आ[illegible]
मासि च पुमानिति मेदिनी क्रमि मनि क्रमिग्रहणं प्रपंचार्थम् अजिदृशी त्यादिना कुमत्ययेनु किसिद्धत्वात् मंतुरिति मंतुः पुंस्यपराधेपि मनु[illegible]
प्रजापतावपि इति मेदिनी दीर्घह्यंकुशमिति मंत्रस्य वेदभाष्ये तु मंतुम इति मंतुर्ज्ञानेन तद्धन हेइं इति व्याख्याते गातुर्ना कोकिले भृंगे गंधर्वे त्रिषु रे[illegible]
इति मेदिनी भानुर्नो किरणे सूर्ये इति [illegible] चापः किः केतुर्ना रुक् पताकारिग्रहोत्पातेषु लक्ष्मणीति मेदिनी अमुः शरीरमिति अभिलषितार्थश्च आ
प्लव्यत्वात् अत एव अप्रो पोर्मशब्दस्याभिलषितार्थमाप क इत्यवयवार्थमाहुः कृत्नः कतुः क्रतुर्यज्ञे मुनौ पुंसीति मेदिनी एधिवसोश्च [illegible]उः चित्वादं
तोदात्तः स्योनं पत्से वहतुं कृणुष्व वहतुः पथिके वृषभे पुमान् इति मेदिनी आतृकन्जैवातृकः पुमान् सोमे कृषकायुष्मतोस्त्रिष्विति मेदिनी कृषिचमि
रभसकोशस्थमाह कर्षूरित्यादि कर्षूः पुमान् करीषाग्नौ स्त्रियां कुल्यायां [illegible] स्यात [illegible]रिति मेदिनी सर्जूर्वणिजि विद्युति स्त्रियां स्वर्गे विधौ रुद्रे इति स्व
र्जूः कीटांतरे स्मृता खर्जूः पादपे कंडूः खर्जूरी ति च मृजेर्मर्जूः स्त्री शुद्धौ धावकेपि चेति मेदिनी वहः वधूः स्नुषा नवोढा स्त्री भार्या पृक्काङ्गना मुच्चैरिति वि
श्वः पृक्का महिला च वधूरिति त्रिकांडशेषः कषेः कषशिषेति दंडके पठितः कच्छूतु पामपामाविचर्चिके त्यमरः णित्कसिर्वृ गतौ कासूर्विकल
वाचि स्यात्तथा शक्त्या युधे स्त्रियामिति मेदिनी कासूः शक्त्यायुधे रुजि बुद्धौ विकलवाचि स्यात् इति हेमचंद्रः नलवते अलाबूः [illegible] रौ कु[illegible]च म दृ[illegible]ति

नेड्वशीति नेड्वशीतिनेट् वरमनादावितिपरिगणनस्यानाश्रयणात् वाहुलकाद्वा केचित्तु त्रोदुक्कें तिपठित्वा धातोर्दुगागमश्चाहुः तेषां धातोर्गुणो
दुर्लभः चकारवलेन वा साधनीयः दुगागमात्पूर्वं यस्मात्तदपि भवतीति व्याख्यानात् दरिद्रातेः इश्च आश्चेति भोजदेवसूत्रेयलोपइतिरेफादि
केपदच्छित्वा द्वेधा व्याख्यत् रिश्च आश्च दद्रुः रश्च इश्च आश्च अस्यबाधे स्यसदेशस्येति द्वितीये रेफलोपः दद्रुः मृगयादित्वाद्दद्रुः ह्रस्वांतश्च दद्रुः।
णोदद्रुरोगी स्यादित्यमरः इत्थं चत्वारि रूपाणि अंदूर्दंभूः अंदूर्वंधनं स्त्रियामिति अदिवं धने अंदूः स्त्रियां स्यान्निगडप्रभेदे भूषणस्य चेति मेदिनी आ
दुकोहस्ति निगड इत्यमरः संज्ञायां कन् केणइतिह्रस्वः केचित्तु अमगतौ अस्य दुक् अंदूर्वुद्धिरिति व्याचख्युः दभी ग्रंथ इति तुदादिः दंभूरिति मंद
भेकर्द्दुरसर्पः कथकद्रुरयन्ये अस्य रूपाणि हूहूवदित्युक्तम् कैयटोप्यत्रानुकूलः माधवादयस्तु दृढशब्दे उपपदे भुवः कूप्रत्ययः उपपदस्य च हत्वादेशो
निपात्यते यद्वा दन्नितिनोतमव्ययं दर्पार्थकमुपपदम् दन्भूः तरुः सर्पः कपिर्वेति व्याख्याय दृन्करोतियणावर्षाभूवद्रूपमस्येत्याहुः ह्रस्वोपीति उदा
हृतं च विक्रमादित्येन तस्यां जंवोः फलैः सानदी भूयप्रवर्त्ततइति यत्तु परिणतजंवुफलोपभोगहृष्टाइति भारविप्रयोगं ह्रस्वांतत्वे साधकत्वेनोदा
जह्रुः तन्न इकोह्रस्वोङ्यइति सूत्रेणागतार्थत्वात् दिधिमितिकेचित्तु दधातेरित्वं द्वित्वं षुक्च निपात्यते दधात्यसौ दिधिषूरित्याहुः उज्ज्वलदत्तो।
क्तं पाठमाह केचिदिति एतच्च कैयटमाधवादिमहाग्रंथविरुद्धमित्यवधेयम् अतएव दंभूः स्त्रीसर्पवज्रयोरितिभांते मेदिनी मरुदिति प्रज्ञा।
दित्वादणि प्राकृतीपि मरुत्शब्दोप्यव्युत्पन्नोस्ति तथा च विक्रमादित्यकोशः मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुदिति संसारावर्त्तश्च कोपं वातिस
दाक्षिणः स मरुत् इति कविराजः अत्रानुपपत्तिमत्त्वादाक्षिणात्यपवनइतिपाठं कल्पयंत्यन्ये स्वश्वानइति वर्णविवेकः गरुदिति यवादिरयं
तेन मतुपो वत्वं न गरुत्मान् यो मुत्त्व गर्मुत्स्त्री स्वर्णलतयोरिति मेदिनी विश्वकोशमाह हरिदिति हरिद्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः अ
स्त्रियां स्यात्तृणे चेति मेदिनी अरश्यस्येति एते न गातं रोहिड्डूतां रिरमपिषु मृष्यस्यवपुषेति पुष्पदंतप्रयोगो व्याख्यातः रोहिन्मृगपालतभेदे स्त्रीना

कइतिमेदिनी शमेर्ढः वाहुलकादितियद्यपिनेड्वशिकृतीतिइणिनिषेधः सुवचः तथापिनेड्वरमनीशवितिपरिगणनादेवमुक्तम् शंढः स्यात्पुंसि गोपतौ [illegible] आकृष्टा
डेवर्षवरेतृतीयप्रकृतावपीतिमेदिनी कमठइति कमठः कच्छपेपुंसि भांडभेदेनपुंसकमितिमेदिनी जरठइति जृषवयोहानौ जरठः कठिनेपांडौ कर्कशे
प्यभिधेयवदितिविश्वमेदिन्यौ जरठः कठिनेजीर्णे इतिवैजयंती शमेः खः शंखो निधौ ललाटास्थ्नि कंबौ न[illegible]समरः शंखः कंबौ नखेषिच्च[illegible]
निधिभिन्नखेइतिमेदिनी कणेष्ठः कंठो गलेसन्निधानेध्वनौमदनपादपेइतिविश्वमेदिन्यौ फलत्रिकइतित्रिफलात्रिफलाचसतीतिविश्वः त्रिफलाशब्दसमा
र्थस्तु फलाशब्दइति द्विगोरितिसूत्रेरक्षितः शपेः शपआक्रोशे वृषादिभ्यश्चित् स्मृद्राश्चावरवर्णाश्चवृषलाश्चजघन्यजा इत्यमरः वृषलस्तुरगेशूद्रे
ति हेमचंद्रः पललमितिपलगतौपललंतिलचूर्णेचपंकेमांसेनपुंसकम् नाराक्षसेइतिमेदिनी सरलः पूतिकाष्ठेनाथोदारावक्रयोस्त्रिष्वितिमेदिनी
सरलाविरलायंतेघनायंतेकलिद्रुमाः नशमीनचपुंनागाअस्मिन्संसारकाननेइत्यभियुक्तप्रयोगः कमेरिति वाहुलकादित्यत्रानुषज्यते कंवलो ना
जेस्यात्सास्नाप्रावारयोरपि कृमाववप्युत्तरासंगेसलिलेतुनपुंसकमितिमेदिनी मुसलंस्यादयोग्रेचपुंनपुंसकयोस्त्रियां तालमूल्यामाखुपर्णीगृहगो।
धिकयोरपीतिमेदिनी मूर्धन्यमध्योप्ययमितिवर्णदेशना मुस खंडनइतिधातोर्दंत्यांतेषुमूर्द्धन्यांतेषुचवोपदेवात्रेयादिभिः पठितत्वात् उज्ज्वलदत्ता
दयस्तुतालव्यमध्यमप्याहुः अतएवमुसलोमुषलोपिचेतिविश्वकोशेमुशलोपिचेतिपाठांतरम् लंगेरिति वाहुलकादिसेव एवमग्रेपिलांगलं ता।
लहलयोः पुष्पभिद्गृहदारुणोः लांगली जलपिप्पल्यामितिहेमचंद्रः लांगलीतोयपिप्पल्यां क्लीवंतुकुसुमांतरेगोदारणे तृणराजगृहदारुविशेषयो
रितिमेदिनी कुड्मलो मुकुलेपुंसिनद्धौ नरकांतरे कोमलंमृदुलेजले इति [illegible] वाहुलकादन्यत्रापि तद्यथा कुसश्लेषणे दंत्यांतोनिर्विवादः वोपदेवमते
तालव्यांतोपिगुणः कोसलः कोशलावादेशविशेषः वृद्धेत्कोमलेतिसूत्रेतुदंत्यपाठएवसांप्रदायिकः संवसंवंधे शवश्च संवलं शंवलम् शंवलोस्त्री
संवलवत्कुलपाथेयमत्सरेइतिमेदिनी कदि आह्वाने नलोपः गौरादित्वान्ङीष् मंदांदोलितकर्पूरकदलीदलसंज्ञया विश्र मायश्रमापन्नानाद्रूपंत-

उ.
म. टी.
७२ मिवाध्वगानिति काशीखंडम् अजादेराकृतिगणत्वात् द्वावपि कदलाकदलौ एष्यां कदलीकदलौ पुनः रंभाहस्तिध्वजकदलीपताकामृगभेदयोः कदलादि।
स्त्रिकायां चेति मेदिनी पिजिहिंसायां न्यङ्क्वादित्वात्कुत्वं पिंगलो नागभिद्रुद्रचंडांशुपारिपार्श्विके निधिभेदे कपावग्नौ पुंसि स्यात् कपिलेन्यवत् स्त्रियां वे
श्याविशेषे च कारोपा कुमुदस्य चेति मेदिनी कुश इति सौत्रो धातुः कुशूलः शिस्मिते त्रिषु क्षेमे वसुकृते चापि पर्यालोचन पुंसकमिति मेदिनी धावति
वीहुलकाद्ध्रस्वत्वं अथ धवला गवि वृषश्रेष्ठे पुमान्वाच्यलिंगः शुक्ले चेंसुंदरे इति मेदिनी कमुकांतौ कमलं सलिले ताम्रे जलजे व्योम्नि भेषजे मृगभे
दे तु कमलः कमला श्रीवारस्त्रियोरिति विश्वमेदिन्यौ मडि भूषायाम् मंडलं परिधौ कोठे देशे द्वादशराजके क्लीबेऽथ निवहे विम्बे त्रिषु पुंसि तु कुक्कुरे इति
मेदिनी कोठमंडलकमित्यमरः विंबो स्त्री मंडलं त्रिषिति च कुडि दाहे पठगतौ छो छेदने कुंडलं कर्णभूषायां पाशे पि वलये पि च अथ पटलं पिटके
च परिच्छदे छदिरोगतिलके क्लीबं वृन्दे पुनर्नेना छलं स्खलितशाठ्ययोरिति मेदिनी मृजेष्टिलोपश्च मलो ऽस्त्री पापविट्किट्टे कृपणे त्वभिधेयवदि
ति मेदिनी चुपेः चपलः पारदे मीने चोरके प्रस्तरांतरे चपला कमलाविद्युत्पुंश्चलीपिप्पलीषु च नपुंसके तु शीघ्रे स्यात् वाच्यवत्तरले चले इति मेदिनी शकि
म्योः शकलं खंडे रोहितादीनां त्वचि च तद्योगाच्छकली मत्स्यः मत्स्यान्तः शकलानीति भाष्यम् शकलं त्वचि खंडे स्यात् रागवस्तुनि वल्कले इति मेदिनी
मत्स्यः शल्कदे नस्मोरिति नानार्थरत्नमाला छो गुक् छगलं नीलवस्त्रे ना छागे स्त्री वृद्धदारके इति मेदिनी छगलश्छागे छगली वृद्धदारकभेषजे इति हेमचं
द्रः अमं ताडुः अमिति प्रत्याहारः त्रिभ्य एव कणमा इति वृत्तिकारोक्तिस्तु अष्टाध्यायीस्थमात्रविषया दंड इति बाहुलकाच्चुट्ट इति नेत्संज्ञा दंडो स्त्री लगुडे
पि स्यादित्यमरः दंडौ सैन्यार्कपार्श्वगाविति त्रिकांडशेषः रंडा मूषिकपर्ण्यां च विधवायां च योषितीति खंडो स्त्री शकले ऽनेक्षुविकारमणिभेदयोः मंडः पंचां
गुले शाकभेदे क्लीबं तु मस्तुनि चंडा तु पांसुलायां स्त्री त्रिषु हस्तादिवर्जिते अंडं मुष्के च पेश्यां स्यात् षंडं पद्मादिसंघाते न स्त्री स्यात् गोपतौ पुमान् गंडः। राम.
स्यात्पुंसि वह्निनिग्रहयोगप्रभेदे च वीथ्यंगे पिटके पि च चिन्हवीरकपोलेषु हयभूषणबुद्बुदे चंडो नातितिक्ष्णोष्णे यमकिंकरदैत्ययोः चंडी कात्यायनी ७२

नौदेव्यांहिंस्राकोपनयोषितोः चंडाधनहरीशंखपुष्प्यांत्रिष्वतिकोपने तीव्रेपि पंडः शंढे धियिस्त्री स्यादिति मेदिनी फणगतौ फंडः प्रज्ञादित्वादण् फंडमु
दरं कादिभ्यः कित् कुण्डमिति कुणशब्दोपकरणयोः कित्वान्न गुणः कुण्डमग्न्यालये मानभेदे देवजलाशये कुंडीकमंडलौ जारासति[illegible]पुमान् पिठरे तु न नाऽ
ति मेदिनी कांडमिति कमु कान्तौ अनुनासिकस्यक्वीति दीर्घः कांडोस्त्री दण्डबाणार्ववर्गावसरवारिष्वित्यमरः अर्वाकुकुत्सितः अत एव कांडं स्तंबे त
रुस्कंधे वाऽऽणवरदनीरयोः कुत्सिते वृक्षभिन्नाडी वृंदे रहसि नस्त्रियामिति मेदिनी गुडो गोले क्षुपाकयोरित्यमरः गुडाकस्तु ही नद्वत्के शान्त्रस्य गुडाकेशः
शिवः जटाधारित्वात् गुडः स्याद्गोलके हस्तिसन्नाहेक्षुविकारयोः गुडाक्षुद्या च कथिता गुडिकायां च योषितीति मेदिनी स्याच्चतिलचासिद्धे आलच्
आकारश्चिं स्यप्रयोजनः चित्स्वरं वाधित्वा पक्षे आद्युदात्तार्थ इत्येके स्यालं भाजनभेदेपि स्थाली स्यात्स्यात्ट्लो खयोरिति मेदिनी · चाला
लोपश्चकुंडे स्याद्दर्भे चेति विश्वः मार्जो लोपः स्मृतः स्मृद्धे बिडाले कायशोधने इति मेदिनी पातालमिति उपधावृद्धिः पातालं नागलोके स्यात् विवरे वा
डवानले इति मेदिनी चडि कोपे इत्यस्य तु इदित्वान्नुमि अदुपधत्वाभावान्न वृद्धिः यत्तु माधवग्रंथे पति चडिभ्यामालन्निति पठित्वा पातालशब्दे वा
हुलकाद्वृद्धिमुक्त्वा आलजिति वृद्ध्यर्थं णितं केचित्पठंती सुपन्य[?]चंडालशब्देपि वृद्धिः स्यादिति दूषितं तदतिरभसात् एके इत्यपरितोषोद्भावनं ता
द्धीजं तु कुलालवरुडकर्मारनिषादचंडालमित्रामित्रेभ्यश्छंदसि[illegible]ति चंडालात्स्वार्थेऽणं विदधता वार्त्तिकेन तद्भाष्येण च सह विरोध इति बोध्यम् ता
मि विशितमुकांक्षायाम् विश प्रवेशने विड आक्रोशे मृण हिंसायां [illegible]कलसंख्यायेक पिचलने निर्देशान्नलोपः पलगतौ पशिवि विस्तारे तमालस्तिल
के खड्गे तापिच्छे वारुणाद्रुमे विशालास्त्रिद्रवात् राणां उज्जयिन्यां तु [?]ति नृपवृक्षभिदोः पुंसि पृथुत्वेप्यभिधेयवत् बिडालो नेत्रपिंडे स्यात् वृषदंश
कके पुमान् मृणालं नलदे क्लीबं पुंनपुंसकयोर्बिसे कुलालः कुंभे कुंभकारे स्त्रीत्वं जनांतरे कपाले स्त्री शिरोस्थि स्यात् घटोद्भवः शाकलेव्रजे पंचाली

उ.
प.स्तं. पुत्रिकागोलोः स्त्रियां पुंभूम्निनीवृतीतिमेदिनी वाहुलकात् श्यतेरपि शाला शल चलने। स्मात् हुत्रिच्छायाशालानिशानामिति निपातनात्स्त्रीत्वमिति न्यासः
७३ वोपदेवस्तु शालङ्कत्थने इति पपाठ शाला द्रुस्कंधशाखायां गृहगेहैकदेशयोः नाभ्येषे इतिमेदिनी पतेः वाहुलकाद्र्थान्तरेपि पतंगः शलभे शालिप्रभे
दे पक्षि सूर्ययोः क्लीबं सूतेइति मेदिनी सूते पारदे इत्यर्थः तरंगस्तु रंगादीनामुत्फाले वस्त्रभंगयोरितिविश्वः विडंग इति विड् आक्रोशे विडंगः कृमिसे घ्न
घ्ने विडंगो नागरे न्यवदितिविश्वः विडंगस्त्रिष्वभिज्ञे स्यात्कृमिघ्ने पुंनपुंसकमितिमेदिनी मृदंग इति मृदंस्रोदे मृदंगः पटहे घोषे इतिमेदिनी।
कुरंग इति कृविक्षेपे वाहुलकाद्दुत्वं कुरु शब्दे इतिवा सारंगः पुंसि हरिणोञ्चातके च मतंगजे शवलेत्रिष्विति मेदिनी वाहुलकात् नूनये अथ नारंगः
पिप्पलीरसे यमजप्राणिनि विटे नागरंगद्रुमेपि चेतिमेदिनी गनगम्ययोः वाहुलकादमेरपि अंगं गात्र उपाये च प्रतीके चाप्रधानके अंगो देशविशेषे
स्यादंग संबोधनेव्ययमिति विश्वः अंगं गात्रे प्रतीकोपाययोः पुंभूम्निनीवृति क्लीबैकत्वेत्वप्रधाने त्रिष्वंगवति चांतिक इतिमेदिनी क्षय ते छिद्यते छा।
गः पूयते मुखमनेन पूगस्तु क्रमुके वृन्दे इतिमेदिनी खड भेदने खड्गो गंडक शृंगे स्यात् निस्त्रिंशे गंडकेपि चेतिशब्दतरंगिणी खड्गो गंडक शृंगासि बुद्धभेदे
षु गंडके इतिमेदिनी भृञः किद्रूहणं स्वष्टार्थम् अनुवृत्तैवलाभात् भृंगो धूम्याट षिड्गयोः मधुव्रते भृंगराजे पुंसि भृंगं गुडत्वचि इतिमेदिनी शृङ्गे प्रा
भुत्वे शिखरे चिन्हे क्रीडाम्बुयंत्रके विषाणोत्कर्षयोश्चाथ शृंगः स्यात्कूर्चशीर्षके स्त्री विषाणां स्वर्णमीनभेदयोर्ऋषभौषधौ इतिमेदिनी शृंगं विषा
णमाख्यातं शैलाग्रे जलयंत्रके मीनौषधि सुवर्णानां भेदे शृंगी मंपुज्यतइत्युत्पलिनीकोशः अंडन्कस्करंडो मधुकोशासिकारंडे षुदलाटके इतिमे
दिनी वरंडः पतंगावेदी समूह मुखरोग योरिति विश्वमेदिन्यौ वाहुलकात्तरतेः तरंडो वडिशी सूत्रवद्धकाष्ठादिके प्लवे इतिमेदिनी ऋदृशः स्त्रीवत्स
रे प्रपौदरत्तु स्त्रियां प्रपाते च भय पर्वतयोरपि भसत्स्त्री भास्वरे योनाविति च मेदिनी उवेअंवसु लाभिके इति मंत्रस्य व्याख्यायां भसद्गइति वेदभाष्यं एम.
जघन्या पत्नीः संयाजयंति भसद्यौर्यां हि स्त्रियः इत्यत्र भसज्जघनमिति व्याख्यातारः दृणातेः दृषन्निष्पेषणशिला पदृग्स्तरयोः स्त्रियाम्[illegible]इतिमेदिनी ७३

अर्त्तिस्तु सुत्रामस्तुहिनदीधितौ वानरे च कुबेरे च पितृदेवे समीरणे वसुप्रभेदे कर्पूरे नीरे सोमलतौषधौ इति मे[illegible]वो
पमयोः क्रतौ अहिंसोपनिषन्न्यायेना धनुर्यमः सोमपेऽइति च धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ इति विश्वः [illegible] सोम व
ल्कलजांशुके शाणजे त्रसि जेइति मेदिनी भामः क्रोधे रवौ दीप्तौ यामस्तु पुंसि प्रहरे संयमेऽपि च कीर्त्तितः वामं धने पुंसि हरे कामदेवे पयोधरे वल्गुप्रतीपसव्ये
षु त्रिषु नार्यां स्त्रियाम् अथ वामी शृगाली वडवा रासभी करभीषु च पद्मा स्त्री पद्मके व्यूहनिधिसंख्यान्तरेंबुजे ना नागे इति च मेदिनी पक्ष्म पूजायामि
ति यत्तु ज्वलदत्तेन जक्षभक्षहसनयोरित्युपन्यस्तं तन्न तस्य चवर्गतृतीयादित्वात् न च लक्ष्यमपि तथैवेति भ्रमितव्यम् अक्षीभ्यां ते नासिका
भ्यामिति मंत्रे यक्ष्मशब्दस्यांतस्थादित्वनिर्णयात् न च तदुपन्यस्तधातुरप्यंतस्थादिरिति भ्रमितव्यम् जक्षत्क्रीडन् रममाणाइत्यादिप्रयोगाणां
तथा कविकल्पद्रुमादिभिस्सह विरोधादिति दिक् मनिन्प्रत्यये तु नांतः राजयक्ष्मेव रोगाणामिति प्रयोगः यक्ष्मणापि परिहाणिरयोऽइति रघुः द
शपादीवृत्तौ तु इह सूत्रे पक्ष्मीति पवर्गीयादिं पठित्वा सौत्रो धातुः बाहुलकान्नकारस्य नेत्वं ज्ञेत्युक्तो अक्षिपक्ष्मेत्युदाहृतं तन्न पक्षपरिग्रहे इत्य
स्यान्मुनिनाप्युक्तार्थत्वात् नेमः कीलेवधौ गर्त्ते प्राकारे कैतवेऽपि चेति मेदिनी नेमस्त्ववधौ प्राकारगर्त्तयोः अवधौ कैतवे चेति हेमचंद्रः जहातेः जिह्मा
स्तु कुटिलेऽमंदेऽक्लीवं नगरपादपइति मेदिनी अवतेः ओमः प्रणवेंगीकृतौ रोषे इति विश्वः ग्रसेराच ग्रसु अदने अतो मनूधातोराकारश्च ग्रामः स्वरे सं
वसथे वृंदे शब्दादिपूर्वकः इति विश्वः शब्दादिपूर्वको ग्रामशब्दः वृंदे शब्दग्रामो गुणग्राम इति यथा संपूर्वोऽयं युद्धे तदुक्तं संपूर्वः संयुगे स्मृत इति ऊ
मं नगरमिति उमास्तपेका [illegible] क्रतुमिति मन्त्रे वेदभाष्ये स्मो रश्मिरिति सूत्रं तं तु रित्यस्य शुष्मं तेजसि सूर्ये ना इति मेदिनी शुष्मं बलमिति वेदभा
ष्ये युष्म इति युष्मो धनुषि संयुग इति मेदिनी दस्मस्तु यजमाने स्यादपि चौरे हुताशने इति च नपूषणामिति मंत्रस्य भाष्ये तु दस्मो दर्शनीय इति व्याख्यातं त्रिषु
श्यामो हरिते कृष्णे श्यामा स्याच्छारिवा निशोस्त्र मरः श्यामो वटे प्रयागस्य वारिदे वृद्धदारके पिके च कृष्णहरितोः पुंसि स्यात्तद्वति त्रिषु मरिचे सिंधुलवणे क्ली

उ
म.छं. वंस्त्रीशारिवौषधोऽप्रसूतां गनायांचप्रियंगावपिवा गुन्द्रौयमुनायांत्रियामापाडुः स्नत्रिवृतिकौषधेनीलिकायांइतिमेदिनी ईर्ममितिईरगतौव्र।
७४ र्णा स्त्रियामीर्मेमरुः क्लीवेइत्यमरः जनजननेजन्मम् मनिन्नंतस्तुनांतः जनुर्जननजन्मानीत्यमरः उभयसाधारणाः पुजिरुचिरुक्मंतु कांचनेलोहेइतिविश्व
मेदिन्योर्हंतेर्हिंचहिमंतुषारमलयोद्भवयोः स्यान्नपुंसकम् शीतलेवाऽभिलिंगइतिमेदिनी भीष्मोगांगेयघोरयोः भीमोम्लवेतसेघोरेशंभौमध्यमपांडवेघ।
मः स्यादातपेग्रीष्मेप्युष्णस्वेदांभसोरपिग्रीष्मंऊष्मतुमेदपोरितिच अशठधुषि॰ अश्वः पुंभेदवाजिनोरितिविश्वः लड्डकं अभेदेस्यात्फलेवधेखगांतरे
इतिविश्वमेदिन्यौ कणंवपापेमुनौपुंसिकिंएववीजाद्यशीधुषु विश्वात्वतिविषायांस्त्रीजगतिस्यान्नपुंसकम् नानाशुष्क्णांपुंसिदेवप्रभेदेष्वखिले
त्रिष्विति मेदिनी इणाशीभ्याम् शेवंसुखमितिवेदभाष्यम् ह्रस्वइति ह्रसशब्देह्रस्वोन्यकुखर्वयोस्त्रिषुइतिमेदिनी सेवयव्ह दशपादीवृत्तिरीत्याह।
यांत्यनेनेति अन्येतुयजतेर्जकारस्यहकारोनिपात्यतइत्याहुः यह्वशब्दोवैदिकनिघंटौमहन्नामसुपठितः प्रवोपह्वंपुरूणांयह्वंमहांतमितिवेद
भाष्यम् मीवेर्ब्निवेदभाष्येतु अमीवाइति छित्वाऽमरोगेइत्यस्माद्वः ईद्वेत्युक्तं अमीवहावास्तोष्पतेईव्वादिमंत्रास्तत्रानुकूलाः कनिन्युषुवाद्याजन्नरुभ
गोऽश्रेष्ठेनिसर्गेवलशालिनिवृषाकर्णेमहेंद्रेनाइतिमेदिनी तक्षातुवर्धकिस्त्वष्टारथकारश्चकाष्ठतट्इत्यमरः राजाप्रभौचनृपतौक्षत्रियेरजनीप
तौ यक्षेशक्रेचपुंसिस्यात्इतिमेदिनी समानौमरुधन्वानाविस्यमरः अथास्त्रियांधनुश्चापोधन्वशरासनकोदंडकार्मुकमितिच धन्वातुमरुदेशे
नास्त्रीवेचापेस्थलेपिचेतिमेदिनी धर्विर्गत्यर्थः सौत्रोधातुः द्यु — अभिगमनेद्युवासूर्यः प्रतिदिवेति प्रतिदीव्नेदधतआक्तानिइतिमंत्रेनुप्रतिदि
वाकिनवइतिव्याख्यातम् श्वन्नुक्षन् कनिप्रत्ययांताइतिनायंनिर्दिति भावः एतच्चहलंतशब्दप्रकरणेमघवनृशब्देष्वस्यादितंके क्विनुनित्वंस्वीकृत्यो
क्षन्नादीनांसूत्रेनोदात्तनिपातनमाहुः तक्षोरवादुपेक्षितंश्वेति इकारलोपोनिपात्यते पूषेति पूषत्वृद्धौ क्लेदोषधिशशांकयोरितियादवः मूर्धेति मू। रम
र्धानामस्तकोस्त्रियामित्यमरः मज्जेतिएवंतोप्ययं ऊष्मयासार्धमूष्मापिमज्जोक्तोमज्जयासहेतिद्विरूपकोशात् अर्यमातुपुमान्सूर्येपितृदेवांतरे। ७४

पिबेतिमेदिनी परिजायतइत्यादि एतच्चदशपादीवृत्त्यनुरोधेनोक्तं परिज्मानंसुखरथमितिमंत्रस्यवेदभाष्येतुपरिज्मापरितोगंता अजेः परि[illegible]सा।
त्निस्यादिनामन्प्रत्ययःअकारलोपः आद्युदात्तत्वंचनिपात्यतइत्युक्तम् उज्ज्वलदत्तस्तुपरिज्वेतिपठित्वा ज्रुइतिसौत्रोधातुः परिपूर्वः इणादेशः परिज्वा चेद
इत्याह तत्तत्स्वविरोधादुपेक्ष्यम् मातरिश्वेति सप्तम्याअलुक् उदात्त त्वंचनिपात्यतेइहभत्वविषयेसंप्रसारणंनभवति श्वयुवेति सूत्रे अभिव्यक्ततर
त्वेनकुक्कुरवाचकस्यैवश्वशब्दस्यतदंतस्यचग्रहणात् इहसूत्रांतेइतिशब्दआद्यर्थःतेनान्येभ्योपियथादर्शनंकनिन् दशपाद्यांतुइतिशब्दोत्रनपठ्यते
इत्युणादिषुप्रथमःपादः कह्भ्यां करेणुरिभ्यां स्त्रीनेभइत्यमरः करेणुर्गजयोषायां स्त्रियांपुंसिमतंगजेइतिमेदिनी गंधेति कलायश्चेतिवाध्मम।
कलायस्तुसतीनकः हरेणुखंडिकेचास्मिन्नितिवैश्यवर्गेऽमरः हरेणुर्नासतीनेस्त्रीरेणुकाकुलयोषितोरितिमेदिनी विश्वप्रकाशेहनिकुष्ठिकुष्ठरोगा[illegible]
ष्करेस्त्रीतिमेदिनी कुष्ठरोगेसुगंधेचेतिविश्वः नीथेनीथेमघवानंसुतासइतिमंत्रेनीथशब्दस्यांतोदात्तत्वंबाहुलकात् नीथेनीथेस्तोत्रेस्तोत्रेइतिवेद
भाष्यं रथःपुमानवयवेस्यंदनेवेतसेपिचेतिमेदिनी रथःस्यात्स्यंदनेकायेचरणेवेतसेपिचेति विश्वः काष्ठादारुहरिद्रायांकालमानप्रकर्षयोः स्थान
मात्रेदिशिचस्त्रीदारुणिस्यान्नपुंसकम् इतिमेदिनी उषिकुषिकोष्ठःकुसूलेचात्मीयेमध्येकुक्षेगृहस्यचगाथाश्लोकेसंस्कृतान्यभाषार्थाशेषवृत्त
योरितिमेदिनी अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः अर्थोविषयार्थनयोर्धनकारणवस्तुषु अभिधेयेचशब्दानांनिवृत्तौचप्रयोजनेइति
मेदिनी शोथःश्वयथुः शुगतौसत्तेर्णित्त्वसार्थोवणिक्समूहेस्यादपिसंघातमात्रकेइतिमेदिनीविश्वप्रकाशौ जरूथंजरूथोसुरविशेषइतिवेदभाष्यं
वरूथंस्यात्तनुत्राणेरथगोपनवेश्मनोरितिहेमचंद्रः वरूथोरथगुप्तौस्यात्वरूथंरथवेश्मनोरितिविश्वः यात्स्तुत्थोग्रावंजनेतुत्थानीलीसूक्ष्मैलयोर
पीतिविश्वः तुत्थमंजनभेदेस्यात्नीलीसूक्ष्मैलयोस्त्रियाम् सिक्थोभक्त पुलाकेनामधूच्छिष्टेनपुंसकमितिमेदिनी अर्त्तेर्निरिद्राघ[illegible]निको।
थंसचंतामितिमंत्रेनिर्ऋथोहिंसेतिवेदभाष्यं नीर्थमितितुवृत्तिकाराः निशीथस्तुपुमानर्द्धरात्रेस्याद्रात्रिमात्रेचेतिमेदिनी प्रतिसंचारुम[illegible]थमितिमंत्रेगो

उ·
म·ह्र· मितिवेदभाष्यम् यास्कोप्येवंतीर्थमितितुवृत्तिकाराः अवगाथइति गाडोह्रस्वत्वंनिपातनात् समीणाः समिथशब्दः संग्रामपर्यायेषुवैदिकनिघंटौपठितः
७५ श्रिये जातइतिमंत्रेसमिथासुह्वानीतिवेदभाष्यम् युक्तंचैतत् सम्यगेतिजयार्थमत्रेतिकुस्तत्तेः संपूर्वस्यइणः क्तिन्नायंतस्यलोकेपियुद्धार्थकत्वं दृश्यते।
च उक्तंह्यमरेण समित्स्याजिसमिद्युधः तिथपृष्ठपृषुसेचने पृष्ठंतुचरमंतनोस्त्रियामः पृष्ठंचरममात्रेपिदेहस्यावयवांतरेइतिमेदिनी तत्रविशेषोपिपृष्ठ
म् चित्राधिकरणेपृष्ठस्तुवतइत्यादौतथानिर्णीयात् यूथमिति युपुरीषोत्सर्गेनिपातनादीर्घः एवंयूथेपि यूथंतिर्यक्समूहेऽस्त्रीपुष्पभेदेचयोषितीतिमे
दिनी यूथीपुष्पप्रभेदेस्यात् मागध्यांचकुरंटके यूथंतिर्यक्समूहेपिवृंदमात्रेपिभाषितमितिविश्वः युङ्गतौनिपातनाद्गुणः प्रोथोस्त्रीहयघ्राणा
यांनाककट्यामध्वगेत्रिष्वितिमेदिनी स्फायितंचिद्वात्रिंशतइतिद शपाद्यांतुत्रयस्त्रिंशदुक्ताः दंभिवहीतिपठित्वावहप्रापणे उहः अनुद्वानित्युदाह
रणात् माधवीयेप्येवंस्फारमिति नेड्वशीतिनेट् वलिपलोपः स्फारः स्यात्पुंसिविकटे करकादेश्चवुद्बुदेइतिमेदिनी तक्रमिति तंचुसंकोचने चक्रः स्या।
त्कुटिलेक्रूरेपुरभेदेशनैश्चरेइतिविश्वः चक्रः शनैश्चरेपुंसिपुरभेदेनपुंसकं शक्रः पुमान्देवराजेकुटजार्जुनभूरुहोरितिमेदिनी क्षुद्रइति क्षुदिनू
संपेषणे क्षुद्रः स्यादधमक्रूरकृपणाल्पेषुवाच्यवत् क्षुद्राव्यंगानटीकंटकारिकासरघासुच चांगेरीवेश्ययोर्हिस्त्रामक्षिकामात्रयोरपीतिमेदिनी
तृपः पुरोडाशाइतिनतप्राउरुव्यचसमइतिमंत्रेवेदभाष्यकारैः प्रकृतसूत्रेउज्ज्वलदत्तादिभिश्चैस्यंव्याख्यातंदशपादीवृत्तौतुतृप्रमाज्यंकाष्ठंचे।
त्युक्तं तृप्रंदुःखमितितुव्याख्यातंतौमाधवः हिमांशुरित्यादिः शाब्दार्णवः दस्यतिरोगानुक्षिपतिदस्रः दस्रः खरेऽश्विनीसुतेइतिमेदिनी दस्रःखरेच्चा
श्विनयोरितिविश्वः भूयोभिप्रायेति माधवस्तुवृत्तिस्वरसमनुरुध्य अविंदउस्रियाइतिमंत्रेबाहुलकात्सत्वंनेतिव्याचष्ट उस्रोवृषेचकिरणेपुस्रा
र्जुन्युपवित्रयोरितिमेदिनी उस्रागव्युपवित्रायामुस्रस्तुकिरणेस्मृतइतिविश्वः वाश्रोनादिवसेक्लीबंमंदिरेचचतुष्पथेइतिमेदिनी वाश्रारासभ राम·
पक्षिणोरित्येकेमाधवस्तुवाश्रेवविद्युन्मिमातीतिमंत्रेशब्दयुक्ताप्रस्नुतस्तनाधेनुर्वाश्रेतिव्याख्यात् शुभ्रंस्यादभ्रकेक्लीबमुद्दीप्तेशुक्लयोस्त्रिषु ७५

इतिमेदिनी चुक्रमितिचकतरौ चुक्रस्त्वम्लेम्लवेतसे चुक्रीचांगेरिकायांस्यात् वृक्षाम्लेचुक्रमिष्यतेइतिविश्वः चुक्रं वृक्षाम्लेचांगेर्यांस्त्री पुंस्यम्लेम्लवेतसे
इतिमेदिनी अर्हेर्दीर्घश्च आर्द्रीनक्षत्रभेदेस्यात् स्त्रियांक्लिन्नेभिधेयवत् इतिमेदिनी शुचेर्दश्च शूद्रोवृषलः अहहारेत्वाशूद्रेतिश्च तौतुरुद्र्वीधाघो
गएवपुरस्कृतः तथाचोत्तरतंत्रेभग वताव्यासेनसूत्रितम् शुगस्यतदनादरश्रवणादितिकृतेश्रंससंस्यच्छः कृतुसर्वस्य अनेका नरूकुमाख्यान
माभीलेयापसंतापनादिनोरितिविश्वमेदिन्यौ क्रूरस्तुकठिनेघोरेनृशंसेचाभिधेयवत् इतिच वहुलमन्यत्रापिसंज्ञायांवृहपतिरुद्ध्यतिप्रजाः अस्ना।
शंसुखंभावयतिशंभुः शोषयतिशुष्मेत्यादिछंदसिवर्द्धंतुत्वासुष्टुतयः यइमाजजान वाहुलकादसंज्ञाकूदसोरपिक्वचिदित्याशयेनोदाहरति वीनो
त्यादिजोरीचेजीरः खड्गवणिग्द्रव्येइतिविश्वः जीरस्तुजरणेखड्गे इतिमेदिनी ज्यश्चेतितथाचनधातुलोपइतिसूत्रेजीवेरदानुरित्यस्यप्रत्याख्याना
र्थंनैतज्जीवेरूपंकिंतुरकिज्यः संप्रसारणमितिभाष्येउक्तंसुसू सुराचषकमद्ययोः पुंस्त्रिङ्गस्त्रिदिवेशेस्यादितिमेदिनी सुरोदेवेसुरामद्येचषकेस्तु
ए क्वचिदितिविश्वः सुवतिप्रेरयतिकर्मणिलोकइतिसूरः सूर्यः धीरोधैर्यान्वितेस्वैरेवुधेक्लीवंतु कुंकुमे स्त्रियांश्रवणतुल्यायामितिमेदिनीगृध्रः खगांतरेपुंसि
वाच्यलिंगोर्थगृध्नुके इतिचशुरितिनालव्यादि स्यथैः सूरः स्याद्यादवेभटे इतिमेदिनी शूरश्चारुभटे सूर्ये इतिविश्वहेमचंद्रौ सूरः शूरश्चतरणाविः [illegible] पुवि
श्वः सीरोर्कहलयोः पुंसिचीरीझिल्त्यांनपुंसकम् गोस्तनेवल्कभेदेचरेखालेखनभेदयोरितिमेदिनी चीरंतुगोस्तनेवस्त्रेचूडायांसीसकेपिच चीरी [illegible] का।
झिल्यांहितिविश्वः वाविंधेः वीध्रंतुविमलात्मकमितिविशेष्यनिघ्नः वमरश्चवप्रः पितरिकेदारेवप्रः प्राकाररोधसोरितिधरणिः रतिर्देवौ वप्र स्तातेपुं [illegible] नरे [illegible]
क्षेत्रचयेतटे इतिमेदिनीऋजेंद्रऋजगत्यादिषुऋज्राश्वः प्रष्टिभिरंवरीषः इतिमंत्रेऋन्त्रागतिमंतोअश्वायस्यसऋज्राश्व इतिवेदभाष्यम् [illegible]शचीपती
वंतरात्मन्यादिस्याद्योगयोरितिविश्वः अग्रंपुरस्तादुपरिपरिमाणेपलस्यच आलंबनेसमूहेचप्रांतेचस्यान्नपुंसकम् अधिकेचप्रधानेचप्रथमे[illegible]भिधेयम्।
वदितिमेदिनी क्षुरः स्याच्छेदनद्रव्येकोकिलाक्षेचगोक्षुरेइति विश्वमेदिन्यौ खुरः कोलदलेशफे भद्रः शिवेखंजरीटेवृषमेरूकदंवके काजातिविशेषेनाली

वंमङ्गलमुस्तयोः कांचने च स्त्रियां राम्ना कृम्नाब्योमनदीषु च तिथिभेदे प्रसारिएयां करूफलानंतयोरपि त्रिषु श्रेष्ठे च साधौ च नपुंसिक रएांतरे अत्रुः स्मृद्रा
सुते स्तन्नाहुदे पुंसि स्त्रि पृस्फटे स्त्रीव चा सुद्रयोरिति मेदिनी भेलः स्नवे भीलुके च निर्बुद्धिमुनिभेदयोरिति विश्वः भेलः स्नवे मएौ पुंसि भीराव ज्ञे च कुम्सवतः
गुकः स्याद्भागे वैज्ये स्तमासे वैश्वानरे पुमान् रेतोस्त्रिरुग्भिदोः स्त्री वं श्वुल्को योगांतरे सिते नपुंसकं तु रजते गौरः पीतेरुएो श्वेतेविशुद्धेऽप्यभिधेयवल्लीं ऽर्जिम्बित
सर्षपे चंद्रनद्योः पद्मकेसरे गौरीत्वसंजातरजः कन्याशंकरभार्ययोः रोचने रजनी पिंगा प्रियंगुवसुधासु च आपगायाविशेषपियादसांपतियोषतीतिमेदि
नी नदी भेदे च गौरी स्याद्वरुएास्य च योषितीति विश्वः अष्टवर्षा तु या दत्ता श्रुतशील समन्विते सा गौरी तत्सुतो यस्तु स गौरः परिकीर्तित इति ब्रह्मांडवर्द्धनश्री
मङ्गलेडि हेमाद्रिएा उदाहृतम् एतेन गौरः श्रुच्याचारः इत्यादि भाष्यं व्याख्यातम् इएाभूवाकुसुएासु चेति मेदिनी मालं क्षेत्रे जने माला मालापुष्पादिदामनी।
ति विश्वः मालं क्षेत्रे स्त्रियां एकाम्लजाजोसंतरे पुमानिति मेदिनी मालमुन्नतभूतलमिसुसलः क्षेत्रमाहुरमालमिति मेयदूतः मएिपूर्वीयमर्थांतरेपि
रूढः मएिमालास्मृता हारे स्त्री शांदंतक्षतांतरे इति विश्वः बाहुलकात् तिजनिशाने रनूदीर्घत्वं जस्तवः तीव्रातुकटुरोहिएयां राजिकागंडदूर्वयोः त्रिषु सु
त्रे नितां तु चकृटौ इति मेदिनी समिकसेः संकसुको स्थिरे इति विशेष्यनिघ्न अमरः क्वुन् अपूर्वस्य निरुपपदस्य अपिशब्दात्सोपपदस्य अर्थद्वार
क संबंधे षष्ठी प्रकृतिप्रत्ययार्थयोः क्रियाकारकभावात् रजको धावके शुके इति विश्वः रजकौ धावकशुकाविति हेमचंद्रः कुट्टच्छेदने इत्युत्कुट्टयति गौ।
डिकः चषको स्त्रीसुरापात्रे मघमघप्रभेदयोरिति मेदिनी लमकः ऋषिविशेषः कृषेः कार्षकः कृषीवलः कृषकः स एव कृषकः पुंसि फाले स्यात्कर्षके।
त्वभिधेयवदिति मेदिनी स्त्री कुशी कृषिकः फालुइति रत्नकोशः उदकं च उंदी क्लेदने ननु कुनूशिल्पीत्यादिनागतार्थमिदमत आह प्रपंचेति प्राङि संघा
त उपपदम् आङि पएिानन्वनेनैव सिद्धे प्राङि स्तत्र पएिग्रहएां व्यर्थमिति चेन्न उपसर्गांतरनिवृत्त्यर्थत्वात् आपएिक इति वएिकु नित्स्वरेएाद्युदात्तः
आपएोन व्यवहरतीत्यर्थे ठकिं तु कित इत्यंतोदात्तः स्यात् स्याश्येनः पत्रिएि पांडरे इति मेदिनी स्तेन आरः स्तेन चौर्ये इति चौरादिकात्स चाच्पि तु निर्यकाएापि

केचित्तु लामूलमपतये इत्यादिप्रयोगोपष्टंभेन निर्यकारस्यापि ष्टैधातोर्भ्वादिषु माधवादिभिः स्वीकृतत्वात् प्रकृतसूत्रे पि प्रमेपकठनात्तेनशब्दो निर्यकार एवेत्याहुः
हरिणः पुंसि सारंगे विशदे त्वभिधेयवत् हरिणी हरितायां च नारीभिद्वृत्तभेदयोः सुवर्णप्रतिमायां चेति मेदिनी वृजेः किच्च वृजिनं कल्मषे क्लीबं केशे ना कुटि
ले त्वभिधेयवदिति मेदिनी अजिनं चर्मकृत्तिः स्त्री त्यमरः कठिनमिति कटकृञ्जीवने कठिनमपि निष्ठुरे स्यात् स्तब्धे तु त्रिषु न पुंसकं स्थाल्यां कठिनी खटिकाया
मपि कठिना गुडशर्करायां चेति मेदिनी मलमल्लधारणे मलिनं दूषिते कृष्णे ऽत्रतुमस्त्यां तु योषितीति मेदिनी कुंडिनमिति नगरं कुण्डिनमपराजेयया वि
ति श्रीहर्षः कुंडिन ऋषिः यस्यापत्यं कौण्डिन्यः पत्सहं षिपर्वणि दिनेरैवं डितमिति नैत्तिरीयश्रुत्यर्थः द्रुदक्षिभ्यां द्रुगतौ दक्षवृद्धौ द्र विणं नद्यो वित्ते कांचने च प
राक्रमे दक्षिणो दक्षिणाङ्गृतसरलच्छंदवर्तिषु अवामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रियामाते मेदिनी दक्षिणः सरलोदारपरच्छंदानुवर्तिषु वाच्यवद
क्षिणा पांच यज्ञदानप्रतिष्ठयोरिति विश्वः अर्तेः इरिणं शून्यमूषरमित्यमरः इरिणं तूषरे शून्ये पीति मेदिनी तुहिनमिति तुहिर अर्दने लघूपधगु
णो कृते हस्वः तलि पुलिभ्यां च तलप्रतिष्ठायां पुल महत्त्वे तलिनं विरले लोके स्वच्छे पि वाच्यलिंगकमिति मेदिनी महेः कृतस्त्वमिंद्र माहिनस्सन्निति मंत्रे
माहिनो महनीयः पूजनीय इति वेदभाष्यम् क्विब्विचि ष्टचिती तिभाट् क्षोः स्पृडितिशः प्राशो प्राशः श्रीरिति हृदिकारादित्तिङीषु तुन कृत्ससयोपइ का
र इति व्याख्यानात् कृदंतं यदिकारांतमिति पक्षे पि कारग्रहणे न तत्सामर्थ्यादेव केवलग्रहणात् दुर्घटवृत्तौ षिश्री मिस्रपिरक्षित इत्युक्ती त्याह श्रीवेश
रव नाशीभा भारती सरलद्रुमे लक्ष्म्यां त्रिवर्गसंपत्ति विधोपकरणेषु च त्रिभूतौ च मतौ च स्त्रीति मेदिनी जूण्काशेत्यादि मूलोदाहृतं च हुवः चातक्विद्धी
र्घौ स्नुवः कः स्रुगतौ स्रुवोपज्ञयात्र विशेषः अयं स्रुवो अभिजिहर्ति स्रुवेणापावर्णेज्जुहो तीत्यादौ प्रसिद्धः चिच्च स्रुव इत्येव योगविभागः उत्तरार्थः
तनोते च इति संघातग्रहणम् तदाहत्व शब्देति स्त्रियां तु त्वगसृग्धरेत्यमरः केशवोक्तमाह गौर्नेत्यादि गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान्त्वा
सौरभेयी दृग्बाणदिग्वाग्भूष्वप्सु भूम्नि चेति मेदिनी द्यौरिति कर्त्तर्यधिकरणे वा प्रत्ययः दोरिति त्रिलिंगोपमिति प्रागेवोक्तम् जसिसहोरुहत्नि जसु रयेता

उ·
म·क्त·
७७

यंपिप्पयुर्गमिति मंत्रेजसुरयेश्रातायेति नीचायमानंजसुरिंनश्येनमिस्पन्नजसुरिं सुघितंश्येनंनन श्येनपक्षिणामिवेति उतस्यवाजीसहुरिर्ऋतेरुतिमंत्रे
हुरिः सहनशील इतिच वेदभाष्यम् सुपुंसवनेत्वधरे स्नानेसोमनिर्दलनेपिचेतिमेदिनी स्वणः शब्दनेस्वरेइतिच वरणास्तिक्तशाकेपिप्राकृ [illegible]
विति विश्वः वरणोवरणः सेतुः तिक्तशाकः कुमारकइत्यमरः अशेरशच जिह्वेति रस आस्वादने चौरादिकः ततोनंद्यादित्वात्ल्युः रणास श्रेष्ठेतियुज्याअ
थ रसनं स्वदने ध्वनौ जिह्वायांतु नपुंसि स्यात् ... नायां रसना स्त्रियामिति मेदिनी एषाचदंस्पतालव्यमध्ययो रथैक्यवंस्थाभूरिप्रयोगाभिप्रायेणोक्ता वस्तु
तस्तु द्वावप्यर्थद्वयेसाधू तथाहि तालव्यान्तमपिदं साध्वशंवशंवलश्रूकराः रशनापिच जिह्वायामिति विश्वकोशाज्जिह्वायामुभयम् रसनं निस्वने स्वादे र
सनाकांचिजिह्वयोरित्यजयपधरणिकोशाभ्याङ्कांच्यामप्युभयंसाधु रसनंस्वदने चायरसानाकांचिजिह्वयोः रसनंचापि रास्नायामिति विश्वप्रकाशाच्चभ
तिदिक् एवंचेहसूत्रेअश्नुव्याप्तौअशभोजनइतिधातुद्वयमपिग्राह्यं रसआस्वादनेरसशब्देइतिधातुभ्यांतुवहुत्वमन्यत्रापीत्यनुपदंवक्ष्यमा ।
णोपुच् तेनसर्वत्रावयवार्थानुगमोपिसूपपादइत्यवधेयम् उंदेः ओदनंनस्त्रियांभक्तेवलायामोदनीस्त्रियामिति मेदिनी वहुलम् स्पंदनंतु स्तुतौ
नौरितितिश्नारथेऽस्त्रियामिति मेदिनी रोचनारक्तकल्हारेगोपित्तवरयोषितोः रोचनः कूटशाल्मल्यांपुंसिस्याद्रोचकेत्रिष्वितिच चदि आल्हाद
ने चंदनंमलयोद्भवे चंदनः कपिभेदेस्यान्नदीभेदेतु चंदनीति विश्वः चंदनीतुनदीभिदि चंदनोस्त्रीमलयजे भद्रकाल्यां नपुंसकमिति मेदिनी भद्र
काली ओषधीविशेषः भद्रकालीतुगंधोल्पाकासायन्यामपिस्त्रियामिति मेदिनी असुक्षेपणे असनंक्षेपणे क्लीवंपुंसिस्याज्जीवकद्रुमे इतिमे
दिनी अतसातत्यगमने राजपूर्वः राजातनः क्षीरिकायांपियालेकिंशुकेपिचेतिविश्वमेदिन्यौ एवमन्येपिद्रष्टव्याः रंजेः क्युन् वाहुलकान्ककेरपि ल
त्वाभावश्चक्षपणः भूसूः वहुलवचनाद्भाषायामपि भुवनंविष्टपेपिस्यात्सलिलेगगनेजने इति मेदिनी [illegible] निधनंस्यात्कुलेनाशेइतिमेदिनी निधनं । राम·
कुलनाशयोरितिहेमचंद्रः धृषेः धिषणास्त्रिदशाचार्येधिषणाधिपियोषितीतिमेदिनी वर्त्तमाने पृषन्मृगेपुमान् विंदौ नद्योः एषतोपिना अनयोश्च । ७७

त्रिषुश्वेतविंदुयुक्ते पृषुभावि मोऽइतिमेदिनी वृहतीक्षुद्रवार्त्ता क्यां कंटकार्यां च वाचि च वारिधान्यां महत्यां च छंदोवसनभेदयोरिति विश्वः शतृवच्चेत्यादु।
गिदचामितिनुम् वृहन्विपुलः महतीवल्लकीभेदे राज्येतु स्यान्नपुंसकं तल्वभेदे पुमान् श्रेष्ठेवाच्यवदितिमेदिनी महतीनारदवीणा विश्वावसोस्तु वृहतीतु
वरोस्तुकलावती महतीनारदस्य स्यात्सरस्वत्यास्तु कच्छपीति वैजयंती अवेक्षमाणां महतीं मुहुर्मुहुरितिमाघः जगत्स्याद्विष्टपे क्लीवं वायौ ना जंगमे त्रिषु।
जगतीभुवने क्ष्मायां छंदोभेदे जनेपि चेति मेदिनी तत्रवायुवाचिनः पुल्लिंगस्यनुमिजगन् जगंतौ जगंतः इत्यादि द्युतिगमिजुहोतीनां द्वे चेति सुत्यादित
स्यतुनुमभावात् जगत् जगता विस्यादि संचिनोतेरिति सुभूतिचंद्रस्तु संपूर्वाच्छ्यतेः संश्चदित्यादि तृपच्छत्रमिति चंद्रमाइत्यन्येपि वमध्वस्तृपदिं द्राव्रष
स्वेति मंत्रे तु तृपत् शब्दो योगिकः तृष्यन्ति सर्वर्थः वेदभाष्येतु तोदादिका तृपतेः शतृप्रत्यये आगमशास्त्रस्यानित्यत्वात् नुमभावइत्युक्तं नस्यौ ढिवाद
मात्रे एतेनत्वमस्य ब्राह्मणादात्त पस्यि वेत्यादि मंत्रांतरंव्याख्यातम् गौरित्यनुवृत्तौ वेह दूर्भौ पघातिनीत्यमरः छंदस्यसानच् शुगतौ जृषवयोहानौ
एतेनप्रमन्महइत्यादि मंत्रद्वयेपि शवसानशब्दस्य गंतृपरतया सौष्ठवेवाहुलकोपष्ठंभेन क्लिष्टव्याख्यानेनातीवादर्तव्यं ऋजिवृधि ऋजिभर्जेने इदि
त्वान्नुम् ततएव नलोपाभावः एवंच अयं मंदिसहीचपूर्वसूत्रे एवपठितुं शक्याः किंत्वतुवृधावेवोपयुज्यते उत्तरसूत्रेपि गुणाग्रहणं सुत्यजं अ
र्त्तेः शुद्धवृधेः किदित्युक्तौ सर्वसामंजस्यात् ऋंजसानो मेघ इति ऋंजमानः पुरुवारउक्थैः अस्मिन्यज्ञे मंदसाना वृषस्वेवसुह इत्यादि मंत्राणां भाष्येतु।
योगिकार्थ एव पुरस्कृतः अर्त्तेः धातोर्गुणः असेयस्य शुडागमः आ[illegible]भाष्ये शंसानाय शत्रूणां हिंसित्रे इति व्या।
ख्यातम् युधिवुधिवाहुलकात्कृपेरपि कृपाणः खड्गः कृपाणो नक[illegible]दानसमर्थेयः स्वकीयं वि मुंचति [illegible]
अस्मज्जुहुराणा मेनः इति मंत्रे जुहुराणां कौटिल्यकारिएनः पापं युयोधि [illegible] त्रिष्विता वर्णे अस्मात्सनंतादान [illegible]सनो [illegible]
तकारस्यदकारः किदित्यनुवृत्तेर्न गुणः पुराणकर्मेति सहि उज्वलो भ [illegible] [illegible]कर्मेति विशेष्यनिघ्नेष्वमरः अरुः पुंस्युक्तं [illegible]

उ.
म. कृ. मित्यर्थः इह क्षीरस्वामी प्रकृतसूत्रे विस्मृत्य श्विदिं श्वैत्ये अस्मात्क्तिटः कानजिति व्याख्यत् तत्तुच्छम् कानच्छ्कां दसत्वात् इति त्वेनैनलोपापत्तेश्चे
७८ तिदिक् कृत्स्नकर्मेत्यमरे पाठांतरम् पापकर्मेत्यर्थः तत्रावयवार्थानुगमस्तु सत्यर्थे बलेन बोध्यः शुद्धो भवितुमिच्छतीत्युक्तत्वाहि इदानीमशु [illegible]
ते तृन्तृचौ अप्तृन्निति सूत्रे नप्त्रादिपाठेन ज्ञापितं औणादिकपोस्तृन्तृचोस्तत्राग्रहणमिति अतोत्र दीर्घानेत्युदाहरति शास्तारावित्स्त्रा[illegible]नत्वाद्यु।
दात्तः तथा च मंत्रः ग्रावग्राम उत शंस्तासु विप्रः इत्यादि शब्दात् शासु अनुशिष्टौ शास्ति विनयति सत्वान् शास्ता बुद्धः शासनेऽशास्तरः शास्ता समंतभा।
द्रे ना शासके पुनरन्यवदिति मेदिनी प्रपूर्वस्तु अप्तृन्निति दीर्घः प्रशास्तारौ प्रशास्तारः क्षत्ता शूद्राच्च वैश्याजे प्रतीहारे च सारथौ भुजिष्यातनये पि स्या।
त् नियुक्ते धसोः पुमानिति मेदिनी कोशानुसारेणाह वैश्यायामिति अमरस्तु क्षत्रियायां च शूद्रजे इत्याह याज्ञवल्क्योपि क्षत्रियामागधं वैश्यात्
शूद्रात्क्षत्तारमेव चेति इह बहुलमन्यत्रापीति सूत्रे प्रपंचार्थत्वादुपेक्षितं नप्तेति नञः प्रकृतिभावः पतेरड्व्युः लोपः त्वष्टा पुमान् देवशिल्पिनि।
क्षेत्रादिस्वपीति मेदिनी जायां मातीत्यंतर्भावितण्यर्थः सुन्पसेः असु क्षेपणे असदीप्त्यादिषु आभ्यां सुत्रि उपपदे अनूयतेः यतो प्रयत्ने
नञि च ननंदः उषा उपूषा ननंदा च ननांदा च प्रकीर्तितेति द्विरूपेषु विश्वः देवेति भ्रातरइत्यनुवृत्तौ स्वामिनो देवृदेवरौ विस्समरः देवे धवे देवरि मा धवे
चेति श्रीहर्षः नयतेः ष्णुः पुमांसः पंचजनाः पुरुषाः पूरुषा नरा इत्यमरः सव्येः ऋर्ष्टिश्चेसनुवर्तते सव्येष्ठनितत्सुरूषे कृतीतिस सप्तम्या अलुक् अर्त्ति
स्तधमिः सौत्रः अरणिर्वह्निमंथनाद्वयोर्निर्मन्थ्यदारुणीति मेदिनी सरणिः श्रेणिवर्त्मनोरिति दंत्यादौ रभसः सरणिः पंक्तौ मार्गे स्त्रीति मेदिनी शृ।
हिंसायां ततः शरणिरित्येके शरणिः पथि चावलाविति तालव्यादौ वजयः इमामग्ने शरणिमिति मंत्रे शरणिं हि स्तां अत लोपरूपा मीमृषः क्षमस्वे
तिवेदभाष्यम् धमनी तु सिरा हट्टविलासिन्यां च योषिति अशनिस्त्रीपुंसयोः स्याच्चंचलायां पवावपि तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रि। राम.
यां रजनी नीलिनी च त्रिहरिद्राजतुकासु चेति मेदिनी कुमारीलताविशेषः तरणी रामतरणी कर्णिका चारुकेसरा सहा कुमारी गंधाढ्येति धन्वंतरिः। ७८

निघंटुः ऽजेर्नेर्लोपोपि बाहुलकात् कृषेर्णादेशश्च चः चर्षणिः जेनेति वैदिकनिघंटौ चर्षणिशब्दस्य मनुष्यनामसु पाठात् ओमासश्चर्षणीधृतः प्रचर्षणिभ्यः
इत्यादिमंत्राणां भाष्ये तथैव व्याख्यानाच्च अत एव आदेशश्च चेति दशपादीवृत्तिपाठ एवेह पुरस्कृतः उज्ज्वलदत्तस्तु आदेशश्च धेति पठित्वा धर्षणिः
बंधकीति व्याख्यत् तत्तन्न तथा सति धृषेरित्येव सूत्रयेत् प्रागल्भ्यरूपावयवार्थानुगमात् आदेशश्च ध इत्यंशस्य त्यागेन लाघवाच्च वर्त्तनिरिति कृदि
कारादिति पक्षे ङीषु सरणिः पद्धतिः पद्यावर्त्तन्येकपदीति च त्यमरः क्षिपणिः आयुधमिति उक्तस्य वाजी क्षिपणिं तुरण्यतीति मंत्रस्य वेदभाष्ये तु।
क्षिपणिः क्षेपणम् अनु तुरण्यति त्वरयति गंतुमिति व्याख्यातं अर्चिरिति सांतं तमर्चिषा स्फूर्जयन्निति मंत्रः नयनमिव सनिद्रं घूर्णते दैपमर्चिरिति माघः ज्वा
लाभासोर्न पुंस्यर्चिरिति नानार्थसांते त्वमरः इदंतोपीति णिजंतात् चइरिति भावः अर्चिर्हेतिः शिखास्त्रियामित्यमरः रोचिः शोचिरुभे क्लीवे इति च छादयते
ऽनया छदिः छदिः स्त्रियामेवेति लिंगानुशासनसूत्रम् एवं च पटलं छदिरित्यमरग्रंथे पटलसाहचर्याच्छदिषः क्लीवतां वदंतः उपेक्ष्याः इंदेः वर्हिः पुंसि हु
ताशने न स्त्री कुशे इति मेदिनी द्युतेः ज्योतिरग्नौ दिवाकरे पुमान्नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोरिति मेदिनी वसोरुच्चेः बाहुलकात्केवलादपि रोचिः।
शोचिः लले क्लीवे अर्त्तिपृत्रमो स्त्रियामीर्मक्रः क्लीवे इत्यमरः ग्रंथिर्नापर्वपरुषी इति च वपुः क्लीवं तनौ शस्ताकृतावपीति मेदिनी तनुः शरीरम् त
नुषेनं गमितिसुबंधुः स्यात्तनुस्तनुषा सार्द्धं तनुषा च धनुर्विदुरिति द्विरूपेषु विश्वः अथ स्त्रियां धनुश्चापाविस्यमरः धनुः पियाले ना न स्त्री राशिभेदे
शरासने धनुर्द्रुरेत्रिष्विति सांते मेदिनी त्रसेः त्रिसवात्सार्वधातुकत्वे त्याज्य चस्तान्तरूपमनुभवंत्सनन्त्वसुः मुहेः मुहुः पुनः पुनः शश्वत् अभीक्ष्णम
सकृत्समा इत्यव्ययेष्वमरः अस्मात्स्यरं बहुलमन्यत्रापीति सूत्रस्य एत्वासकृम् [illegible] ताः कर्वरः कव्यात्कर्बुरो यातुरक्षसी इति शब्दा[illegible] शर्वरी
यामिनी स्त्रियोरिति मेदिनी वर्वरः पामरे केशविन्यासे नीवृदंतरे वर्वरः फंजिकायां तु वर्वरा शाकपुष्पयोरिति विश्वः वर्वरः पामरे केशचक्रे [illegible] मा
फंजिकायां पुमान् शाकभेदपुष्पभिदोः स्त्रियामिति मेदिनी चत्वारः [illegible] लिंगने इति न नौ सदेः ष्वरजनुवर्त्तते सदिरप्रतेरिति ष[illegible] रः सपंके नि

शायांतु निषद्वरीति मेदिनी इक्षुणादिषु द्वितीयः पादः छित्वरश्छेदनद्रव्ये धूर्ते वैरिणि च त्रिष्विति मेदिनी डुधाञ् ध्मः स्यस्यइत्वम् एवं पामा मङ्क्यादी
मिसे के अन्येतु पीवमीवतीवनीवस्थौल्ये एभ्यः प्रत्यये लोपो व्योरिति वलोपमाहुः पीवरः कच्छपे स्थूले इति मेदिनी तीवरो नांबुधौ व्याधे इति च
वाणिजके वा स्त्रवे पि च हृश्यत इति मेदिनी विश्वप्रकाशो कद्वरं कुत्सिते वाच्यलिंगं तक्रेनपुंसकमिति मेदिनी वाहुलकादुपपूर्वाज्जुहोतेः लोपः।
उपह्वरं समीपे स्यादेकांतेपि नपुंसकमिति मेदिनी उपह्वरो रथ इति केचित् तदप्रयस्तमिति मंत्रेतु उपह्वरे उपगंतव्ये समीपदेशे ह्वः कौटिल्ये
गतिविशेषवाचिना धातुना गतिमात्र मिह लक्ष्यते ततोधिकरणे घः कृदुत्तरपदप्रकृतिस्वरत्वमिति भाष्ये व्याख्यातम् इणसिञ्जि डीङुष्यविभ्यो नक् इणः पक्षो नृपार्क
योः जिनोर्हति बुद्धेच पुंसि स्यात्रिषु जित्वरि इति मेदिनी दीना मूषिकयोषायां दुर्गते कातरेन्यवत् इति विश्वः उष्णो ग्रीष्मे पुमानुदक्षाशीतयोरन्य।
लिंगक इति मेदिनी फेनमीनौ डिंडीरोब्धिकफः फेन इत्यमरः मीनो राशंतरे मत्स्ये इति विश्वः कृषेः कृष्णस्सत्यवती पुत्रे केशवे वायसेर्जुने कृष्णा स्याद्रौ
पदी नीली करणाद्राक्षास्वप्यौषिति मेचके वाच्यलिंगः स्यात्क्लीवे मरिचलोहयोरिति मेदिनी व्रध्नः सूर्यः वुध्नः शिफायां रुद्रे चेति विश्वः वुध्नो मूलरुद्र
योरिति मेदिनी धाप्पृधानाभ्युपवे प्रोक्ताः धान्याके भिन्नतो ह्विदीति विश्वः पर्णो पत्रे किंशुके ना इति मेदिनी वस्नस्त्वक्रये पुंसि वेतने स्यान्नपुंसकमि
ति च वेन इति मुण्यकः प्रजापतिश्च सप्तर्षीमहानामिति मंत्रे मनोः पुत्रे पि प्रसिद्धः लक्षणमित्यादि लक्षणलक्ष्मणशब्दौ द्वावपि नाम चिन्हयोः क्लीबौ
रामभ्रातरि पुल्लिंगौ हंसयोषापां लक्षणा सारसयोषायां लक्ष्मणा इति व्यवस्थेत्यर्थः लक्षणं नाम्नि चिन्हे च सौमित्रिरपि लक्षणः लक्ष्मणं लांछ
ने नाम्नि रामभ्रातरि लक्ष्मण इति विश्वः लक्षणं नाम चिन्हयोः लक्ष्मणं च लक्ष्मणस्तु सौमित्रौ लक्षणोप्यथेति हेमचंद्रः लक्ष्मणो लक्षणोपि चेति।
द्विरूपेषु विश्वः लक्षणं नाम्नि चिन्हे च सारस्यां लक्षणा क्वचित् लक्ष्मणा त्वोषधीभेदे सारस्यामपि योषिति रामभ्रातरि पुंसि स्यात् श्लोके चाभिधे
यवत् इति मेदिनी कोशेपि निर्मकारः स्वीकृतः वेन्ने तिलघूपधगुणः वाहुलकादिति एतच्च वच्छोः शूडिति सूत्रे वृत्तौ येन विधिरिति सूत्रे कैयटग्रंथे। २

चस्पष्टं स्योनः किरणसूर्ययोरिति मेदिनी ॥ कृष्टं कर्णः । ष्ठ्या ज्येष्ठसुते सुवर्णो लौ श्रुतावपीति विश्वमेदिन्यौ वृञ्वरणे दीर्घपाठे तु वृ वरणे वर्णो द्विजादि

शुक्लादियशोगुणकथासु च स्तुतौ नान स्त्रियां भेदरूपाक्षरविलेखने इति मेदिनी विश्वमेदिनी स्थमा हजरणे इति जर्णो जीर्णो द्रुमेंदुष्विति हेमचंद्रः द्रो ।

णो स्त्रियां मात्रके स्याद्दाढकादिचतुष्टये पुमानृक्षपीपतौ क्रमलकाके स्त्रीनीवृदंतरे स्त्रियां काष्ठावुवाहिन्यां गवादन्यामपीष्यते अन्नं भक्ते च भुक्ते ।

स्यात् स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमानिति मेदिनी धेट इत्व धेनानद्यां नटे पुमानिति मेदिनी धेनः समुद्रे नद्यां च धेना इति विश्वः श्लोको धारे ।

सादिषु सप्तपंचाशत्सु व्याकेषु वाङ्नामसु धेनेति वैदिकनिघंटौ पठितं अतएव धेनाजिगाति दाशुषे इंद्र धेनाभिरिहमादयस्वेत्यादिषु धेना वागिति ।

व्याख्यातं भाष्ये तृषि शुषि जि तृष पिपासायाम् तृष्णा लिप्सापिपासयोरिति विश्वः सुजः सूना धोजिह्विकापि चेति नांते अमरः सूनं प्रसवपुष्पयोः

सूना पुत्र्यां वधस्थाने गलशुंडिकयोः स्त्रियामिति मेदिनी रमे रत्नं वा रत्नं स्वजातिश्रेष्ठेपि मणावपि नपुंसकमिति मेदिनी रास्ना रसन् आस्वादने उपधावी

र्घः रास्नानु [illegible] मेलापत्यामपि स्त्रियामिति मेदिनी षप्तस्वप्ने दीर्घः सास्नानुगलकंबल इत्यमरः तिष्ठते रूढं प्रस्य यस्य णलं [illegible]

स्येन स्वर्णा [illegible] इति मेदिनी सूर्मी लोहप्रतिमा वीणा स्यादिषु गुणाभावे गाणत्वं च वीणा विद्युति वल्लकामिति मेदिनी गादो ग लुर्न टे [illegible] ने च

दक्षु दांतरिड् [illegible] इति विश्वः कृत्स घ्न कृत्स्नं सर्वे वु कुक्षिष्विति मेदिनी तिजेः तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके क्लीवं यवाग्रके पुंसि तिग्मा ।

त्मस्यागिनो स्त्रिषु इति मेदिनी यजि मनि दसुक्षोरेरि पो पुंसि अपघनः [illegible] स्या पुंसि प्राणपग्निधात्रृष्विति मेदिनी भुजि मृङ् मृत्युर्नामरणे यमे इति मेदि

नी पानीनीपः कदंबबंधूकनीलाशोकद्रुमेपि पुं इति मेदिनी [illegible] अनेका [illegible] दिह भाषणे च्यवंते भाषं ते [illegible] नेति विग्रहः दशप [illegible] तु चुपः

किञ्चेति पद्यते चुपमंदायां गतौ चो [illegible] ति चुप्पः मंदगमनकर्त्ता [illegible] रूपो [illegible] रिति मेदिनी शूर्पमिति वाहका [illegible] लिने ति दीर्घः पु

स्फोटने शूर्पमस्त्री [illegible] पाद्यां [illegible] रूपयुभ्यश्च सस्पृभ्यां [illegible] इति पठि [illegible] वस्तुसादितं द्विरूपकोश [illegible] कुशब्देषु भिश्र

उ·
म·क्ष· अणोऽआभ्यां पः सचनित् धातोर्दीर्घत्वं च कूपः कूपकमन्मानगर्त्तो [illegible] रुद्रसकेऽइति मेदिनी त्वष्टः [illegible] धेवलालूनाविति वि[illegible] चपुंसि
८० स्यास्त्वति भाहानाविति मेदिनी विश्वोक्तिमाह वाष्पऽइति वाष्पमूष्मा [illegible] कांश्चेति रूपस्वभावमोदर्यवालके [illegible]
ग्रंथवृत्तौ नाटकादौ आकारस्तोकयोरपीति विश्वमेदिन्यौ तल्पमट्टेव [illegible] चशयनीयं चन [illegible] रितिमेदिनी अमरोक्तमाह तल्पमिति स्तनिहविलनगर्दी
देवशब्दे चुरादिएयंतौ हृषतुष्टौ पुषपुष्टौ महीहृषिग्लेपनयोः घटा [illegible] पित्नुः पुमान् [illegible] पित्तनिते पि चेति मेदिनी हर्षयित्नुः सुतेहेम्नि यो
षयित्नुः ~~[illegible]~~ पित्नुः पयोवाहे तद्धनो गरोगयोरिति विश्वः गदयित्नुः पुमान्कामे जल्पाके कामुके पि चेति विश्वमेदिन्यौ मदयित्नुः कामदेवेपु
मान्मद्येनपुंसकमिति मेदिनी कृहनिभ्यां क्नुः कृत्नुरिति कर्त्तेत्यर्थः कित्वान्नगुणः हत्नुरिति अनुदात्तोपदेशत्वादिना अनुनासिकलोपः [illegible] मुः
तरत्र गमेरपि [illegible] मादशमादौ वृत्तौ तु क्नुरिति तकाररहितं पठित्वा क्नुः कर्त्ता हेतुर्वक्रोकदेशः वाहुल्यकान्न लोपः गमे स्तुजिगंतुरित्तु
दाहृतम् तत्सर्वं प्रामाणिकलक्ष्याविसंवादात् तथा च श्रूयते सुहृत्पक्त्नुमृतये ज्येष्ठराजं भरेकत्नुम् अयं कृत्नुरगृभीतः मामोवधाय हत्नवे मृगान्नमीम
मुपहत्नुमुग्रम् मूर्धनः सनुत्य उतवाजिगत्नुरित्यादि अतएव हंतिधातुं विहृत्य वतामाधवेन उपहत्नुरित्युदाहृत्य त्नौः कित्वादनुनासिकलोप इत्युक्तम्
यत्तु तेनैव सुहृत्पक्त्नुमिति मंत्रे विहृत्य वतातकारोपजनश्छांदसइत्युक्तं तद्दृशपादीवृत्तिमनुसृत्य न तु वस्तुस्थितिमनुरुध्येति सहृदयैराकलनीयम्
दाभाभ्यां नुः दानुर्दाता विक्रांतेऽइति मेदिनी भानूरश्मिदिवाकराविस्तमरः वचेः वग्नुर्वक्ता धेटः धनुः स्यात्नवसूतिके त्यमरः विश्वोक्तिमाह सू
नुरितिजहातेः जहुः स्यात्पुंसि राजर्षिभेदे च मधुसूदनेऽइति मेदिनी विश्वोक्तिमाह स्थाणुरिति स्थाणुः कीलेहरेपुमान् अस्त्री ध्रुवेऽइति मेदिनी अ
जिह्वघेणन्नैपातरेवंशेऽइति विश्वः रेणुः स्त्रीपुंसयोर्धूलौ पुल्लिंगः पर्पटे पुनरिति मेदिनी विषेः किच्च चकारान्नित् आद्युदात्तः विष्णुरित्या प्रविष्ट एम·
वेश्मूषम कृदांककेः कर्केतलेवह्नौ सुक्राश्वेदर्पणे घटेऽइति विश्वमेदिन्यौ राकानयंनरेकत्वौनव जातरजः स्त्रियां संपूर्णेंदु तिथावितिमेदिनी ए ८०

कानुसरिदं नरे राकानवरजः कन्या पूर्णोदुः पूर्णिमापि चेति विश्वः इहदाधाराएषांकेरणाइतिह्रस्वोपिवाहुलकान्नेतिवोध्यम् अर्कोर्कपर्णेस्फटिके रवौताम्रेदि
वस्पतौइति विश्वमेदिन्यौ कल्कोस्त्री घृततैलादिशेषेदंभे विभीतकेविट्किट्टयोश्चपापे च त्रिषु पापाशयेपुनः रीति मेदिनी वाहुलकाद्रमेरपि कः रंकः
पराम्मंदयोरिति मेदिनी कपिलकादित्वाल्लत्वम् टापुल्कारस्तुः पुरीशास्त्राशाकिनीकुलटासु चेति विश्वमेदिन्यौ सृष्ट सृकावाणोस्य लवातीति
दुः सृकं संशाय पविमिंद तिग्मम् इति मंत्रस्य वेदभाष्ये नु सृकं सरणशीलम् पविं वज्रं संशाय सम्यक्तीक्ष्णीकृत्येति व्याख्यातम् भूकं छिद्रे च कोलस्य
मेदिनी मुष्कोमांसलकवृषे स्यात्संघाते वृषणेपि चेति स एव शुकोव्याससुते कीरे रावणस्य च मंत्रिणि शिरीषपादपे पुंसि ग्रंथिपर्णे तु पुंसकं वल्कं वल्क
ल शल्कयोरिति च उल्कोज्वालाविभावसोरिति सुभूतिचंद्रः इत्याभी एकं संख्यांतरे श्रेष्ठे केवले तस्याच्चिदिति मेदिनी काकः स्याद्वायसे द्वसप्रभेदे
पीठसर्पिणि शिरोवक्षालने ... दद्वीपभेदयोः काका स्यात्काकनासायां काकोलीकाकजंघयोः रक्तिकायां मलवाचकाकमाच्यां च योषिति काकुर
प्रवंधे स्यात्कोकानाभापि ... विति विश्वमेदिन्यौ पाकः परिणतौ शिशौ केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचने पि च शल्कं तु शकले वल्के इति मेदिनी
शल्के ... इति मंत्रे काष्ठखंडे रिति व्याख्यातारः मर्क इति मर्चिः सौत्रो धातुः ... मर्चेशब्दे चौरादिक इति मिदचो सात्सूत्रे कैयट ... म
र्तेम्मर्चयतिहूयनेति मंत्रे मर्चयति विधेयी करोति भर्त्सयति चेति वेदभाष्यम् न चैवं णिलोपस्य स्थानिवद्भावात् कुत्वं न स्यादिति वाच्यं पूर्वत्रासिद्धे न स्थानिवद्
भावात् वाहुलकात् श्यनेः कन् शाको द्वीपांतरे पुंसि च शक्तौ द्रुमविशेषे च पुमान् हरितके स्त्रियामिति मेदिनी वौहः निहाकागोधिकासमेइत्यमरः स्यांक
न श्यनिहाकयेति श्रुतिः निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः वक्षोलंकरणे हेमपात्रे हेमपलेपि चेति मेदिनी स्यमेः स्यमुशब्दे स्यमाको नीलिका
यां स्त्री स्यमीकोनाकुरुस्यपोरिति मेदिनी अजिपुएभ्यः कन् एषां दीर्घ ... शकेः शकुंतिपक्षि शकुनिश्चशकुंतः शकुनद्विजाः इत्यम
रः शकुनस्तु पुमान्पक्षिमात्रपक्षि विशेषयोः शुभशंसिनिमित्ते च शकुनं स्यान्नपुंसकमिति मेदिनी शकुंतः कीटभेदे स्यात् भासपक्षि विहंगयोरिति

उ॰ म॰ क्ष॰ शकुनिः पुंसि विहगे सौवलेऽपि तु कौरवे इति च वाहुलकात्कमेरपि प्रत्ययादि लोपे कुशब्दादेशः। कुंतिः इत्नो मनुष्यजाते रितिङीष् कुंती पांडुप्रियायां च शल्लकी गुग्गुलुद्रु
८२ मे इति मेदिनी कन्तु चूक्षिपस्तु स्मृतुपुमान्देहे सुरभौ वाच्यलिंगक इति मेदिनी भुवन्यु स्मृत पुमान् सात्नो ज्वलने शशलांछने इति विश्वमेदिन्यौ कष्टक स्तेना मुरसे
से कृपायां करुणामतेति विश्वमेदिन्यौ वरुणास्तरुभेदे स्तु प्रतीचीपति सूर्ययोरिति विश्वः दारुणो रसभेदे ना त्रिषु तु स्याद्भयावहे इति मेदिनी त्रोऽश्वतरुणा कुज्व पु।
ष्पनारुचके पूनि च त्रिषु इति मेदिनी तरुणीनेत्रुनीति चेति द्विरूपे तु विश्वः सुधिपिशि पिशुनंकुंकुमे स्मृतं कपिवक्रे च काके ना सूचक कूरयोस्त्रिषु
स्काले पिशुना स्त्री स्यादिति मेदिनी मिथुनं तु द्वयो राशिभेदे स्त्रीपुंसयुग्मके इति च फलेः फल्गुनस्तु गुडाकेशे नदीजार्जुनभूरुहे तपस्यसंज्ञमासे तु पू
र्णिमा [illegible] नीति मेदिनी अशेविति प्रज्ञादित्वात्स्वार्थे फल्गुनः फाल्गुनोऽर्जुने इति द्विरूपकोशः अशेर्लश्च अश भोजने [illegible] न।
धातोर्लशादेशश्च लशुनं महाकंदः उशना लशुनं वेश्मकश्मलं विश्वमप्यवदिति मध्यतालव्येषु विश्वः लसश्चेति पाठस्तु प्रामादिकः अर्जेर्णिलुक्च।
अत्र णोर नियैति दीर्घ [illegible] र्णि लुके सुक्ते फलं विसं अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः मातुरेकसुतेऽपि स्याद्धवले पुनरन्यवत् नपुंसकं तृणे।
नेत्ररोगे चाप्यर्जुनी गवि उषायां वाहुदानद्यां कुट्टन्यामपि च क्वचिदिति विश्वमेदिन्यौ अर्तेश्च अरुणोऽव्यक्तरागेऽर्के संध्यारागेऽर्कसारथौ निःशब्दे क
पिले कुष्ठभेदे ना गुणिनि त्रिषु अरुणास्तिविषा श्यामा मंजिष्ठा त्रिवृता सु चेति मेदिनी अजियमि विश्वानि देव वयुनानि विद्वानिति मंत्रे वयुनानि प्र।
ज्ञानानीति वेदभाष्यं वैदिकनिघंटौ प्रज्ञापर्याये प्रशस्यपर्याये च वयुनशब्दः पठितः वृन्दवसेंतसैमिति तितुत्रेतिनेट् षत्वं तु न भवति वाहुलकेन षा।
त्वे कर्तव्ये प्रकृतः तत्संज्ञाया अप्रवृत्तेः कसशब्दे तु षत्वं भवत्येव एतच्च सर्वमादेशप्रत्यययोरिति सूत्रे भाष्य कैयट पदमंजरीषु स्पष्टमेव उणादिष्वितिह राम॰
न तु सर्वेऽपीह षत्वमुदाजह्रुः तेषामयमाशयः अस्तु भाष्यप्रामाण्याद्वसंतसमिति दन्त्योऽपि साधुः वाहुलकवलल्लभ्य षत्वाभावस्य पाक्षिकत्वेऽपि वाध ८१
काभावात् पक्षे तु षत्वमस्तु वृषितृषिभ्यां तु त्रिएयंतादेरविघजर्थे कप्रत्यये वा वर्षतर्षशब्दयोर्दुर्वारत्वात् त्रि धौमयादीनामुपसंख्यानं नपुंसके त्कादि नि।

इत्यर्थमित्यत्र वर्षमित्याकरे उदाहृतत्वाच्चेति तस्मादिह द्विरूपता फलिता वर्षा स्त्री भारतादौ स्यात् जंबूद्वीपाब्दवृष्टिषु प्रावृट्काले स्त्रियां भूम्नि इति मेदिनी
तर्षोत्तिरस्मादन्ययोरिति च पुत्रादौ तर्णके वर्षे वत्सः क्लीवं तु वक्षसीति त्रिकाण्डशेषः हंसः स्यान्मानसौकसि निर्लोभनृपविष्ण्वर्कपरमात्मसु मत्सरे यो
गभेदे मंत्रभेदे शारीरमरुदंतरे तुरंगमप्रभेदे चेति मेदिनी कंसोऽस्त्री तैजसद्रव्ये कांस्यमानेऽसुरे तु नेति च कंसो दैत्यांतरे स्मृतः कांस्ये च कांस्यपात्रे च मान
भेदे च कीर्तित इति विश्वः कक्षा स्यादंतरीयस्य पश्चादंचलपल्लवे स्पर्द्धायां नातु दो मूलके च्छवीरुत्तृणेषु चेति मेदिनी तुषेः स्त्री क्षोजटीगर्दभांडदीपमितु
जंगशने इति मेदिनी स्त्री द्वीपविशेषे स्यात् अर्के दीगर्दभांडयोः पिप्पले द्वारपार्श्वे च गृहस्य परिकीर्तित इति विश्वः मनः मांसं स्यादामिषे क्लीवं कं को
लोजटयोः स्त्रियां [illegible] इति मेदिनी अक्षः अथाक्षमिंद्रियेनाघूर्तांगे कर्षचक्रे व्यवहारे कलिद्रुमे इत्यमरः अक्षो ज्ञानात्मशकटव्यवहारेषु पाशके रुद्राक्षे
द्राक्षयोः सर्प्पविभीतक [illegible] चक्रे कर्षे पुमान् क्लीवं तु स्यै सौवर्चले इंद्रिये इति मेदिनी तु वृश्चिकस्तु पर्वतभेदे स्यात् भल्लूके शोणके पुमान् क्ली
नवेधनेऽन्यलिंगमत्र [illegible] पुस्तकमिति मेदिनी अषेजातौ नियमार्थमिदं सूत्रम् अषेजातावेवेति तेनान्येभ्यः केवलयौगिकत्वेऽपि प्रत्ययः [illegible]
चिगुत्सः स्यात्स्तबके [illegible] वेहारमिंद्रे चिपर्णयोरिति मेदिनी गुत्सश्च गुत्सो गुच्छो गुलुच्छवदिति द्विरूपकोशात् स्याद्गुच्छः स्तवके स्तवेहार [illegible] पयो
रिति च वर्णिति द्वितीयाते मेदिनीकोशात् [illegible] गधे श्चत्वेन सिद्धे भष्भावनिवृत्तये दकारविधिः पक्षो मासार्द्धके पार्श्वे ग्रहे साध्यविरोधियोः के
शादेः परतो वृंदे बले सखिसहायपयोः चुल्लीरंध्रे पतत्रे च राजकुंजरपार्श्वयोरिति विश्वमेदिन्यौ [illegible] शेः सरं अक्षरं स्यादपवर्गे परमब्रह्मवर्णयोरिति हे
मचंद्रः उज्वलदत्तादयस्तु अशेः सरन् [illegible] निपर्त्तु त्वन्न नित्त्वरापत्तेः इत्युक्तं तत्प्रत्ययस्वरेणाक्षरशब्दस्य मध्योदात्तत्वं ऋचो अक्षरे परमे व्योमन् अक्ष
रेणमिमते सप्तवाणीः इत्यादिमंत्रेषु त्रीणि [illegible] चशतानि षष्टिश्चाक्षराणीति यजुषि च तथैव पाठात् अत एव द्वितीयान्तकांते अक्षोतेर्वा [illegible] सरमि
तिभाष्यकृतोक्तं सरूर्वान्विद्रु पूर्वेणासहितः सहूर्वः इद्वत्सम्प्रपूर्वत्वाय संपूर्वादिति पाठस्तु लक्ष्यविरोधादुपेक्ष्यः [illegible] हारावली

उ·
म·कु· स्यं धूसरी किंनरी भेदे नाखे रविपुषांडुरे इति मेदिनी मत्सरामाक्षमा यो स्यान्मात्सर्ये क्रोधयोः पुमान् असह्यपरसंपत्तौ कृपणे चाभिधेयवल्लिङ्ग मत्सरोऽन्य
८२ शुभद्वेषे तद्वत्कृपणायोस्त्रिष्विस्यमरः अथ मत्सरः असह्यपरसंपत्तौ मात्सर्ये कृपणे क्रुधीति विश्वः वेदे तु योगपुरस्कृत प्रयुज्यते इंद्र मिंद्राय मत्सरं मतं
सिंधवो मत्सरमिंद्र पानमित्यादि मत्सरं हर्षहेतुमिति तद्भाष्यं अमरोक्ति मूहतसरं इति अनुदात्तोपदेशेत्यादिनानुनासिकलोपः औ सरः कत्विगिति
सरातो यथा राया मृक्षरस्त्वत्विजिस्मृतरं इति मेदिनी· अनृस्सराऋत्वः संतुपंथाः इति मंत्रस्य वेदभाष्ये तु ऋक्षरः कंटक इति व्याख्यातम् पीयुकणि
भ्याम् एसाद्नं पियालः स्यात् इत्यमरः प्रियालः स्याप्त्यिपालवदिति द्विरूपकोशः वाहुल काइंजेरपि कालेन् नलोपः न्यंकादित्वात्कुत्वं भृगालं नर
मस्तकम् मेलकंडानि चंडी कांतो भगाली च लेलिहानो वृषध्वज इति राजक्षेत्र कठिकुषिभ्यां कठकृच्छ्र जीवने कुष निष्कर्षे कुषाकुः सा श्रिन्दर्थे
मापरोत्ताप्यि विनिश्चितिमेदिनी उज्वलदन्तस्तु कठिकषिभ्यामिति पठित्वा कषशिषेति दंडकेधातुमुपन्यस्य कषाक्रुरित्युदाजहार तत्कोशविरुद्धं
मेदिनी कोशे उकारान्तप्रकरणे मृत्तेः सदाकुर्नानिलेच अग्ने ज्वलने प्रति सूर्येके इति मेदिनी वृत्तेः वार्त्ताकुरपि वार्त्ताके दृष्टताकोपि च दृश्यते इति हि स्ये
विश्वः वार्त्ताकी हिंगुली सिंही भंटाकी दुष्प्रधर्षिणीत्यमरः वार्त्ताकं पित्तलं किंचिदंगारपरिपाचितमिति वैद्यकशास्त्रपद्ये विश्वोक्तमाह सदाकुरित्या
दि सदाकुर्वृश्चिके व्याघ्रे सर्प्ये चित्रकयोः पुमानिति मेदिनी सप्तसरणस्तु पुमान्वारिवाहे स्यान्मातरिश्वनीति मेदिनी सरणपुरस्य सूत्रं सप्तः इति मं
त्रस्य भाष्ये तु सरणयुः शीघ्रगामीति व्याख्यातं यवागूरुष्णिकाश्राणा विलेपीतरला च सेत्यमरः वचक्नुस्तु पुमान् विप्रे वावदूके भिधेयवदिति मेदिनी. आषि
विशेषेप्ययं प्रथमकन्या वाचक्नवीति प्रसिद्धा आनकः भयानकः स्मृतो व्याघ्रे रसे राहौ भयंकरे इति मेदिनी शिंघाणक इति शिघि आघ्राणे शिंघाणं काचपात्रे
स्यात् लोहनासिकयोर्मले इति विश्वः शिंघाणः फेनडिंडीरेऽनक्रौ तेश्च पिच्छिले इति विक्रमादित्यकोशः हारावलीस्थमाह शिंघाणमिति उल्मुकमिति द रामः
विः कम्बिः खजाका च इत्यमरः द्विपः कुक्कुटस्य योयम् ककारो गुणनिषेधार्थः हस्तिमृहस्तः करे करिकरे सप्रकोष्ठकरेऽपि च आसक्ते शान्परोक्षाने इति मेदिनी। ८२

मर्त्तो भूलोकः तत्र भवो मर्त्यः दिगादेराकृतिगणत्वाद्यत् गर्त्तस्त्रिगर्त्तभेदे स्यादवटे च ककुंदरे एतः कर्बुरत्र्यागते अतं स्वरूपेनाशेनानस्त्रीशेषे तिके त्रिषु दंतो द्वि
कंठके कुंजे दशने चौषधौ स्त्रियामिति मेदिनी लोतमश्रु गाचोरितेऽइति विश्वः क्तक्तवतू निष्ठेति सूत्रे लोतो भेष इति कैयटः पोतः शिशौ वहित्रे चेति वि।
श्वमेदिन्यौ धूर्त्तेइति धुर्वी हिंसायाम् लोपो व्योरिति वलोपः क्विती स्यनुवृत्तिपक्षे तु राल्लोप इति लोपः हलि चेति दीर्घः धूर्त्ते तु खंडलवणो धत्तूरेना।
शठे त्रिष्विति मेदिनी तनिमृङ्भ्याम् ततं वीणादिकं वाद्यमित्यमरः अथ ततं व्याप्ते विस्तृते च त्रिलिंगकं क्लीवं वीणादिवाद्ये स्यात् पुल्लिंगस्तु समी
रणे मतं तु व्याचितमत्स्यो क्लीवं मतस्तु मतित्रिष्विति मेदिनी अंजिघ्र अक्तं परिच्छिन्ने अक्तपरिमाणस्य वा   चका इति भाष्ये कैयटेन त
थाव्याख्यातत्वात् अत्र व्यस्तं व्याप्ते च संकुल इति विश्वप्रकाशे लिपिभ्रमाद क्तं व्याप्ते च संकुल इत्युदाहरन्नुज्वलदत्तो भ्रान्तत्वादुपेक्ष्यः तथा च म[illegible]
न्यावकारादि [illegible] कुलेव्यास इत्युक्तं घृतमाज्ये जले क्लीवं प्रदीप्ते त्वभिधेयवत् सितमवसिते च बद्धे धवले त्रिषु शर्करायां स्त्रीइति मेदिनी
ऋगतैर्वाहुलकात् क्तः [illegible] मुंछ शिले जले स्वेदे दीप्ते पूजिते स्यादिति मेदिनी दुतनिभ्यां दूतः प्रेष्यः गौरादित्वान्ङीष् दूती अथ कथं तेन दूतिविदितन्निं
दुषेति [illegible] अस्मात् क्तिच् दूत्यां दूतिरपि स्मृतेति द्विरूपकोशः नात्वे मुकंप्ये जनके इति विश्वमेदिन्यौ वाहुलकात् शीङो पि शीता [illegible]।
प इतिः समपत्नी च शीता नभः सरिति लांगलपद्धतौ च शीता दशाननरिपोः सहधर्मिणी च शीतं स्मृतं हिमगुणे च तदन्विते च शीतो लसे च [illegible] रोच
द्ध इति तालव्यादौ धरणिः सीता दन्त्यादिरपि सीता लांगलपद्धतिर्वैदेही स्वर्गगंगासु इति दंत्यादौ मेदिनीकोशात् सीता लांगलरेखा स्यात् [illegible] गाच जा
नकीति दन्त्यादौ रभसकोशाच्च अत्र सप्तं सूत्रं जेर्मूद्ध्वो दात्तः जिजये अस्मात् [illegible] गमः स चोदात्तः धातो दीर्घश्च जीम तस्य न भवति जीमूतो
ऽद्रौ भृतिकरे देवताडे [illegible] इति मेदिनी वर्णिस्वरागरी देवताडो जीमूत इत्यमरः जीमूतः स्याद् भृतिकरे शक्रेऽद्रौ घोषके घन इति विश्वः इदं सूत्रम
नार्षमिति पुरुषोत्तमः [illegible] प्राकरे पृषोदरादिषु जीमूतशब्द उदाहृतः लोष्ट [illegible] लोष्टानिले ष्टवः पुंसि इत्यमरः अत्र पंमी [illegible] तेन पुन्ना।

पुंसकलिंगोयं तथा च स्थानेन्तरतमसूत्रे भाष्ये लोष्ठः क्षिप्तो बाहुवेगं गत्वेत्यादि अत एव लेष्ठुः शंठे पिलोष्टः स्यादिति पुंस्कांडे [illegible] पलितः पलितं शैलजे।
तापे केशपाके च कर्दमे इति मेदिनी हरिता स्त्री च दूर्वायां हरिद्वर्णयुतेऽन्यवद् इति च रुहेः रोहितं कुंकुमे रक्ते ऋजुशक्रशरासने पुंसि स्यान्मीनमृगयो
र्भेदे रोहितकद्रुमे लोहितं रक्तगोशीर्षकुंकुमाजिकुचन्दने पुमान्नदान्तरे भौमे वर्णे च त्रिषु तद्वतीति मेदिनी पिशेः पिशितं मांसं मांस्यां स्त्रीति मेदिनी
मांस्यां जटामांस्यां तथा च जटा च पिशितापिशीति धन्वन्तरिः स्रुदक्षिउ घृतस्रुचे भवसि अवाप्य इति मंत्रे . अवाप्यो मंत्रैः स्वर्गीय इ
ति वेदभाष्यं दक्षाप्योपोदमन्त्रासनित्यः विश्व स्त्स्टहयाप्यस्य राजन्मित्र इव योदिधिषाय्यो भूत इत्यादिष्वपि यौगिकार्थ एव भाष्ये पुरस्कृतः उ
ज्वलदत्तस्तु दधिषाय्य इति सूत्रं पठित्वा दधिपूर्वात्स्यतेरण्यः षत्वं च दधिषाय्यो घृतं इति व्याख्य तद्दशपादीवृत्तिकारस्तु धिषशब्दे स्यादित्वं गुणा
भावः षत्वं चाभ्यासस्य निपात्यत इत्याह प्रसादकारादयोप्येवमेव प्रतिपन्नाः तदेतत्सर्वं लक्ष्यविरोधादिद भाष्यविरोधाच्चोपेक्ष्यं स्तुषेय्यं स्तोनं
पुरुवपेसम् वहु [illegible] विद भाष्यम् पत्तूज्वलदत्तेन स्तुवः केय्य इति पठित्वा कित्वाद्गुणाभावे उवङादेशः स्तुवेय्यः पुरंदर इत्युक्तं तन्न वेदस्त
त्वाद्युक्तादिविरोधात् तस्मादिह कोप्यप्रत्ययं पठन्दशपादीवृत्तिकृदेव ज्यायान् पर्जन्यो मेघशब्देपि ध्वनदंबुदशक्रयोरिति मेदिनी अजयकोशस्य
माहवदाम इत्यादि अमिनक्षिनक्षगतौ वधिः प्र कृत्यंतरं नक्षत्रमिति नभ्राणनपादिति सूत्रेण नञः प्रकृतिभाव उक्तः सदेः सौत्रात्त्र नि नन्समासे व्यु
त्पत्त्यंतरं तदिति बोध्यं यजत्रो पष्ट्य देवता संतेवा पुर्वोतेन गच्छताम् संयजत्रैरंगानीति मंत्रे तथादर्शनात् गडेः गडसेचने कलत्रं श्रोणिभार्ययोरित्यमरः
कृत्रश्चित विस्वादंतो दात्तः वरत्रायां दार्वाघ्नमानः सुविदे कत्रः इह प्रायेण कत्रन्निति तं पठंति तत्रामादिकम् वृहस्पतेः सुविदत्राणि राध्येत्यादौ।
नित्त्वस्यादर्शनात् कृदुत्तरपदप्रकृतिस्वरेण प्रत्ययस्वरस्यैव दर्शनाच्च धन्वचयत्कं तत्रं चेति मंत्रेपि तथैव कृतं कर्त्तनीयम् अरण्यमिति वेदभाष्यम् भृम
भृज्जभरणे मृङ प्राणत्यागे दृशिर्प्रेक्षणे दशपाद्यां तु भृदृशी डि ति पठित्वा दृङ आदरे ध्रियते दरतः शेते शयितः इत्युदाहृतं तन्न स्पर्शं तमस्मिंदर्श नेद्वहं

नम् तरणिर्विश्वदर्शतः दृश्योदर्शतो रथइत्यादिमंत्रे तद्भाष्ये णाविरोधात् भरतो नाट्यशास्त्रे मुनौ नटे रामानुजे च दौःष्यंतौ इति मेदिनी यच्चतन्नत्विणिति
उज्ज्वलदत्तायधुरोधेनोक्तं त्रिर्नो अश्विनायजतंहिरण्यशम्यं यजतो बृहंतमित्यादिषु यजतशब्दोपलब्धमपरतयैव वेदभाष्ये व्याख्यातः पर्वतः पादपे धुं
सि शाकमतस्यप्रभेदयोः देवमुन्यंतरे शैले इति मेदिनी हर्यतो ऽश्वइति एतदपिहर्य कांतौ गतौ चेति धात्वर्थेइति कारोतिं चानुसृत्योक्तं परिसंहर्यतंह
रिं आहर्यतापधृत्स्नवेइत्यादिमंत्रेषु हर्यतः सर्वैः स्पृहणीयः इति वेदभाष्यम् पृषिरंजिदृषन्नगेपुमान्विंदो नद्योः पृषतोपिना अनयोश्चत्रिषु श्वेता
विंदुयुक्तेप्युभाविमौ रजतं त्रिषु शुक्ले स्यात् क्लीवं हारे च दुर्वर्णे इति मेदिनी शीङ्शयि उज्ज्वलदत्तेनात्रपचमो वंचिः पठ्यते अन्यैस्तु वंदिः वंचथवंद
थयोरन्यतरं वेदोक्तावुपलभ्य बहुश्रुतेः पाठो निर्णेयः वा हुलकादिति शमथः शांतिमं त्रिणीरिति मेदिनी दमथस्तु पुमान् दंडे दमे च परिकीर्तित इति च
हृदिविदि विदथोऽग्निः ज्ञातानो इति मेदिनी अत्रोज्ज्वलदत्तः हृविदिभ्यां किदिति पठित्वारोतीतिहृदय्य अस्तुदाज हार दशपादीवृत्तिकारस्तु हृदिवि
दिभ्यां किदिति पपाठ किंच उपसर्गे वसेरित्ये वंरूपमुत्तरसूत्र द्वावपिनपेठतुः तथा हि शीङ्शये तिसूत्रानंतरं सोपसर्गाद्वसेः अत्रश्चित् हृदिविदिभ्यां
कित् इत्युज्ज्वलदत्तस्य सूत्रपाठः अन्यस्य तु शीङ्शये तिसूत्रानंतरं आङि वसेः अत्रश्चित् हृदिविदिभ्यां कित् इति सूत्रपाठः तदेतत्पाठद्वयमपिभा
ष्यादिविरोधादुपेक्षितं तथाहि गाङ्कुट्यादिसूत्रे केपुनश्च्ङादयः चङ् अङ् नजिङ् अ थङ् नङः इति भाष्यम् हृदिविदिभ्याङ्कि दित्यनुवर्तमाने उ
पसर्गे वसेरित्यथप्रत्यय इति कैयटेन व्याख्यातम् एवंच किदिति पठ्योः सूत्रविपर्यासं च कुर्वतो भाष्यादिविरोधः स्पष्ट एवेत्यालं तावत् भाष्यकैयटम
ते पिडि इत्यस्यानुवृत्तेः फलं विंत्यम् असिविचमिणोरादित्वान्डीषु अतसीस्यादुमाक्षुमेत्यमरः चमसोयज्ञपात्रस्य भेदे स्त्री पिष्टके स्त्रियाम् प
नसः कंटकिफले कंटके वानरांतरे स्त्रियां रोगप्रभेदे इत्यादि इति मेदिनी वेत्र स्तु दशपादीवृत्तौ तु वियः तुट् चेति पठित्वा वीगत्यादिष्विति धातुरुदाहृतः
वहियुभ्याम् अजगरे शयुर्वाहसइत्युभाविरयमरः वा तुल्ली वेदिवसवासरविनि च कृश्हकरभोमणिवं धादिकनिष्ठांतो छ्रतस्तु ने शरभस्तु पशोर्भि

दि करभेवानरभिदीतिमेदिनी समीपतंगाशलभाविसमरः कलभः करिशावक इतिच गर्द्दभं श्वेतकुमुदे गर्द्दभो गंधभिद्यपि रासभे गर्द्दभी क्षुद्रजंतुरो।
गप्रभेदयोरितिमेदिनी ऋषिवृषिभ्यां किंत् ऋषभस्त्वौषधांतरे स्वरभिद्वृषयोः कर्णरंध्रे गर्द्दभपुच्छयोः उत्तरस्थः स्मृतः श्रेष्ठेस्त्रीनरा कारयोषितिशू
कशिंब्यां शिरालायां विधवायां कचिन्मतेतिमेदिनी वृषभः श्रेष्ठवृषयोरितिच रासिवस्त्रिभ्यांच रासशब्दे वस्त्रसंवरणे वस्त्रभोदपिते ध्यसेसलक्षणातुरंगमेइ
तिमेदिनी ऋविशिभ्याम् वाहुलकाद्र्हतेरपिन्नच अर्हतः क्षपणको जिन इतिविक्रमादित्स कोशः त्वभूइह नंदिरेर्यतः तदाह नंदयंत इति अवलदत्त
स्तु नंदंतइत्युदाहृत्य पूर्वसूत्रेणागतार्थतामाशंक्य अनाशीरर्थे नंदिग्रहणमित्याह तन्न इहाप्याशिषीत्यस्य स्वयमेवानुवर्त्तितत्वात् वाहुलकादिति।
जर्जरं शैवले शक्रध्वजे त्रिषु जरन्नरे झर्झरः स्यात्कलियुगे वाद्यभेदे नदांतरे इतिमेदिनी अर्त्तिकमि अररं छदकपाटयोः भ्रमरः कामुके भृंगे चमरं चा
मरे स्त्रीतु मंजरी मृगभेदयोरितिमेदिनी वासरइति वसेररण्यतादरः केचित्तु सूत्रे वाशिभ्य इति तालव्यं पठित्वा वाशशब्दे वाश्यते वाशरः कोकिल इत्याहुः
अंगिमदि अंगा[illegible]पुंस्त्रिगस्तु महीसुते इतिमेदिनी मंदारः स्यात्सुरद्रुमे पारिभद्रेऽर्कपर्णे च मंदारो हस्तिधूर्त्तयोरितिच मदिस्तु त्वास्रवि
त्सस्मात् वाहुलकाद्दारूरपि पारिभद्रेतु मंदारू मंदारः पारिजातक इति शब्दार्णवः गडेः कडारः कपिलेदासे इतिमेदिनी शृंगारभृंगारौ शृंगारः सुरतेना।
ट्यरसेचगजमंडने नपुंसकं लवंगेपि नागसंभवचूर्णयोरितिमेदिनी भृंगारी झिल्लिकायां स्यात्कनकालौ पुनः पुमानितिच कंजिमृजिभ्याम् कंजारो
जठरे सूर्ये विरंचौ वारणे मुनावितिविश्वमेदिन्यौ मार्जारस्त्वोतौ खट्वांगे इतिच कमेः कुमारः स्याच्छुके स्कंदे युवराजेऽश्ववारके वालके वरुणद्रौनानद
योर्जात्यकांचने कुमारी शैलतनयावनमाल्यानदीभिदि सहा पराजिताकन्याजंबूद्वीपेषु च स्त्रियामितिमेदिनी विश्वप्रकाशेतु कुमारीरामतरणी
तिपाठः रामतरणिलताविशेषः सहेति प्रसिद्धः तरणीरामतरणीकर्णिकाचारुकेसरा महाकुमारी गंधाढ्येति धन्वंतरिनिघंटुः जंबूद्वीपस्सहा कन्याः
कुमार्यां स्याश्ववारके वालके कार्त्तिकेये च कुमारो भर्त्तृदारके इति त्रिकांडशेषः तुषारस्तु हिने हिमं कासारः सरसीसरः करोः कुणपः पूतिगंधे शवेपिचे

तिमेदिनी विटपविष्टपविटपोनस्त्रियांस्तंबशाखाविस्तारपल्लवे वियधिपेनेति मेदिनी आदेः प इति एतच्चोज्वलदत्तरीत्योक्तं अन्येतु सूत्रे विष्टपेति
दं सोष्ठ्यादिमेव पठंति युक्तं चैतत् यत्र ब्रध्नस्य विष्टपमित्यादौ तथादर्शनात् उलपो ना स्त्री गुल्मिन्यां नातृणांतरे इति मेदिनी लत्तिकेति लत्तिः सौत्रः इष्टके
ति इष्टकेषीकामालानामिति निर्देशात् प्रत्ययस्थादिति नेत्वं अर्त्तिस्तृगर्भो भ्रूणोऽर्भके कुक्षौ संधौ पनसकंटके इति मेदिनी इणः इभः स्तंबेरमः पद्मी समा
रः लक्षेर्मुट् च लक्षदर्शनांकनयोः चुरादिण्यंतः अस्मादीमत्ययः स्यात् तस्य मुडागमश्च णिलोपः लक्ष्मीः संपत्तिशोभयोः ऋद्ध्योषधौ च पद्मायां वृद्धि
नामौषधेपि च फलिन्यां स्त्रीति मेदिनी इत्युणादिवृत्तौ तृतीयः पादः अयमिति द्विचतुःषट्पदोरगाः इत्यमरेणोभयलिंगत्वोक्तेः सुभूतिचंद्रादिभिरपि
वातप्रमीशब्दस्य द्विलिंगतोक्तेश्चेति भावः तत्रक्वदिकारादिति पाक्षिकोङीषकेश्चिदित्यनेन हीकारग्रहणे केवलग्रहणमिति मुनित्रयेण परिभाषितं अत एव वात
प्रमीश्रीलक्ष्मीति षसैङ्यंताः सुसाध्वः इति रक्षितः एतच्च दुर्घटग्रंथे स्पष्टम् आशीराश्यहिदंष्ट्रायां लक्ष्मी लक्ष्मीहरिस्त्रियामिति द्विरूपकोशः अंतस्थ
वाशीविषो विषधर इति संगच्छते आशीमिव कलामिंदोरिति राजशेखरः आशीर्हिताशंसाऽहिदंष्ट्रयोरिति सांते अमरात् सांतोप्याशीःशब्द इत्यन्य
दितत् बद्धेति मुष्ट्या तु बद्धया सरत्निः स्यादित्यमरः स हस्त इत्यर्थः प्रसंगादाह अरत्निरिति नरत्निरिति नञ्समासः दशपादीवृत्तौ तु इह सूत्रे अर्त्तेरत्नि
चम कितं विधाय रत्निः साधितः उज्ज्वलदत्तानुसारेणाह वापुरात्रिश्चेति इह शब्दो मेघः अशनिश्चेत्यपि बोध्यम् आविष्कृणोमि तन्यतुर्न वृष्टि
मिति मंत्रे तन्यतुर्गर्जितमिति स्वजाक्ष्छिन्नतन्यतुरिति मंत्रे तन्यतुर्मेघ इति उतस्मास्य तन्यतोरिव द्योरिति दिवश्चित्रं न तन्यतुमिति च मंत्रे तन्यतुरशा
निरिति वेदभाष्ये व्याख्यातत्वात् अंजलिस्तु पुमान् हस्तसंपुटे कुडवेपि चेति मेदिनी स्थविरणत्रमिति वनिष्ठो हृदयादधीति मंत्रस्य भाष्ये तथोक्तत्वात् ।
अंजिष्ठ इति केचित् अंजेरिष्णुच मिच्छंति तेषामंजिष्णुरित्युदाहरणम् मदेरिति मत्स्यो मीनेथ पुंभूम्नि देशे इति मेदिनी अतिथिः कुशपुत्रे स्यात् पुमानाग
गंतुके त्रिषु अंगुलिः करशाखायां कर्णिकायां गजस्य चेति मेदिनी कषसः सन्नाहः कंकटजातिश्च अच इति वचो गर्दभांडे च संनाहे पर्पटेपि चेति मेदि

नीयैतेरितिदुरालभा चदुःस्पर्शायामोधन्वयवासक इति धन्वंतरिनिघंटुः ॥ शर्करा खंडविकृतावुपलाकर्पराशयोः शर्करान्वितदेशेच रुग्भेदे श
कलेपिचेति मेदिनी पुषः पुष्यतेः करन्स्यात्सच कित् पुष्करं खेंवुपद्मयोः सूर्यवक्रे खड्गफले हस्तिहस्ताग्रकांडयोः कुष्ठौषधे द्वीपतीर्थभेदयोश्च नपुंस
कं नागगनागविहगनृपभेदेषु चारुणौ इति मेदिनी कलेश्च पुष्यतेः कलन् कित्स्यात् पुष्कलस्तु पूर्णेश्रेष्ठे इति हेमचंद्रः मंथा इति पथिमथोरात्वं इतो
त्सर्वनामस्थाने मंथामथानदंडे चवज्रेवातेपि च स्मृतः पन्था इति पथेर्गतावस्मात्सचाघविन्त्र कारांतोप्यस्ति वाटः पथश्च मार्गश्चेति सुभूतिचंद्र पुरुषोत्तमौ
त्वचित्त्वचः किरोपिस्पाकिरो प्रोक्तः पथः पथीति द्विरूपेषु विश्वः इह ऋभवो देवाः क्षयंत्यस्मिन्निति विग्रहेन्येभ्योपि दृश्यत इति डः ऋभुक्षः स्वर्गेवज्रे भोरिति
विश्वः ततो मत्वर्थे इनि ऋभुक्षिन्निति नांतं प्रातिपदिकं आत्वात्वे ऋभुक्षाः इंद्रः ऋभुक्षाणौ ऋभुक्षाणः इत्युज्वलदत्तः दशपाद्यांतु ऋतेर्भक्षिनगि
ति सूत्रमुपन्यस्तं ऋभुक्षाणमिंद्रमाहुव उतय इति मंत्रस्य वेदभाष्येपि तत्सूत्रमुदाहृतम् अत्रायं विवेकः आद्यमते ऽतोदात्तत्वेन्याय्य अवग्रहाभावौ
वा इदकात् द्वितीयेतु अवग्रहाभावेन्याय्यः अंतोदात्तस्तु वाहुलकादिति खजा क इति खजमंथे वलाकावकपंक्तिस्याद्वलाकाविसकंठिका वलाका
कामुकी प्रोक्तावलाकश्च वलो मत इति विश्वशाश्वतौ शलाकाशल्यमदनशारिकाशल्लकीषु चेति मेदिनी पताका वैजयंत्यां च सौभाग्ये नाटकांगयोरि
ति च पताका वैजयंत्यां च सौभाग्ये केध्वजेपि चेति विश्वं पिनाकादयश्च पिनाको स्त्री रुद्रचापे पांसुवर्षे त्रिशूलयोरिति मेदिनी अमरोक्तिमाह कीवेति ।
किंचपि शब्दः सचूर्णे निषकारस्यणत्वं धातोर्युगागमः पिण्याको स्त्री तिलकल्के हिंगु वाल्हीकसिल्हके इति मेदिनी अमरोक्तिमाह दूषीकेति किंच दूषय
तेस्च इति इप्रत्यये दूषिः कृदिकारादिति ङीष् दूषी उभाभ्यामपि स्वार्थे कनि दूषिका ह्रस्वमध्येव केणा इति ङीषोपि ह्रस्वादेशात् पिवंडि दूषिका दूषिपिका ट
दृशोर्मलमिति विक्रमादित्यकोशः दूषिका तूलिकायां च मले स्याल्लोचनस्य चेति मेदिनी अनिहृषिभ्यां अनीको स्त्री गरणे सैन्येपीति मेदिनी हृषीकं वि षय
षयेंद्रियमित्यमरः फर्फरादेश इति उज्वलदत्तरीत्योक्तं वस्तुतस्तु धातोर्ह्रस्वं उकारस्याकारः सलोपइकन्वाभ्यासस्येति शपाद्युक्तमेवन्याय्यं चोरेतुम्

१ पॄ पालनपूरणयोः पुर्वपूरणो उ॰ १

चेत्सुत्तरग्रंथानुरोधेन ह्रेरूकेत्यादेरनुवृत्तेर्न्याय्यत्वात् किसलयमिति नैतोशे चतुर्फरीपर्फरीकेतिमंत्रस्य वेदभाष्ये तु त्रिफलाविशरणो४ एषामन्यतमस्य नि
पातनमिदमाश्रित्य शत्रूणां विदारयितारौ त्वां त्वंणां पालकाविष्टार्थस्य पूरयितारौ वेति व्याख्यानमिति तित्तिडीक इति तिमेर्मकारस्य डकारः अभ्यास
स्य तुक् च तित्तिडी चिंचाम्लिके इत्यमरे तु शब्दांतरं तथा च तित्तिडीत्वम्लिका चिंचा तित्तिडीका कपिप्रियेति वाचस्पतिः अम्लीका वाम्लिका चिंचा तित्तिडीका च ति
तिडेति चंद्रः अम्लिका तु क्रिका चुक्रा साम्ला शुक्ला अथ शुक्लिका अम्लिका चिंचिका चिंचा तित्तिडीका सुतित्तिडेति धन्वंतरिनिघंटुः यत्तु उज्वलदत्तेनोक्तं उपदं
शस्तृतीयायामिति सूत्रे तित्तिडोपदंशं भुंक्ते इति भाष्यप्रयोगात्साधुत्वेति तदुपेक्ष्यम् उपदंश इति सूत्रस्य भाष्यकारैरस्पृष्टत्वात् त्वदुदाहृतप्रयोग।
स्य भाष्ये कुत्राप्यभावाच्च भ्रमरश्चंचरीकः स्याद्रोलंबो मधुसूदनः इंदिंदिरः पुष्पकीटो मधुद्रो मधुकेशट इति त्रिकांडशेषः कर्कर्यालुर्गलंतिकेत्यमरः
पुंडरीकं सितांभोजे सितच्छत्रे च भेषजे पुंसि व्याघ्रे ग्निदिङ्नागे कोशकारांतरेपि चेति मेदिनी ईषः ईषीका स्यादिषीकापि वा नाशुजवनाशुआ विति दि
रूपकोशः सर्जः सर्जीका स्यंदिनी लाला इति अमरः मृडः कीकचू चित्वादंतो दांतः कीकन्निसुज्वलदत्तादि पाठस्तु प्रामादिकः मृलीके अस्य सुमत्तौ स्याम
मृलीकाय प्रियव्रतानु इत्यादिषु चित्स्वरस्येन दर्शनात् अलीकमप्रियेपि स्याद्दिव्यम् स्सेन पुंसकमिति मेदिनी व्यलीकमप्रिये भाले वितथे इति हेमचंद्रः
तथा च प्रयुज्यते तेदृष्टिमात्रपतिता अपि कस्य नात्र क्षोभाय पक्ष्मलदृशामलकाः खलाश्च नीचाः सदैव सविलासमलीकलग्नाये कालतां कुटिलतां च
न संत्यजंतीति व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि पीडके नानागरे इति मेदिनी वलीकनीध्रे पटलप्रांते इत्यमरः वलतेर्मुगागमे वल्मीकं वामलूरश्च नाकु
श्च वल्मीकं पुंनपुंसकमित्यमरः वहतेर्ष्ट्रिश्च वाहीको गोः वाहश्च सुप्रपूर्वादिणस्तु इ॰, सुप्रतीकः शाम्यतेः शमीकः ऋषिः एवमन्येप्यूह्याः तदाह इत्या
दीति पृ पृणूथं पुरीषं वर्चस्कमस्त्री विष्टाविषे स्त्रियाविमत्यमरः अजेः अमरोक्तमाह ऋजीषमिति किंच उद्धृतरसः सोमलताख्यः शेषोपि ऋजीषम्
एतच्च ऋजीषिणां वृषणां सश्चत श्रिये आसत्योयातु मघवां ऋजीषी इत्यादिमंत्रभाष्ये स्पष्टम् अयमिति ईयन्प्रत्ययः अरुद्धुतस्यागम इत्यर्थः वोपा।

उ·
म·क· लितोक्तिमाह अंबरीषइत्यादि अंबरीषं रणे भ्राष्ट्रे क्लीबं पुंसि नृपांतरे नरकस्य प्रभेदे च किशोरे भास्करेऽपि च आम्रातके नुतापे चेति मेदिनी कृशद करीरो
८६ वंशाङ्कुरे स्त्री वृक्षभिद्घटयोः पुमान् करीरा चीरिकायां च दंतमूले च दंतिनामिति मेदिनी शूरीरं वर्ष्म विग्रह इत्यमरः अर्द्धर्चादित्वाच्छरीरोऽपि वाहुला-
कात् हिडि गत्यनादरयोः हिंडते इतस्ततो गच्छतीति हिंडीरः हिंडीरोऽब्धिकफः फेन इत्यमरः डिंडीरोऽपि च हिंडीर इति द्विरूपकोशः किर्मीरः जंवीरः तूणीरादयो-
प्येवं बोध्यां किर्मीरो नागरंगे च कर्बुरे राक्षसांतरे इति मेदिनी जंवीरः प्रस्थपुष्पे स्यात्तथा दंतशठद्रुमे इति च उशीरं वीरणमूलं उशीरोऽपि मूलेस्या।
शीरमस्त्रियां अभयं नलदं सेव्यमित्यमरः कुरीरमिति कपिलिकादित्वात्त्वे कुलीरः कर्कटकः घसेः क्षीरमिति उपधालोपः कत्वं षत्वम् क्षीरं दु।
ग्धे च नीरे चेति विश्वः गम्भीरमिति निम्नं गभीरं गंभीरमित्यमरः पचेरलिमच् कर्त्तर्ययं कृत्यप्रत्ययेषु रिदुपसंख्यानात् शेरतेऽनेन शीधुः मद्यविशेषः मैरेयमासवः शी-
धुरित्यमरः अर्द्धर्चादिपाठात् क्लीवं च पुन्नपुंसकयोर्द्रार्जीवातुः स्यात्शुशीधव इति त्रिकांडशेषः शीलं स्वभावे सद्वृत्ते इति मेदिनी जलनीलीतु शैवालं शैवल
इत्यमरः शैवलं पद्मकाष्ठे स्याच्छैवालं तु पुमानपमिति मेदिनी शब्दार्णवोक्तिमाह शैवालमित्यादि उलूकादयश्च उलूकः पुंसि काकारौ विंद्रे भारतयो।
धिनि इति मेदिनी वदेर्यङ्लुगन्तादूकः वाचोयुक्तिपटुर्वाग्मी वावदूकश्च वक्तरीत्यमरः शमेर्वुक् शंबूको गजकुंभांते घोंघे च म्लेच्छतापसे इति मेदिनी वाहु-
लकादुकप्रत्यये ह्रस्वमध्योऽपि जंवूकं जंवुकं प्राहुः शंवूकमपि शंवुकमिति द्विरूपकोशः जंवूकवंधूकादयोऽप्यत्रैव द्रष्टव्याः जंवूकः फेरवे नीचे पश्चि-
माशापतावपीति विश्वमेदिन्यौ वंधूकं वंधुजीवं स्याद्वंधूकः पीतसारके इति च शलिमंडि सौगंधिकं तु कल्हारमित्यादावुपक्रम्य शालूकमेषां कंदः स्या-
दित्यमरः एषां सौगंधिकादीनां केरवांतानां कंदो मूलमित्यर्थः नियो मिः नेमिर्नाभिति निशेकूपत्रिकाचक्रांतयोः स्त्रियामिति मेदिनी वाहुलकादन्यतो-
ऽपि यामायतो यामिः स्वसृकुलस्त्रियोरित्यंतस्यादौ रभसः यामिः कुलस्त्री स्वस्रोः स्त्री स्यंतस्यादौ मेदिनी जैत्ययेजामिः स्वसृकुलस्त्रियोरिति द्विरू- राम·
पेषु विश्वः अर्त्तेर्हस्व उच्चेस्तु चितम् ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभंगयोः वस्त्रसंकोचरेखायां वेदनापीडयोरपीति मेदिनी भवंति भूतान्य- ८६
चवर्गांतत्वं पादावजयकोशः चवर्गादिरपि प्रोक्तो यामिः स्वसृकुलस्त्रियोरिति । ञ· २

स्यामिति भूमिः भूमिर्वसुंधरायां स्यात्स्थानमात्रेपि च स्त्रियामिति मेदिनी अश्नोतेः रश्मिः पुमान् दीधितौ स्यात्पक्ष्मप्रग्रहयोरपीति मेदिनी वीज्या अमरो
क्तमाह वेणिरित्यादि वेणी केशस्य बंधने नद्यादेरंतरे देवताडे इति मेदिनी वेणी खरा गरी देवताडो जीमूत इत्यमरः ज्यानिर्हानौ स्त्रलवं स्यां चेति विश्वः जू
र्णिः स्त्री रोगः सृष्टपि अंकुशोस्त्री सृणिः स्त्रियामित्यमरः सृणिः स्यादंकुशे पुमानिति कोशांतरम् अत एव आरक्षमग्नमवमत्य सृणिं शिताग्रमिति
मोघः वृष्णिस्तु पादवे मेषे वृष्णिः पाषंडचंडयोरिति विश्वः ऐंद्रं वृष्णिं षोडशिनित्यं नोयमिति श्रुतौ वृष्णिं मेषमित्यर्थः अंगेः अग्निर्वैश्वानरेपि स्यात् चित्र
काख्यौषधौ पुमानिति मेदिनी वह्निस्त्रि वह्निर्वैश्वानरेपि स्याच्चित्रकाख्यौषधौ पुमानिति मेदिनी श्रोणिः स्त्रीपुंसयोः पंक्तौ समाने शिल्पिसंहता वि
ति च कटिः श्रोणिः ककुद्मती इत्यमरः योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमंदिरे इति मेदिनी घृणिरश्मि घृ सेचने निप्रत्ययो गुणाभावश्च घृणिः पुनः ।
अंशुज्वालातरंगेषु इति हेमचंद्रः पृश्निरल्पतनावित्यमरः पार्ष्णिः स्यादुन्मदस्त्रियाम् स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रंथ्यधरेपि चेति मेदिनी भूर्णिर्धरणी ।
त्वमिति दुर्घटाद्युक्तिः प्रत्युक्ता क्रियेति यदा भावकर्मणोः शः तदा सार्वधातुके यक् रिङ् शयग्लिंक्ष्विति रिङादेशः अन्यत्र तु यगभावेऽपि शेपरतो रिङा
देशे कृते इयङ् इत्वाभाव इति न त्वकर्त्तरि कारकेऽपीत्यर्थः परिचर्येति कथं तर्हि धन्यानां विरजस्तमा भगवती चर्येयमाहादते इति मुरारिः अत्र केचित्

उ.

म.कृ. गदमस्त्वरेतियत् नचवासरूपविधेरधिकारेपर्युदासात् क्तिनायतो बाधःस्यादितिवाच्यम् बाध्यबाधकयोर्द्वयोरपिरधिकारस्थत्वेसत्येवास्त्रियामि।

९९ तिपर्युदासप्रवृत्तेः अतएवकाशिकायांकथमास्यासाशंकाऋहलोर्ण्यदितिसमाधायवासरूपविधिप्रतिषेधस्तुस्त्रीप्रकरणविषयस्यैवोत्सर्गापवाद।

स्येत्युक्तमित्याहुः अस्मिंश्चपक्षेघञादयोपिस्त्रियांस्युः नथाच क्तल्युटनपुंसकेभावेस्त्रियांक्तिन्नादयोयतः अतोघञजपाः पुंसिपरिशेषादिति।

स्थितिरितिसिद्धांतोव्याकुप्येत अतोपवादमात्रस्याधिकारस्थत्वेपिवासरूपविधिर्नेत्येवन्याय्यम् आस्याचर्येत्यादिनुवाहुलकादितिदिक् यक

रनिवृत्तिरिति हलादिशेषस्तुनास्तिषाष्ठेद्वित्वेधातुद्वित्वेवाअभ्याससंज्ञास्वीकारात् इहचतद्भयाभावादितिभावः अयटेति यदातुयङंतादप्र

त्ययादिस्यकारस्तदाअतोलोपेयलोपेचअयटेतिबोध्यम् जागर्येति सार्वधातुकेयक् जाग्रोविचिण्णलिति गुणः गुरोश्चहलः प्रकृतस्यधातोर्हलादि

शेषगांतादंतविधौहलंतोधातुर्लभ्यते नचायंगुरुरितिसंभवति अज्विशेषोहिगुरुः अतोमत्वर्थोलक्ष्यतेतदाहगुरुमतइति ननुविपरीतमस्तुगुर्व

तात्हल्वतइतिमेवं चेष्टायामनध्वनि आशंसायांभूतवच्चेत्यादिनिर्देशात् षिद्भिदादिभ्योऽङ् कथंतर्हिमधुसुरभिमुखाब्जगंधलब्धेरितिमीघः

प्रेक्षोपलब्धिरित्यमरश्च षित्वादङि लभेत्येवयुक्तमुचितं सत्यम् अनर्थकास्तुप्रतिवर्णमर्थानुपलब्धेरितिभाष्यवार्तिकप्रयोगात् वाहुलकाद्धा क्तिन्न

पिवोध्यः एतेनर्द्धिस्तिरस्यातिरित्यादयोपिव्याख्याताः वृत्तिकृतास्तुक्तिन्नावादिभ्यइतिवचनंपुरस्कृत्यसर्वंसमाहितं एवंकंड्वादियगंतस्यकंडूतिरि।

तिक्तिन्नामर्थितः किंत्वेतत्सर्वंभाष्यविरोधादुपेक्ष्यम् तथाहि आवादिभ्यश्चेतिक्तिनमुपसंख्यायनिष्ठायांवासेटोकारवचनात्तिद्धमितिप्रवृत्तोवा

र्तिककारस्यगुरोश्चहलइतिप्राप्तिस्थलेएवआवादिभ्यश्चेतिक्तिन्नभिमतः तत्कथंलभेत्यङोविषयेऽपासनेतियुचश्चविषयेस्यात् अथापिआ।

कर्दराकृतिगणत्वंस्वीकृत्यबाहुलकलभ्योपिआवादिकृत्योनिक्षिप्येत उपेयप्रतिपत्त्यर्था उपायाअव्यवस्थिताइतिन्यायात् तथापिकंडूतिरितिक्ति राम.

नोदाहरणमशुद्धमेव नपदांतसूत्रस्यभाष्यविरोधात् तत्रहिकंडूतिरित्युदाहृत्यनेतदस्तिप्रयोजनं कंड्वेत्येवभवितव्यमितिनिर्द्धार्यक्तिचकोचेति ९९

…चिन्नाह्लणाकं इतिरित्युदाहृतं नचैवंविधैर्भाष्यकृद्भिरेवस्पष्टं निराकृतेर्थेवहुलग्रहणांप्रभवति एतेनवृत्तिकारानुगामिनः प्राचोपिग्रंथः प्रत्युक्त इ
त्यवधेयम् भिदेतिएवमादयः अजङ्ताःसमुदाया एवगणेपठ्यंते तत्रयेप्रकृतिभागाःतेभिदादिशब्देनसूत्रेनिर्दिष्टाः गणेविशिष्टपाठस्तुलोकप्रसिद्धा
र्थविशेषस्यकचिद्लाक्षणिककार्यस्यचसंग्रहार्थः प्रकृतयस्तुभिदिर्विदारणे छिदिर् द्वैधीकरणे विदज्ञाने क्षिपप्रेरणे गुहूसंवरणे डुधाञ्धारणा
पोषणयोः मिद्रमेद्रहिंसाक्लेशनयोः ऋगतौ हृञ्हरणे क्षिक्षये क्षिनिवासगत्योरितिच त्वक्षवनतरणयोः धृञ्धारणे लिखअक्षरवि न्यासे चु
म्बेरणे पीडअवगाहनेडुवपवीजतंतुसंताने वसनिवासे मृजूशुद्धौ कृपकृपायामितिवेदितव्याः भित्तिरन्येति भिद्यतइतिभित्तिः कुड्यम् छि
देति द्वैधीकरणे अन्यत्रतुछित्तिश्छिद्रम् गुहादरी ओषधिविशेषश्च अन्यत्रगूढिः अर्यतेनयाअश्वाः आराप्रतोदः आर्त्तिरन्या आङोनेत्वंच उ
पसर्गात्तदिति धात्त्वा वित्तिवृद्धिः आरहाराकारानाराधारेतिपंचसुक्रमइशोडोतिगुणोदीर्घत्वंनिपात्यते लिखेस्तुगुणः लकारस्यपक्षेरेफश्च रेखा
लेखा चुदेर्ड त्वंदीर्घत्वंच चूडाविंतिपूजिचकारोनुक्तसमुच्चयार्थः तेनतोलपतेस्तुलेतिह रदत्तः यद्विवंदिविदिर्लाभार्थोग्रह्यते ज्ञानार्थस्यतुसंवित्तिः वि
द्वेदनाख्यानविवासेष्विति चुरादिर्ज्ञानेपिवेदनेतिसिद्धम् प्रच्छर्दिकेतिच्छर्दवमनेप्रवाहिकेतिप्रवाहयतिमुहुर्मुहुःप्रवर्त्तयतीतिग्रहणी विचर्चिके
ति पामाचर्चेअध्ययनेप्रत्यययोपसर्गाभ्यांरोगप्रतीतिः शिरोर्त्तिरिति शिरःपीडा अर्दहिंसायाम् तितुत्रेतिनेट् आसिकाशायिकेति आसनंशयनमित्यर्थः
इकृश्तिपौधातोर्निर्देशानुकरणम् वहुलमित्यनुवृत्तेः क्वचिन्नगुप्तिज्किद्भ्यःसन् पचतिरिति उपसर्गात्सुनोतिसुवति ध्यायतेःसंप्रसारणंचइत्यादि
निर्देशादकर्त्तर्यपिपरेशवादयः एवंभावकर्मवाचिन्यपिक्वचिद्यक् विभाषा लीयतेरितियथातत्रहिलीलीङोर्यकानिर्देशइत्युक्तम् यत्तुप्रा
चाशिल्करणसामर्थ्याल्लुवादयइत्युक्तंतन्न पिवतिग्लायतिरित्यादौपिवाद्यादेशप्रवृत्त्या आत्वनिवृत्त्याचशिल्स्यचरितार्थत्वात् वर्णादितिवर्णा
नुकरणादित्यर्थः ननुवर्णाद्दुच्चार्यमाणादिति तथाहिसति अकारइत्यादावेवस्यात् ननुककारइत्यादौ संघातस्योच्चारणात् अनुकार्यत्विहवर्णमात्रं

अकारस्योच्चारणार्थत्वात् कयतेर्ह्रस्वः काश्चकार इत्यादि अत्राहुः क्वचित्संघातादपि वषट्कार इति सूत्रनिर्देशात् सर्वे वकाराः प्रत्याख्यायन्त इति भा
ष्यात् बहुलवचनाच्चेति इह कारप्रत्ययस्य धातोर्विहितत्वेपि अधिकारबलात्कृत्संज्ञा तेन कृदन्तत्वात्प्रातिपदिकत्वं प्रयोजनाभावान्न ककारस्येत्सं
ज्ञा आर्द्धधातुकसंज्ञाभावान्नेट् अस्यच्चाविस्यादौ नप्रत्ययो बाहुलकादेव रादिफः षासहृपविधिना कारोपि रकारादीनि नामानि श्रृणवतो मम पार्वति
अकारलोप इति अतद्धितपरत्वादभस्याच्चयस्येति लोपस्याप्राप्तिः प्रातिपदिकत्वं तु कृदन्तत्वात्सूर्ववद्बोध्यम् बाहुलकान्नेह छः तमोमत्वर्थ इति।
बाहुलकादेव मत्वर्थशब्दादपि शेषिकान्मत्वर्थीयात् इति यथा अन्ये तु नैतत्स्फुरन्तम् किंतु मत्वर्थे भव इति विग्रहे गहादित्वाच्छे तद्धितान्तमेवेत्या
हुः इणाजादिभ्यः धात्वर्थे निर्देशे ण्वुल्लोपवादोयम् एवमग्रेपि आजिरिति बाहुलकादजेर्वीभावो न संज्ञायां अधिकरणे ण्वुलर्थे आरंभः उद्दालकः
श्लेष्मातकः तस्य पुष्पाणि भज्यन्ते यस्यां क्रीडायां सा तथा अस्याचतरत्वेन सूत्रे आख्यानशब्दस्य पूर्वनिपातेपि आख्यानस्य प्रश्नपूर्वकतया आर्थ।
क्रममनुसृत्य व्याचष्टे परिप्रश्ने आख्याने चेति परिपाटीति पटगतौ परिपूर्वः इणाजादिभ्य इतीण् कृदिकारादिति ङीष् आक्रोशः शयनम् नपुंसके भावे
क्तः ननु तयोरेव कृत्यक्तखलर्थाः इत्येव सिद्धं अत्राहुः भूते इत्यधिकृत्य निष्ठेति सूत्रेण विहितस्य क्तस्य भावोऽर्थस्तेन विहितः अनेन तु कालसामान्येन नपुंसके
भावे क्तो विधीयते अत एवायं स्वविषये परत्वाल्ल्युट्ञ्जपां बाधकः परिशेषात्तेषां पुंविषयत्वं सिध्यतीत्युक्तं स्यादेतत् इह भावे चाकर्मकेभ्य इत्येतस्य संनिधा
नात् अकर्मकेभ्योप्ययं स्यात् घञादिवत् इति चेत् इष्टापत्तिः गतं तिरश्चीनमित्यादिदर्शनात् नन्वेवं तद्योगे कर्मणि द्वितीया स्यात् कृद्योगलक्षणा षष्ठ्यान
लोकेति निषेधात् एवं च घटं कृतं वृक्षं छिन्नमित्यादि प्रसज्येतेति चेत् न नपुंसके भावे क्तस्य योगे षष्ठ्या उपसंख्यातत्वात् ननु शेषविवक्षामाश्रित्य प्रसा।
ख्यातं तदाकर इति चेत् तर्हि तत्प्रामाण्यात्तत्र प्रायेण शेषविवक्षैवेत्यस्तु क्वचित्तु द्वितीयापि दृश्यते भ्रान्तं देशमनेकदुर्गविषममिति यथा अन्ये त्वाहुः अप
मपि क्तोऽकर्मकेभ्य एव नयाहि तयोरेवेति सूत्रे भावे चाकर्मकेभ्य इत्यनुवृत्तं वाक्यभेदेन व्याख्येयम् तद्यथा कृत्यादयो ये तत्र सूत्रविहिताः तान् न्स्वभा

कर्मणोरेवेत्यर्थविधायकमेकंवक्यं तेननिष्ठेतिविहितस्यक्तस्यभावोप्यर्थोलभ्यः अनुवृत्तेनत्वाक्यांतरेणानुभावेयोयंक्तः इत्य नूद्याकर्मकेभ्यइतिविधेयंव्य
वस्थाप्यते सचानुवादोनिष्ठेतिनपुंसकेभावेक्तइतिचविहितयोः क्तप्रत्यययोरविशिष्टः आशितःकर्त्तेतिसूत्रस्थंभाष्यकैयटादिकंचात्रानुगुणं अस्मिंश्च
पक्षेऽविवक्षितकर्मत्वेनाकर्मकतामाश्रित्यगतंभुक्तमित्यादिसमर्थनीयमितिदिक् कर्मणिच कर्तुरितिकर्मणिषष्ठी उभयप्राप्तौकर्मणीतिनियमात्
नेतितृतीयातत्राह येनस्पृश्यमानस्येत्यादि स्तुइत्यादिति नपुंसकेभावेइतिवोध्यम् अतएवाह पूर्वेणेतिनेहेति णिजर्थप्रतीतिभावः करणाधिकरण
योश्च येननाभासित्यायेनघञोपवादोयं अजपोस्त्रीप्रत्ययांश्चपरत्वाद्वाधते उक्तंहि अजवुभ्यांस्त्रीखलनाःस्त्रियांखलनौविप्रतिषेधेनेति आ।
कुर्वंतीति एत्सकुर्वंतिव्यवहारमस्मिन्नत्सः आकरः उत्पत्तिस्थानम् गोचरोदेशइतितथाचभारविः उपारताःपश्चिमरात्रिगोचरादिति विषयपर्यायोप्य
यं तथाचप्रयुंजते उपादानगोचरंज्ञानमिति संचरंतेनेनेति समस्तृतीयायुक्तादित्यात्मनेपदम् एतेनसंचरंतीतिप्राचःपरस्मैपदपाठःप्रयुक्तः अव
हारेत्यादिवृत्तिकारस्तु आ आसवापशब्दो सूत्रे प्रक्षिप्यवकारेणावहारशब्दं संजग्राह तन्नवैरूप्यंनिर्मूलम् उदंकोनुदकेहलश्चेतिसिद्धेउदकप्रति
षेधार्थवचनम् उदकोदंचनइति ननुपुंसिसंज्ञायामिति घप्राप्ते घञ्विहितः उदकेतुघञिप्रतिषिद्धे घएवस्यादितिचेन्नैवम् प्रतिषेधसामर्थ्याद्घ।
स्याप्यप्रवृत्तेः नहीहघेघञि वारूपेविशेषोस्ति नचस्वरेविशेषः घेहिसतिकृदुत्तरपदप्रकृतिस्वरेणांतोदात्तता घञ्यपिथाथादिस्वरेणतथैवेति जाल
म् जलधान्ये ज्वलितिकसंतेभ्योणइतिजालशब्दः सिद्धः अतस्तन्निपातनमिहनशंकनीयंखनोघच् घित्करणमिति नहिखनः चजोरितिकुत्वार्हः कश्चि
दवयवोस्ति येनघित्करणमिहोपयुज्येतेतिभावः एतद्इति आखनादयः षडित्यर्थः ईषद्दुःसुषु इहसामान्योक्तावपियोग्यताबलात् विशेषणस्यविषयवि
भागोलभ्यते कृच्छ्रार्थेदुरि अकृच्छ्रार्थयोरितरयोरितिनदेतद्दर्शयति कृच्छ्रेदुष्करं इत्यादिनाभवतेति नलोकेतिषष्ठीनिषेधात्कर्त्तरितृतीया कृच्छ्रेत्यादि
किम् ईषत्कार्यम् अल्पमित्यर्थः निमीतिमीनातिमिनोतिदीङांस्थापिच विभाषालीयतेरितिप्राप्तंनिषिध्यतेनिमयइत्यादि उपसर्गात्खलघञोः लभे

उ·
म·छ· ऽस्येव सिद्धे नियमार्थमिदम् उपसर्गादेव खल घञोरिति तदेतदाह उपसर्गादेवेति कर्तृकर्मणोश्च भूकृञोः चकारः सन्नियोगार्थः यदा कर्तृकर्मणोरीष
१०१ दादीनां च युगपत्प्रयोगः तदा प्रत्यययोर्यथा स्यात् न च कर्तृकर्मणोः प्रत्ययार्थत्वमेवास्त्विति वाच्यं तथात्वे ईषदादीनामेवोपपदत्वात् खलः खित्व
स्य वैयर्थ्यापत्तेः मुमर्थं हि तत् मुम् चाव्ययस्य विधीयते तस्मात्कर्तृकर्मणोरस्तूपपदमेव तदेतदाह ईषदादिषु चेति इह कर्तृकर्मणोर्भूकृ
ञोश्च द्वौ तयोर्यथासंख्यं प्राप्तं स्वीकृतं च तथैव वृत्तिकृता अनुसृतं च तदेव न्यासकारहरदत्तमाधवादिभिः एवं प्राचाप्यत्र तथैवोक्तं तद्व्याख्यातृभिश्चा
नुमोदितं तदेतत्सर्वं नादर्त्तव्यमिति ध्वनयन्नाह यथासंख्यं नेष्यत इति एतच्च यथासंख्यसूत्रे भाष्य एव स्पष्टमिति भावः स्यादेतत् च्व्यर्थयोरिति ताव
त्इहैव सूत्रे भाष्यवार्त्तिकयोः स्पष्टम् एवं च यथासंख्यनिराकरणस्य फलं दुर्वचम् नहि भवतेः कर्मणि संभवः प्रायेणाकर्मकत्वात् प्राप्त्यनुभ
वादिषु सकर्मकत्वेपि च्व्यर्थासंगतेः नापि करोतेः कर्तरि संभवः च्व्यर्थासंगतेरेवेति चेत् तत्किं यथासंख्यसूत्रस्य भाष्यादिकमपार्थकमिति ब्रूषे
ननु तस्य गतिं पृच्छामीति चेत् शृणु अन्तर्भावितण्यर्थस्य भवतेः करोतिना कर्मकर्तृविषयस्य करोतेश्च भवतिना तुल्यार्थतया भवतेः कर्मणि करोतेः।
कर्तरि चोपपदे खल्प्रत्ययसिद्धिरेव यथासंख्यनिराकरणस्य फलमित्यवधेहि स्यादेतत् उपपदयोर्मध्ये पूर्वापरीभावव्यवस्था न सिध्यति कर्तृक
र्मणोर्हि भूकृञोरव्यवहिते इष्यते विपरीतं च प्राप्नोति तेप्राग्धातोरिति वचनेन सुदुरोः प्राक्त्वावश्यंभावात् न चाव्यवहितेपि प्राक्त्वमस्त्येवेति वाच्यम्
छंदसि परेपि व्यवहिताश्चेति सूत्रारंभेणाव्यवहिते प्राक्त्वमेवार्थ इति स्वीकारात् न चैवं खलः खित्वस्य वैयर्थ्यं स्यादिति वाच्यं कृद्ग्रहणे गतिकारक
पूर्वस्यापि ग्रहणमिति सुदुर्भ्यां विशिष्टस्य खिदंततया ततः पूर्वस्य कूलमुद्रुजादाविव मुमः संभवात् किंच ईषदुद्ध्वस्यगस्यादिसंज्ञाणां हि सेनन्ते प्रागि
त्येतत्सूत्राविषयतया व्यवहितप्रयोगसंभवेन तत्र मुमर्थं खित्वमस्तु तस्मादिष्टव्यवस्था कथं लभ्येति चेत् अत्राहुः बहुलग्रहणानुवृत्त्या दुराढ्यंभव
मित्यादिभ्याप्योदाहरणाच्च इष्टव्यवस्थासिद्धिरिति तदेतत्सकलमभिप्रेत्याह कर्तृकर्मणोश्चेति भवतेः कर्तर्युदाहरति अनाढ्येनेति कर्मणि तु अना· राम· १०१

ढक् आढ्यो भूयत इति विग्रहः भाव्यत इति तदर्थः एवमग्रेपि विग्रहद्वयमुन्नेयं यत्तु प्राचा अदुराढ्येन दुराढ्येन भूयत इत्यादि विगृहीतं तन्न अर्थे विशेष
स्य ईषः आढ्यशब्देन सह सामर्थ्याभावात् समासायोगात् प्रत्युदाहरणे तु ते प्राग्धातोरित्यस्य निर्बाधत्वादाह सुभूयत इति काशिकायां तु स्वाढ्येन भू
यत इत्युक्तं तत्सामादिकमिति हरदत्तः क्तिच्क्तौ प्राचा तु क्तिच् क्तौ चेति पठित्वा क्तिच् क्तश्च स्यादिति व्याख्यायकदुक्तिः क्तिचा बाधा माभूदिति इति पठि
ते तत्सकलविरोधादुपेक्ष्यम् क्तिच् चकारेण क्तिचीति विशेषणार्थ इति प्राञ्चः तन्न एकानुबन्धकपरिभाषयैव क्तिनो व्यावृत्तिसिद्धेरिति हरदत्तः यत्तु व
दन्ति तितुत्रेत्यत्र क्तिन्क्तिचोः सामान्यग्रहणार्थश्चकारः अन्यथैकानुबन्धकत्वादस्यैव ग्रहणं स्यात् न क्तिन इति तन्न तितुत्रेति सूत्रेऽनुबन्धविशिष्टरू
पानुच्चारणेनोक्तपरिभाषाया उक्तिसंभवस्यैवाभावात् एतेन तितुत्रेति सूत्रे एकानुबन्धकत्वात्तिचेव ग्रहणेत ततश्चरोदितीतीणन स्यादिति शंका छ
ती स्यनुष्टस्यात तत्समाधानं चेति द्वयमपि प्रत्युक्तं भूतिरिति यद्यपीह परत्वात् श्युकः किती त्येव इण्निषेधो न्याय्यः तथापि वंतितेत्योरावश्यकत्वात्फ
ले विशेषाभावाच्च तितुत्रेत्युपन्यस्तम् यंतिरित्यादि यम उपरमे रम क्रीडायां वनु याचने तनु विस्तारे अलंखल्वोः पूजार्थमिति ननु विकल्पार्थ।
मस्तु अलंरुदित्वा अलंरोदनेनेति रूपद्वयं हीष्यत इति चेत् न वासरूपन्यायेनैव सिद्धेः ननु त्वसुट्वासरूपन्यायो नास्ति क्तल्युट्तुमुन्खलर्थेषु नेति।
सिद्धान्तादिति चेत्न क्तल्युडादयोपवादभूताः स्ववाध्यं निसंबाधंत इति हितस्यार्थः इह तु ल्युटोपवादः क्त्वेति वैषम्यात् ननु प्रेषादिषु कृत्यवच।
नेनास्मधिकारादूर्ध्वं वासरूपविधिनावश्यमस्तीति ज्ञापितमिति चेत् किं ततः इह तदभ्युपगमे बाधकाभावात् अलं दत्त्वेति अपात्रे न देयमित्यर्थः।
उदीचां मेङः क्त्वातस्यायं निर्देशः नानुबंधकृतमनेजन्तत्वमिति ज्ञापयति तेन घुसंज्ञायां देपोप्यदाविति पर्युदासः सिध्यति अपमित्येति समासेन
ल्यपूर्व इति वक्ष्यमाणेन क्त्वो ल्यप् परावरयोगे च अप्राप्येति दक्षिणादेशस्थानां गंगामप्राप्य विंध्यः गंगाप्राप्तिविरहविशिष्टदेशस्थ इत्यर्थः अत्र विं
ध्यासरणं गंगेति गम्यते अतिक्रम्येति पर्वतस्याय रस्तादित्यर्थः प्रागुक्ते एव विषये अयमपि प्रयोगः विशेषणविशेष्यसंसर्गास्तु भिद्यंत इति स्पष्टमेव

उ. म. कृ. इह त्रिसूत्र्यां विधेयस्य क्त्वाप्रत्ययस्य घञपि भावमात्रमर्थस्तथापि द्वितीयक्रियायाः पूर्वकालत्वस्य वाभावात् अलंखल्वोरिति पावरेति चारभ्यते उदी।
१०२ चामिति तु पूर्वकालत्वाभावादिति विवेकः एवं चेह मध्यमं विहाय सूत्रद्वये अधिकारलभ्यं धातुसंबंध इत्येतन्न संबंधनीयम् कथं वित्संबंधनीयमित्या।
शङ्के तु अपूर्वकालार्थे वत्रिसूत्रीस्वधेयं समानकर्तृकयोः इह धात्वधिकारेपि समानकर्तृकत्वं क्रिययोरेव संभवतीत्याशयेनाह धात्वर्थयोरिति निर्द्धार
णे षष्ठी सप्तमी वा पूर्वः कालो यस्यार्थस्य तस्मिन्नित्यर्थः क्त्वाप्यादिति स्वभावे अव्ययकृत इति वचनात् तुमर्थे इत्यनुवृत्तेर्वा नच सोपि भाव इति
कथं लभ्यतामिति वाच्यं तुमर्थे सेसेतीति ज्ञापकेन तद्दाभात् तथाहि कर्तरि कृदिति कर्तरि प्रसक्तौ तुमर्थे इत्युच्यते तथा च तुमर्थो न कर्तेति स्थिते भाव
एव पर्यवस्यति अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवंतीति न्यायात् अयमिह निष्कर्षः भावोपि घञादाविव नेह सिद्धावस्थः किंतु साध्यावस्थः स च।
धातुनैव लब्धः क्त्वाप्रकृत्यर्थभूता क्रिया च क्रियांतरं प्रति विशेषणं धातुसंबंधाधिकारात् संसर्गश्चेह सामानाधिकरण्यमुत्तरकालत्वं च तत्र संस
र्गविशेषे तात्पर्यग्राहकाः क्त्वाणमुलादयः अत्र च समानकर्तृकयोरिति सूत्रांशेन सामानाधिकरण्यमुपनिबद्धं धातूपात्तव्यापाराश्रयस्य कर्तृत्व।
यात् तथा पर्यवसानात् निर्द्धारणविभक्त्या चैवोक्तस्य त्वस्फुटीकृतं अन्यथा हि समानेकर्तरीत्येव ब्रूयात् निर्द्धारणविभक्तिबलादेकत्व च पूर्वकालत्व इत्यस्य बहु।
व्रीहित्वं निर्णीयते निर्द्धारणस्य सजातीयविषयतानियमेन निर्द्धार्यमाणस्य क्रियात्वलाभात् अत एव तत्र विद्यमानादिति व्याख्यातं एवं च कर्माध्ययमा
श्रितं पूर्वस्मिन्काले वाच्ये क्त्वा भवतीति केषांचि द्व्याख्यानमयुक्तमेव किंच पूर्वकालो न वाच्यः तद्विशेष्यकबोधापत्तेः नचेष्टापत्तिः क्रियाप्राधान्यविरहेणाख्या।
तीस्यापि द्वित्वाभावापत्तेः नच गुणीभूतक्रियामाश्रित्य तदिति वाच्यं पाचकादावतिप्रसंगात् अपि च एवं सति धातुसंबंध इत्यस्य बाधापत्तिः न च परंपरा
संबंधस्तस्यार्थः अधिकृतस्य तस्य यथाविध्यनुप्रयोग इत्यादिसूत्रद्वयविषये साक्षात्संबंधपरतायाः दृष्टत्वात् तथात्वे लाघवाच्च अत एव वाक्यार्थस्या राम.
प्राप्तत्त्वसंबंध एवेह योग्यो न तु पदार्थभूतः इति कर्मप्रवचनीयाद्वैषम्यम् तत्र हि उपपदविभक्तेः षष्ठ्यपवादतया संबंधस्य पदार्थत्वे स्थिते क्रियाया द्योतको १०२

नार्थसंबंधस्य नवाचकः नापि क्रियापदास्ते पि संबंधस्यानुभेदक इति स्वीकृतम् किंच पूर्वत्र क्त्वाप्रत्ययस्य कालो न वाच्य इति तदैकरूप्याये हापि तथैवोचितं नहि स
त्तमीनिर्देशमात्रेण वाच्यत्वं लभ्यते उदोनूर्ध्वकर्मणि कर्तृस्थे चाशरीरे कर्मणि प्रथने वाव शब्दे गोत्रचरणात्श्लाघात्याकारतदवेतेष्वित्यादौ सहस्रशो व्यभि।
चारात् तेत्रानुशासनतस्तस्य तत्तद्विशेषावगतिराक्षेपादेव भवतीत्यन्यलभ्यत्वमिति यदि तर्हीहापि तुल्यमिति दिक् द्वित्वमिति ननु अमीषां ब्राह्मणानां पू
र्वमावये त्युक्ते मध्यमो नानीयते तेन थे हापि बहुक्रियासमभिव्याहारे मध्यमक्रियावाचकात्प्रत्ययो न स्यादिति चेत् मैवं इह हि आख्यातवाच्या क्रियाप्र।
धानम् तां प्रति क्रांतोपस्थिताः सर्वा एव विशेषणं ननु तासां परस्परं संबंधः गुणानां च परार्थत्वादिति न्यायात् अत एवानियतः प्रयोगः स्नात्वा भुक्त्वा।
पीत्वा व्रजति पीत्वा स्नात्वा भुक्त्वा व्रजतीत्यादि स्वरतिसूतीति विकल्पे प्राप्ते आह स्वरत्यादेरिति स्कंत्वेति एकाच इति नेट् मृडमृद मृद सुखने मृदक्षो
दे गुध परिवेष्टने गुध रोषे च कुष निष्कर्षे क्लिश हिंसायां दिवादिः क्लिशू विबाधने क्र्यादिः वद व्यक्तायां वाचि वस निवासे उषित्वेति वसतिक्षुधोरिति इट्
यजादित्वात् संप्रसारणम् शासिवसीति षः नोपधात् अत ग्रहणं स्पष्टार्थम् कोथित्वा रेफित्वेति कुथपूतीभावे रिफ कत्थनयुद्धनिंदाहिंसादानेषु इह
रलो व्युपधादिति विकल्पोऽपि न भवति नोपधग्रहणसामर्थ्यात् लुचित्वेति लुंच अपनयने ऋतित्वेति ऋतिः सौत्रो घृणार्थः तस्या ईयधातुकविषये ईय।
ङो विकल्पनात् तदभावे कित्वमनेन विकल्प्यते तृषिमृषि ञितृष पिपासायाम् मृष तितिक्षायाम् कृश तनूकरणे काश्यपग्रहणं पूजार्थमवेति हि वित्रेते उ
दितो वेति विकल्पे प्राप्ते आह अंचेरिति अंचित्वेति न क्त्वा सेडिति कित्वाभावान्न लोपो न एवं चेह नाञ्चेः पूजायामिति नलोपो नेति प्रसादोक्तिर्निर्विषया।
जृव्रश्च्योः जृ इत्यस्मात् क्त्वः किन्तीति निषेधे प्राप्ते व्रश्चेरुदित्वाद्विकल्पे प्राप्ते वचनं खात्वा खनित्वेति उदितो वेति वेट् जग्ध्वेति जरो जरीति पाठः।
कोधलोपः समासे अनञ्न्सदृशमव्ययम् तत्पूर्वपदं यस्येति व्याचष्टेऽव्ययेति प्रकृत्येति प्रशब्दः क्त्वा प्रकृत्यर्थे गतं प्रकर्षं द्योतयन् कुगतिप्रादय इ
ति क्त्वां तेन नित्यं समस्यते षत्वं तु कोरसिद्धः कोसिचदिति एङः पदान्तादतीति पूर्वरूपमेकादेशः तस्यांतादिवच्चेति पराविवद्भावादेोसिचदिति परम्

उ·
म·कृ· तेनसकारस्यापदादितयाऽऽत्सदाद्योरितिनिषेधाभावात्षत्वं प्राप्तं एकादेशस्यासिद्धत्वेऽकारेणाव्यवधानात् इणःपरत्वाभावान्न भवतीति प्रासंगिकं षत्वमुदाहृ-
१०३ त्यप्रकृतं त्वपि कार्यमुदाहरति अधीत्येति विधायेति दधातेर्हिन्निप्रदाय दोदद्घोरितितिनप्रत्वम् जनसनखनेत्यात्वं न प्रत्यापयतिस्यतीत्यात्वं न प्रक्रम्य क्रमश्च
क्लीतिदीर्घेण आपृच्छ्य प्रदीव्य छ्वोःशूठेन इडभावस्तु प्रत्वस्य प्रदीव्येत्यादावेव बोध्यः अन्यत्रापि कथं तर्हि निपीयपयस्येति पीङ् पाने इति दिवादेरित्यदोषः इहप्र
शायप्रच्छायेत्यत्र शाच्छोरन्यतरस्यामिति प्राप्तस्येत्वस्याप्यभावो बोध्यः विगणय्येति नन्विह णौ कृतस्यात्वोपस्य पूर्वस्मादपि विधौ स्थानिवद्भावाल्लघुपूर्वत्वं
नास्तीत्यारंभसामर्थ्यम् अनुगमय्येत्यादौ मित्त्वचरितार्थत्वात् अत्रोच्यते पूर्वस्माद्विधौ स्थानिवत्त्वमनित्यं निष्ठायां सेटीति लिंगात् तथाहि तत्र सेटीति प
दं नतावदनिड्व्यावृत्त्यर्थम् णिजंतात्तदसंभवात् ननु संज्ञपितः पशुरित्यत्र यस्य विभाषेतीण्निषेधसंभवस्यैवानिष्टम् मनोवंतेति विकल्पितेट्कत्वात् इतिचे
न यस्य विभाषेत्यत्र एकाच इत्यनुवृत्तेः अन्यथा दरिद्रितइतीण्न स्यात् तस्मात्कालावधारणार्थं सेड्ग्रहणं इटि कृते णिलोपो न तु ततः प्रागिति अन्यथा का
रितमित्यादौ णिलोपे कृते एकाच उपदेश इतीण्निषेधः स्यादिति यदि तु पूर्वस्माद्विधौ स्थानिवत्त्वं तर्हि णिचा व्यवधानात् निषेधप्राप्तिरेव नास्तीति सेटीत्य।
नर्थकं सन्नस्यानित्यतां ज्ञापयतीति स्थितं एतच्च वस्वेकाजिति सूत्रे कैयटेन अनितेरंत इति सूत्रे हरदत्तेन च स्पष्टमेवोक्तं माधवस्तु परिवृढय्यात इत्यत्र।
आभीयत्वेनासिद्धतामाशंक्य व्याश्रयत्वेन परिहृत्य पूर्वस्मादपीति स्थानिवत्त्वमाशंक्य प्रवेभिदय्य प्रस्तनय्येत्यादिभाष्योदाहरणबलेन तदभावमाह अथ
वा पूर्वस्मादपीति पंचमीसमासपक्षस्त्यज्यतां तदीयोदाहरणानां वेभिदिता माथितिकः अपीपचन्नित्येषां प्रकारांतरेणैव निर्वाहस्य प्रागेवोक्तत्वाच्छ्वछ्
कौ सुभे प्रपंचितत्वाच्चेति दिक् प्रणमय्येति मितां ह्रस्वः प्रवेभिदय्येति भिदेर्यङंतात्क्विप् अत्तोपे यस्य हल इति यलोपः न च ह्रस्वयलोपात्लोपानामाभीय
त्वेनासिद्धत्वाल्लघुपूर्वत्वाय रो णेर्नास्तीति वाच्यं व्याश्रयत्वात् ह्रस्वादयो हि णौ णेरयादेशस्तु ल्यपि परत इति विभाषापः आप्नोतेरिति इङ्देशस्य तु लाक्ष एम·
णिकत्वान्नेह ग्रहणमिति भावः प्राप्येति एतेन अपमयोगिव ध्रुवधपातकीभ्रमिमवाप्य दिवःखलु पार्थ इति व्याख्यातम् अवाप्येत्यस्यावाप्येत्यर्थात्- १०३

रत्नं न तत्रान्तर्भावितण्यर्थे ते ति क्लेशमनुभावयंत: पणमा: कथमिति ल्यबादेशस्य स्थानिभूत: क्त्वाप्रत्ययोऽत्र दुर्लभ: तद्विधौ पूर्वकाले इत्युक्ते: न चेह तदस्ति
पूर्वं ह्यसौ स्वपिति पश्चाद्व्याददाते यदैव हसति तदैव संमीलयतीति प्रश्न: समाधत्ते व्यादानेति एतेन ईश्वर: सर्वं व्याप्य वर्त्तते ज्ञात्वा तिष्ठतीत्याद्यपि व्याख्या।
तं श्रीशैलशिखरं दृष्ट्वा पुनर्जन्म न विद्यते इत्यादौ समानकर्तृकतानिर्वाहार्थं स्थितस्येत्यादि यथासंभवमध्याहार्यम् पायंपायमिति आतो युक् वा दीर्घ इति
गमेर्णयन्तात् णमुलि मितां ह्रस्व इति ह्रस्वे च कृते वा दीर्घ इत्यर्थ: एवं तस्यापीति यत्तु प्राचा एवं तज्जागर्तेश्च णमुलो वा वृद्धिरिति मतमुपन्यस्तं तदपाणिनीय
मिति भाव: न यदि अनाकांक्ष इति पचाद्यजन्तेन नञ्समास: तद्दर्शयति नाकांक्षते चेदिति इहेति नन्वनन्तरस्येति न्यायात् णमुलमाभूत् क्त्वा तु सूत्रान्तरेणा
स्यादेवेति चेन्न पूर्वकालत्वस्याप्राप्तिरिति व्याख्यानेन प्रकरणापेक्षस्यैव प्रतिषेधाभ्युपगमात् विभाषाग्रे यद्यप्यग्रशब्दो देशविशेषवचनोऽप्यस्ति प्रभो
र्ग्रे भुंक्ते इति तथापीह कालविशेषवाच्येव गृह्यते प्रथमशब्दसाहचर्यात् अग्रे इति सप्तम्यन्तस्यानुकरणं अत एव विभक्तेर्लुङ् न कृत: अस्य वा।
भोजमिति वा अग्रेभोजमिति अन्येभ्यो भोक्तृभ्य: पूर्वं भुंक्ते इत्यर्थ: यदि तु अग्रेप्रभृतिभिर्व्रजनादिक्रियापेक्षं भुज्यादे: पूर्वकालत्वमुच्यते तदा क्त्वा
णमुलौ न स्यातामेव ताभ्यां द्योत्यस्य पूर्वकालत्वस्याग्रेप्रभृतिभिरेव निर्णीतत्वात् उपपदसमासस्त्विह न भवति अमैव यत्तुल्यविधानमुपपदं तदेव
समस्यत इत्युक्तत्वात् स्वादुमिसर्थग्रहणं व्याख्यानात् तदाह स्वाद्वर्थेष्विति मान्तत्वमिति ननु मा भूत् णमुल् खमुञेवानुवर्त्तताम् अरुर्द्विषदिति मुम
भविष्यति एवं च मान्तत्वनिपातनमपि व्यर्थमिति चेत् नैवम् तथाहि स[illegible]स्य मुम् न स्यात् अनव्ययस्येति वचनात् ततश्च स्वादुंकारमित्यत्र चो चे।
ति दीर्घ: स्यात् संपन्नादिषु अस्य चाविति ईत्वं स्यात् किंच स्त्रियां वोतो गुण[illegible]दिति ङीष् स्यात् ततश्च स्वाद्वींकारमिति प्रसज्येत मुम: स्वरूपेण विधाने
प्येते दोषा: अत: स्वादुमीति रूपं निपात्यते ततश्च न [illegible]त्वात् दीर्घो न वा ङीष् निपातनं च भाव[illegible]प्रत्ययमात्रविषयकं तेन स्वादुंकृत्वेत्यपि सिद्धम् व्यर्थ।
त्वादिति निष्प्रयोजनत्वादित्यर्थ: तदेव दर्शयति इत्थंभूत इत्यर्थ इति [illegible] शाब्दबोधे तु वैलक्षण्यमस्त्येव तथाहि क्रियासामान्य

उ·
म·कृ· वचनःकरोतिः तदीयश्चप्रकारोऽन्यथादिशब्दचतुष्टयेनोच्यते एवंचअन्यथाकारमित्यादिभिश्चतुर्भिः प्रकारविशेषविशिष्टक्रियाबोध्यते साचभुज्यु
१०४ पात्तफलविशिष्टक्रियांप्रतिविशेषणतयासंबध्यते एकस्याअपिक्रियायाः विशेषणोपरागेणाभिन्नायाः विशेषणविशेष्यभावसंभवात् कथंतर्हि।
सिद्धाप्रयोगश्चेदित्युक्तमितिचेत् अनतिप्रयोजनत्वादितिगृहाण नत्विहसर्वथानिष्फलत्वमिति अभिधेयशून्यत्वमितिवाभिमतव्यम् भेदनिबंधनस्य
पौर्वकाल्यस्यसमानकर्तृकत्वस्यचाभावे एवुल एवदुर्लभत्वात् धातुसंबंधाधिकारबाधापत्तेश्च अथापिवचनसामर्थ्यात्णमुल् अपार्थकमेवणमुलंतं
प्रयोक्ष्यतइतिब्रूषेएवमपिवासरूपविधिबललभ्यः पाक्षिकः क्त्वानसिध्येत् नचेष्टापत्तिः भाष्यकृतैवतत्रप्रयुक्तत्वात् एतेनव्याकरणाधिकरणे अ
न्यथाकृत्वाचोदितं अन्यथाकृत्वापरिहारः कथंकृत्वाबाधकं इत्यादिमहाभाष्यप्रयोगानुदाहरन्तस्तेषांप्रामादिकतांवदंतोभट्टपादाअपिपूर्वपक्षेस्थि।
त्वाप्रौढिमात्रेणचक्रुरित्यवधेयं ननुतदुक्तिःपारमार्थिकत्वेनग्राह्यासूत्रकारवचनबलेनणमुलंतमपार्थकंप्रयोक्तव्यमितिस्वीकारेभाष्यकारवचनब
लेन क्त्वांतेपितथात्वस्यसुवचत्वात् वस्तुतःकाप्यपार्थकतानेत्युक्तत्वात् नन्वऔपाधिकमेदमादाय क्त्वाप्रत्ययनिर्वाहस्यासांप्रदायिकत्वशंकाभाष्य
कारादप्याधिकस्यसांप्रदायिकस्याप्रसिद्धत्वात् तदभिप्रायस्यचयथातथ योरितिसूत्रेहरदत्तादिभिरित्थमेवविवृतत्वात् उत्तरमीमांसायामपि अन्यो
न्यस्मिन्नन्योन्यात्मकतामध्यस्यसत्यानृतेमिथुनीकृत्यलोकव्यवहारइतिभाष्यकारैःप्रयुक्तत्वात् तत्रापिविवरणादावित्थमेवसमर्थितत्वाच्चेतिदि
क् शिरोऽन्यथाकृत्वेतिइहहिकरोतेरभावेभुजिक्रियागतएवप्रकारोगम्यतेनतुशिरसोऽन्यथाकरणं अतश्चावश्यकःकरोतिरितिभावः यथाकारमि
तिप्रष्टुमनर्हः सनृपदिदृक्षतितदेदमुत्तरम् अत्रापिवासरूपन्यायेनपक्षेक्त्वाबाध्यः कन्यादर्शमिति अत्रदर्शनविषयीभूतानांसर्वासांकन्यानांवा
कुमार्थेऽन्वयात्साकल्यंबोध्यम् सर्वाइतिदर्शनविषयीभूताःसर्वाइत्यर्थः अतिशयप्रतिपादनपरमेतत् जानातीत्यादिसत्तार्थस्यविदेरकर्मकत्वान्ने रम·
हेग्रहणंकिंत्वितरेषामेवेतिभावः यावतिविंदजीवोःविदेर्लाभार्थस्यानुकरणं तस्यहिविंदतीत्यादौशमुवादीनामितिनुमस्ति यावल्लभतइति असा १०४

...लम्अनेनदर्शयति साकल्येहिपूर्वेणैवसिद्धं चर्मोदरयोः कर्मणीत्येवेति एवंच पूरेरिति एयंतस्य निर्देशः ननुकेवलस्य अकर्मकत्वादितिभावः उदरमिति।
उदरपूरणविशिष्टाभुजिक्रियार्थः इहपूर्वकालइतिनसंबध्यतेऽसंभवात् अप्रतीतेश्च एवमन्यत्रापियथासंभवंबोध्यम् चेलेक्नोपेः व्याख्यानादर्थग्रहणमि
त्याह चेलार्थेष्विति चेलक्नोपमितियथावर्षेणचेलानिश व्यायंतेतथावृष्टइत्यर्थः निर्मूलमिति निर्गतंमूलमस्यनिर्मूलम् सहमूलेनसमूलम् विशेषणवि
शेष्यभावइतिणमुलंतस्यअनुप्रयुज्यमानधातुनाचयद्यप्येकएवार्थउपस्थितस्तथापिउपपदार्थविशिष्टोणमुलंतस्यार्थोऽनुप्रयोगार्थंप्रतिविशेषणमि
तिभावः स्नेहनेपिषः शुष्कचूर्णेतिसूत्रेएवस्नेहनग्रहणंनकृतं तत्रहिकर्मणिदृशिविदोरितिसूत्रात्कर्मणीत्यनुवर्तते इहतुपूर्वसूत्रात्करणेइति संज्ञायां
..नधिकरणार्थे आरंभः मूलकेनोपदंशमिति अयमर्थः मूलकेनभुंक्ते किंकृत्वा उपदश्य किमुपदश्य अर्थान्मूलकमिति वचनसामर्थ्यादिन्यियदिहितृती
यातेनशब्देन...समस्येवप्रसंगोऽभवेत्तर्हिकरणेइत्येवब्रूयात्करणेहनइतिवदितिभावः कालयतीति कलक्षेपेचुरादिः दंडताडमिति तडआघातेचुरा
दिः उपपूर्वेभ्यः... पीडादीनांसमाहारद्वंद्वंकृत्वाउपपूर्वः पीडादिरिति उत्तरपदलोपीसमासइतिभावः पुंस्त्वंतुसौत्रमपंचम्यर्थेप्रथमाकर्षेतिश।
पानिर्देशः कृतोपधागुणस्योच्चारणात् तत्फलंतुतुदादेर्व्युदासः यद्यपिविलेखनएवसोऽपिपठ्यते तथापिक्षेत्रविषयेविलेखनएवतस्यवृत्तिः पंचभिर्ह
लैः कृषतीतिदर्शनात् एवंचतौदादिकात्क्त्वाप्रत्ययएवभवतिक्षेत्रेउपकृष्य हलेनोपकृष्य नन्विहणमुलितिस्थितमाकरेसमासत्तौ केशग्राहमिति सं
निकर्षप्रतिपादनपरमेतत्केशेषुग्रहणंभवतुमाभवतु द्व्यंगुलोत्कर्षमिति द्वयोरंगुल्योःसमाहारोद्व्यंगुलम् तत्पुरुषस्यांगुलेरित्यच्समासांतः द्व्यंगुले।
नोत्कृष्यपरिच्छिनत्तीत्यर्थः ... तृतीयायांच अथकथमनुदात्तंपदमेकवर्जमिति नह्यत्रत्वरागम्यते अत्राहुः इहापित्वराविवक्षिता न।
थाहि परिभाषयंतेनोदात्तस्वरितौयत्रविधीयतेतत्रतत्समकालमेवैकमचंवर्जयित्वापरिशिष्टमनुदात्तंकर्तव्यंनविलंबितव्यमिति
पष्टिग्राहमिति एवंनामयुद्धायत्वरंते... यष्ट्यादिकमपिगृहीत्वाधावंतिनायुधंप्रतीक्षंतइतिभावः अव्यये अयथाभिप्रेतशब्दः आख्यान।

उ
म·वृ· क्रियाविशेषणं यथाभिप्रेतं न भवति तथा आख्यानेइत्यर्थः तदेतदाह यथेत्यादिना नीचैः कृत्वेति यद्यपीह प्रियाख्यानमभिप्रेतं तथापि तत्प्रकारस्य
१०५ नीचैस्त्वस्यानभिप्रेतत्वमस्त्येवेति भवत्युदाहरणं अत एव च अयथाभिप्रेताख्यानइति सूत्रितम् न पुनरप्रियाख्यानइति तिर्यक्कृत्वेति अनृजुत्वाद
प्रतः स्थितपार्श्वेस्थित्वेत्यर्थः स्वांगेतस्प्रत्यये कृभ्वोः तस्त्वामौ प्रत्ययश्चेति कर्मधारयः तसप्रत्यये परतो यत्स्वांगं तस्मिन्नुपपदेइति प्राचः तत्र यद्यपि स्वां
गमात्रेनोपपदं तथापि तस्मिन्निस्येतत् प्रकृतिप्रत्ययसमुदायपरमिति बोध्यम् इह यथासंख्यं नेष्यतेइति ध्वनयन्नुदाहरति मुखतः कृतमिति मुख
तोभूयेति च आद्यादित्वात्तसप्रत्यये तसिः प्रत्ययग्रहणं किम् मुखेतस्यति मुखतः तसु उपसर्गे क्विप् अधातोरित्युक्तेरत्वसंतस्येति दीर्घो न मुखतः
कृत्वा गतः इति काशिकाएतच्च प्रत्ययाप्रत्ययपरिभाषामनाश्रित्योक्तं वस्तुतस्तु नार्थः प्रत्ययग्रहणेन नाधार्थेनार्थोनानाञौ धार्थाः धमुञादयः द्वै
धं कृत्वा द्वैधंकारं द्वैधंभूय द्वैधंभावं यद्यपि धमुञादिविधौ धइत्यनुवर्त्यते षामादेशत्वाश्रयणात् स्थः निवृत्ता वेनापि सिद्धं तथापि धमुञ्जेता स्वार्थे इद
दर्शनमिति डप्रत्ययातस्य संग्रहार्थमर्थग्रहणं द्वैधीकृत्येत्यादि तूष्णीमि कृञोनिवृत्त्यर्थं भूग्रहणं अन्वच्यानुलोम्येनन्विह अच इत्यकारलोपश्चा
विति दीर्घे अनूचीति निर्देष्टुमुचितम् उदक्प्रतीचो यदितिवत् स्यादेतत् अच इत्यर्थवतो ग्रहणं स्वार्थो लोकप्रसिद्ध एव गृह्यते अभिव्यक्तपदार्था। राम·
येइत्कृत्यायात् अतो नु करणे न भविष्यतीति एवं तर्हि स्त्रियोदीर्घादित्यादावियङादिकं न स्यात् प्रकृतिवदनुकरणमित्यतिदेशाद्भवतीति चेत् तर्हि १५

प्यतिदेशादेवास्तु एवं च तिर्यच्यपवर्गे इति सूत्रेपि तिरश्चीसेव निर्देष्टुमुचितमिति चेत् सत्यं प्रकृतिवदित्यतिदेशस्य वैकल्पिकत्वाददोषः वैकल्पिक
चयन्तदेतेभ्य इति सूत्रे सदाद्यत्वस्य करणादेकशेषाभावदर्शनाच्च निर्णीपत इति प्रागेव प्रपंचितं अग्रत इत्यादि अन्वकूशब्दस्यानुकूल्यमात्रे विश्रां
शविशेषप्रमाणं नास्तीति सूचयितुमिदम् पृष्ठतोभूत्वेति इह अनुकूलोऽननुकूलो वेति शब्देन न स्पृश्यते अन्वक्शब्दस्य देशविशेषमात्रे पर्यवसा
नाभ्यमाणं तेन क्वचिदानुकूल्यलाभेपि अन्वक्शब्दस्य तस्य तत्समर्पणे व्यापारविरहात् णमुल् न किंतु क्त्वैवेति व्यवस्था बोध्या इति श्रीवेदांतप्र
तिपादिताद्वैतसिद्धांतस्थापनाचार्यलक्ष्मीधरपुत्रभट्टोजिदीक्षितविरचितायां सिद्धांतकौमुदीव्याख्यायां प्रौढमनोरमायां कृदंतप्रक्रिया ॥ ॥
शुभमस्तु ॥ ॥

उ·
म·वै· श्रीगणेशाय नमः अथ वैदिकशब्देषु विशेषमाह षष्ठीयुक्त इति वृषन्निति कनिन्युवृषीति कनिर्वृतस्य वृषन्शब्दस्य भत्वमुपसंख्यायते तत्फलं तु नल्लो
१०६ पस्य णत्व स्य चाभावः लोके तु वृष्ण्वसुः वृषाण्श्वः उभयसंज्ञानीति अयस्मयकच्छिषु अक्कृतेत्यादयः समुदाया एव बोध्याः तेन जस्त्वमस्तु कुत्वं माभूदि
ति वैपरीत्यं न प्रसज्यत इति बोध्यं नेनमिति वाचोइनाः प्रभवः तेष्वपि एनं विद्वांसं न हिन्वंति विवदितुं न गच्छंतीत्यर्थः ते प्राग्धातोः ते गत्युपसर्गसंज्ञा धातोः
प्रागेव प्रयोक्तव्या इति प्रयोगो नियम्यते· अस्यापवादश्छंदसीत्यादि सूत्रद्वयं इह संज्ञानियमपक्षोपि भाष्ये स्थितः तथाहि ते इत्यनेन प्रादीनुपनिषस
र्यैतान्स्वरूपेण परामृश्य धातोः प्राक् प्रयुक्तानामेवैषां संज्ञेति व्याख्येयं एवं च छंदसीत्यादि सूत्रद्वयं न कर्तव्यं न चैवं लोकेपि यथेष्टं प्रयोगापत्तिः क्वचिदि
ष्टापत्तेः तथा च माघः वारुणीमदविशंकमथा विश्वसुषोभवदसाविवरागः भवतिप्रेत्यादि तनापादनीयं अनभिधानात् सूत्रस्य प्रयोगनियमार्थत्वे
पि घटश्च पट इत्यादीनामनभिधानेनैव वारणीयत्वात् एवं च कर्तृकर्मणोश्चेति सूत्रे स्वाढ्योन भूपत इति वृत्तिग्रंथोप्यस्मिन्पक्षे संगच्छत इति दिक् इति
प्रथमेध्यायः ॥ यवाग्वाख्यमिति न च यवाग्वग्निहोत्रशब्दयोर्भिन्नविभक्त्यवरुद्धत्वात् तदर्थयोरभेदान्वयो न संभवतीति वाच्यं विभक्त्योर्भेदेपि क
र्मार्थकतायाः अविशेषेण विरुद्धार्थकत्वाभावात् विभक्तिभेदमात्रस्याकिंचित्करत्वादिति भावः यद्यपि गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ दिवः कर्म चेत्या
दीनामुदाहरणेषु विभक्तिविकल्पेपि विशेषणविशेष्ययोरेकविभक्तिकत्वनियमो लोके दृष्टस्तथापि वेदे नास्तीति ध्येयं प्राभाकरास्तु तृतीया च होरिति सू
त्रेण करणे द्वितीया विधीय तदित्याहुः तत्र सूत्राक्षरानुगुणं न वा भाष्याद्यनुगुणमित्युपेक्ष्यं हनति शयत इति हंति शेते इत्यर्थः त्राध्वं त्रायध्वं दा
ति दहाति विवष्टि· वष्टि इह सस्मानेव वक्ष्यमाणो न बहुलं छंदसीति सूत्रे णाभ्यासस्येकारो बोध्यः मंत्रे घस ह्वृकौटिल्ये अस्यकृतगुणस्यानुकरणं ह्वरेति
अकारस्तूच्चारणार्थः अज्ञतेति अजनिषतेत्यर्थे ऐतरेयब्राह्मणे हरिश्चंद्रप्रतिवरुणास्ये दं वचनं विभाषेति एतेन इह सूत्रे सिच इत्यनुवर्त्यसिचः। णम·
स्या निभृतोयेर्षि तिव्याख्यानात् लिङ् लिटोर्नेति हरदत्तग्रंथः परास्तः लोपस्यैकसिकतया छंदसि च रूपांतरस्यानापाद्यतया सिजनुवृत्तेर्वैफल्यात् १०६

द्वितीयोध्यायः आद्येषु चतुर्ष्विति तत्रापि सद्विजनिरमिभ्योणिजंतेभ्य आम् चिनोतेस्तु शुद्धादितिवोध्यं लोक इति वेदेपि पाक्षिकमिदं वोध्यं।
विदांकुर्वंत्विति पूर्वसूत्रादन्यतरस्यांग्रहणस्येहानुवृत्तेः पावयामिति पवतेः पुनाते र्वा णपंतादाशीर्लिङि आम् क्रियादिस्तनुप्रयोगः विदामक्रन्नि
ति विदेर्लुङ्याम् गुणाभावः लुङंतकरोतेरनुप्रयोगः मंत्रे घसेति लेर्लुक् मोंतः अकरिति प्रागुक्ते तु तिपि सार्वधातुकगुणो हल्ङ्यादिलोप इति विशेषः
गुपेः आयप्रत्ययाभावस्थलं एवेदं सूत्रे केवलस्योच्चारणात् अगोप्तमिति ऊदि त्वादिडभावे वदव्रजेति वृद्धिः झलोझलीति सिचो लोपः इड्पक्षे तु अ
गोपिषं आयप्रत्ययपक्षेः गोपायिष्टं इत्थं चत्वारि छंदसि भाषायां तु चङंतं वर्जयित्वा त्रीण्येवेति विवेकः त्वायतं त्वामिच्छतः जरितुः स्तोतुर्मम कामा
मभिलाषं मा ऊनयीः ऊनं मा कार्षीरित्यर्थः माऊननदिति भाषायां ऊनपरिहाणौ चुरादावदंतः ध्वन शब्दे चुरादिरदंतः घयदिर्णितश्च भाषायां तु अदध्वनत् घयदेर्वृद्धिध्व
नत् इत्यत्र तु वृद्धिः ऐलयीत् भाषायां तु ऐलिलत् अर्द गतौ याचने च अर्द हिंसायां हेतुमण्णिच् आर्दयीत् भाषायां त्वार्दिदत् यत्तु प्राचा नेष्यतीति
सूत्रे लौकिकेपि संचारयत्वात् अयमपि लोक इत्युक्तं तन्न छंदसीत्यस्यानुवृत्तेः काशिकादिमहाग्रंथसम्मतत्वात् वैयास्यात्तदननुवृत्तौ तु चङो दुर्लभत्वात्
यत्तु विभाषा धेट्श्व्योरिति विभाषाग्रहणमिहानुवर्त्ततेन्तु छंदसीति तदाशयवर्णनं तदपि न सूत्रेन ञोवैयर्थ्यापत्तेरित्याह तावत् अमरदिति व्यत्यये
तु अकार्षीत् अमत्त अदारीत् अहृषत छंदमिनिष्ठ कापिप्राप्त इति अ... पधा ... नि सूत्रे णीति भावः व्रह्मणि वदेरिति न च यत्सेव दीर्घो निपात्यतामि
तिवाच्यं यतो नावद्यस्याद्युदात्तापत्तेरिति भावः अत्र श्लोकवार्त्तिकं निष्टर्क्य ... स्थ... ... निसः षत्वं निपातनात् ण्यदायादेशइत्येतौ उपचाय्ये निपा
तितौ एयदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः एयदेकस्माद्यशब्द स्वहौ क्यपौ राय द्विधिश्चतुः प्रत्ययमिति आद्यंतविपर्यासमित्यर्थः चतुर्भ्य इ
ति देवहूयादिषु चतुर्षु चतुर्भ्यो धातुभ्यः क्यप् उपसर्गभेदान्न यतेर्भेदः द्वौ क्यपाविति द्वाभ्यां धातुभ्यां द्वाविति भावः चतुरिति सुजंतं चतुरो वारान्।

उ
स॰वै॰ णपद्धिधीयतेऽइत्यर्थः छंदसिवनषणासंभक्तौइतिभ्वादिगणेसहनिर्दिष्टोगृह्यतेतेनतुवनुयाचनेषणुदानेइतितानादिकौ सानुबंधकत्वात्सहपठितयोरे
१०७ वग्रहणास्यन्याय्यत्वाच्चव्रह्मवनिमिति व्रह्मवनति स्तोत्रंवनतिगांसनतीतिविग्रहः सुषामादित्वात्सत्वंहव्येन हव्यशब्देउपपदेवहेर्ण्युट्स्यात्स्या
दांतेजनसनजनजननेजनीप्रादुर्भावेद्वयोरपिग्रहणं षणुदानेषणसंभक्तौद्वयोरपिग्रहणमित्याहुः अत्रचव्याख्यानंशरणं मंत्रेश्वेत श्वेतादिपूर्वे।
भ्योवहादिभ्योणिवन्स्यात् अलाक्षणिकःकार्यार्थेनिपातनंश्वेतशब्देकर्तृवाचिनिउपपदेवहेःकर्मणिप्रत्ययः उक्थकर्मणिकरणेवाउपपदेशंसतेः।
प्रत्ययःनलोपश्चपुरोदाश्पुरोदाने अस्यपुरस् पूर्वस्यादेर्डत्वंकर्मणिचप्रत्ययः अवयाःश्वेचकारादुक्थशाःएतच्चपाक्षिकं यथाचकैयटादयःउक्थशाइ
त्यपिसंबुद्ध्यर्थेनिपातनं कर्तव्यंयदिमंत्रेदर्शनमस्तीति अररिवानिति राऽदाने लिटःक्वसुःवस्वेकाजाद्घसामितीट्आदंतत्वात् नन्वत्रसुरुषेऽव्ययपू
र्वपदप्रकृतिस्वरःदीर्घादटिसमानपदेइतिनकारस्यरुत्वं आतोटिनित्यमितिणेःपूर्वस्यांतोनित्यमनुनासिकः भविषयेतुवसोःसंप्रसारणे कृतेवलादित्वाभावादि
डभावः एतेनमानःशंसोअररुषः इत्यादिव्याख्यातं प्रसंगादयायुशब्दंसाधयितुमाह छंदसीति आत्मनःइतिविशेषणादप्राप्तिःअघायुरिति अ
घ्वाघस्यादितिवक्ष्यमाणेनाकारादेशःजवसवाविति ऋदोरपोपवादोऽचूस्वणार्थेविधीयते लेटोडाटौ आगमौस्तइति नौचपर्यायेणानुयोगपद्येन
अडिधिसामर्थ्यात् अन्यथासवर्णेदीर्घेकृतेविशेषाभावात् आडुत्तमस्यपिच्चेतिसूत्रान्मंडूकप्लुत्यापिच्चेत्यनुवर्ततइत्याशयेनाह नौचपिनाविति नत्क।
लंतुयत्वोग्यात्अश्नवैथेविकंदसीउर्वरासुत्रवैतेइत्यादोगुणः वृत्तौतुपिद्ग्रहणंनानुवर्तितं तत्रछंदस्युभयथेतिसार्वधातुकत्वाद्धिकरणः आर्द्धधातुक।
त्वान्डित्वाभावाद्विकरणस्यगुणः अतएवक्वचिन्न तन्रुचातरुषियत्कृण्वेते तारिषदिति तिपइकारलोपः सिपइट् जोषिषदिति जुषीप्रीतिसेव
नयोः अनुदात्तेत व्यत्ययेनपरस्मैपदं करवावेति कृत्रोलेटोवस् उःगुणेरपरः आट्अडिःत्वाद्विकरणस्यगुणः करोतेर्ह्रस्वाभावश्चमादयैतेइतिमदीह ए॰म॰
र्षेणिजंतालेट् आकारस्येतिप्रथमस्येत्यर्थः द्वितीयस्यतुटितआत्मनेपदानामित्येत्वमेवनित्यत्वात् नचशब्दांतरप्राप्त्याअनित्यत्वं कृतान्कृतप्रसंगि १०७

त्वमात्रेणकश्चिन्निमित्ताश्रयणात् उत्तरसूत्रेऽन्यत्रेतिलिंगाच्च वैतो अन्यत्त्वंकिमपेक्ष्येत्याकांक्षायांपूर्वसूत्रविषयादितिलभ्यतेसन्निधानात्तदाह अ
नइत्यादि ईशै इति ईशएश्वर्येउत्तमैकवचनमिट् इतश्चलोपोनास्तिपरस्मैपदेष्विसुक्तेः टेरेत्वेतस्यऐ गृह्यांताइतिग्रहेःकर्मणिलेट् आट्यक् संप्रसार
णांश्चैतःपणावंधइति यदिमेभवानिदंकुर्यात्तर्हीदमहंदास्यामीतिसमयकरणंपणवंधः आशंकासंभावना अहमेवेति त्रिपुरविजयेदेवैःप्रार्थितस्यरुद्रस्य
इंवचने पशवःसंसारिणःनेदितिइच्छन्द आशंकांद्योतयति जिह्माचरणेननरकपातःसंभाव्यते समाभूदित्यर्थः द्वौविकरणाविति तत्रशपूल्याप्यः सिचु
वाहुलकात् एतेनसमर्यजिह्माजो अस्मान्प्रविष्टुसेमाममविष्ठिइत्यादिव्याख्यातं अवरस्पणोऽस्मात्त्रोटिवाहुलकात्सिपःमष्टत्ते तरुषेमेति उप्रत्ययांत
स्यसिपंप्रत्यंगत्वात्सार्वधातुकार्धधातुकयोरितिगुणःप्राप्तःसिवंतस्यशपिलघूपधगुणश्चप्राप्तोवाहुलकान्नभवति तक्षंतीतिप्राप्तेइति यत्तुसुपां
सुलुगितिसूत्रेहरदत्तेनोक्तं तक्षणुवंतीतिप्राप्तइतितुयुक्तःपाठइति तच्चिंत्यं श्नुप्रत्ययस्यवैकल्पिकतयेहशपःसौष्ठवेनवहुवचनमात्रेव्यत्ययमभि
व्यक्तुं तक्षंतीतिभाष्यकौशिकारूढपाठस्यैवन्याय्यत्वात् कृत्तद्धीति तेनदीव्यतीत्यादौविधीयमानानांठगादीनांविदेवनादिकर्तृवाचकत्वादेर्मुक्तेन।
लिङ्कारकवाचित्वेप्यायहः कृत्तद्धितमात्रेतात्पर्यात् तथाचकिविहितोडतिर्यच्छब्दादपिभवति त्वंवेत्स्ययतितेजातवेदः विश्वेदेवासोमनुषोयतिष्ठ
न् आदृगमतावहौलिकेषुव्याख्यातमिदं विशेषाभिधित्सयास्मार्यते लिङ्वद्भावादिति असंयोगाल्लिट्किदितिकित्त्वंसिद्धमितिभावः ननुस्रंसिध्वंसिप्र
भृतिभ्यःकिकिनोःसंयोगात्परत्वेनकित्त्वंसार्थकमितिचेत् तादृशलक्ष्यस्याकरेऽनुदाहृतत्वात् यदितुतादृशलक्ष्यप्रमाणमस्तितर्हिकिंदसुभयथेः।
नि लिटःसार्वधातुकत्वस्यापिसत्त्वेनसार्वधातुकमपिदितिङित्त्वात्सिद्धमितिभावः ननुर्जिगुरीरिति द्विर्वचनेचीतिस्थानिवद्भावादादेशप्रतिषेधाद्वास्ट
प्दइत्यनयोर्हित्वं ततउत्तरदलेउत्वेपिअभ्यासे [illegible] निर्वाहः तुमर्थे पंचदशप्रत्ययाविधीयंते तत्रसेसेन् असेअसेन् अध्यैअध्यैन् कध्यैकध्यैन्
शध्यैशध्यैन् एषांदशानांद्वयोर्द्वयोःरूपाविशेषेपिस्वरे विशेषः इतरेषुपंचसुरूपविशेषः स्पष्टएव वक्षेइति वचःसेकृत्त्वं षत्वं एवेइतिइणोगुणः।

उ॰

ऋ॰ वै॰ नित्वादाद्युदात्तः प्रेषेति इणः क्ते कित्वान्न गुणः आद्गुणः श्रियसेइति इयङ् नित्वादाद्युदात्तः इह मंत्रे मध्योदात्तः पठ्यते तत्र बाहुलकात्प्रत्ययस्वरो बोध्यः।
१०८ मादयध्या इति संपतात्तशध्यै तस्य भाववाचिसार्वधातुकत्वा यकुप्रसंगे व्यत्ययेन शप् गुणायादेशौ प्रत्ययस्वरः पिवध्या इति यकु तस्य बहुलं छंदसी
ति लुगिति हरदत्तः पूर्ववद्व्यत्ययेन यकः प्रसंगे शवित्यपि सुवचं यत्तु प्राचोपि यंथ्याचख्यौ मादयध्या इत्यत्र यकं स्वीकृत्य व्यत्ययेन लुक्शब्दे ति स्वीकृतं तन्न
रवयस्तं यच्च काशिकायां शध्यै शध्यैन् क्षिपध्यै मादयध्यै इत्युदाहृतं अन्येष्वपि देवानुसृतं तद्युक्रमेण योजनीयं अन्यथा लक्ष्यविसंवादात् स्तुतव
इति ङित्वान्न गुणः दशमे मासि सूतवे इति मंत्रे सूतवे इति पदं आद्युदात्तं पठ्यते तत्र स्वरव्यत्ययः यद्वा तवेन्प्रत्यये नित्स्वरः गुणाभावस्तु बाहुलकात्
यद्वा छंदस्युभयथेति सार्वधातुकत्वे सार्वधातुकमपिदिति ङित्वं बोध्यं प्रयै प्रपूर्वो यातेः केप्रत्ययः रुहे रिष्यैन् नञ्पूर्वो व्यथेश्च दृशे विख्ये च योग।
विभागे फलं चिंत्यं केप्रत्ययः कित्वाद्दृशेर्न गुणः ख्यातेरातो लोपः विलिखइति कित्वान्न गुणः स्नातोसुन्कसुन इत्यव्ययत्वाद्विभक्तेर्लुक् न लुम
तिति निषेधादत्वसंतस्येति दीर्घो न कृत्यार्थे भावकर्मणोरित्यर्थः यद्यपि भव्यगेयादिषु कर्तृवद्बहुलं करणे स्नानीयं चूर्णमित्यादौ करणे दानीयो विप्र इत्यत्र
संप्रदाने च कृत्यानामर्थस्तथापि कृत्यत्वेन रूपेण न कर्त्रादिषु विधिरस्ति किंतु विशिष्यैव बाहुलकाद्वा कृत्यतया तु भावकर्मणोरेव तयोरेवेति सूत्रा
त् अतः प्रतिपदोक्तस्यैव कृत्यार्थस्येह ग्रहणं न्याय्यं नम्लेछितवै नम्लेछितव्यमित्यर्थः दिदृक्षेण्य इति दृशेः सन्नंतात् अतो लोपः कर्तव्यमिति कृ
त्यमित्यर्थः यत्तु कृञो विचि गुणो रपरत्वे तस्य भाव इति त्वप्रत्यय इति व्याचख्यौ तत्र रेफस्य विसर्गो दुर्वारः आद्युदात्तता च दुर्लभेति दिक् अवचक्षे।
च एश् प्रत्ययः शित्वात्सार्वधातुकत्वेन ख्याञादेशो न भावलक्षणे संस्थादीनामवधित्वेन लक्षणत्वं बोध्यं आसमाप्तेरिति संपूर्वो हि तिष्ठतिः
समाप्तेरुदः यर्हि पृच्छ्यः षडहः संतिष्ठते इत्यादौ दर्शनात् आतमितोरिति तमुन्लानौ सृपितृदोः सृप्लृगतौ उतृदिर् हिंसानादरयोः विसृप इ
ति गमनादित्यर्थः यत्तु व्याचख्युर्विसर्पितुं आतर्दितुमित्यर्थ इति तन्न सृपेरनिट्त्वात् भावलक्षण इत्यत्र नञ्चेश्च अत एव यत्रत्ते विदभिप्रिय षः

॥

अवेचित विनापिजन्तुभग्नावभ्यः आतृदः आतर्दनात् रुधिरनिःसरणात् पुराणपूर्वमेवसंधिंसंधातव्यं संधातासंयोजयिताविद्रुतं विच्छिन्नं पुनरिष्कर्त्तानि
ष्कर्त्तासंस्कर्त्तेति तस्माद्यथोक्तमेवमनोरमं॥ ॥इतितृतीयः॥ ॥डुप्रत्ययांतमिति तेनक्विवंतान्नङीषु स्वयंभू रित्वरइति अनुगाकारस्योदात्तत्व
मित्यर्थः यत्तुन्यासकृतोक्तंमुद्गलानीशब्देद्वितीयउदात्तइति तद्देवाहृस्वप्रयुक्तमेव लितीतिप्रत्ययात्पूर्वस्यविधीयमानंसन्निहितमानुकंविहाय
द्वितीयेप्रवर्त्ततइत्यत्रवीजाभावात् सकलवैदिकपाठविरोधाच्चेत्यास्तांतावत् अविष्ट्यइति आविर्भूतइत्यर्थः द्यचश्छंदमयड्वैतयोर्भाषायामिति सु
त्रेवेदेप्राप्तोविधीयः नोत्वत् द्यचइतिप्राप्तः प्रतिषिध्यते मौंजमिति औत्सर्गिकोण वर्ध्रचर्मेति वृधिवपिभ्यांरन्ढश्छंदसभाशब्दात्तस्म्यंतान्ढःस्यात्ता
च्छ्वर्थेपाथसीति पाथोंतरिक्षमितिवृत्तिकारः पातिभूतान्यवकाशदानेनेतिव्युत्पत्तेः यद्यपिपातेर्वलेजुड् उदकेथुड् अन्नेचेति अन्नोदकयोःपाथःशब्दो
व्युत्पादितस्तथापिबाहुलकादंतरिक्षेपीतिभावः वैशंतीभ्यइति वेशंतःपल्वलं विशेश्झच् अग्राद्यत् भवेछंदसीत्येवसिद्धेघत्रादिभिर्वाधामाभूदितिय
द्विधीयते अग्रियइतिघत्रघनोरुदाहरणं अंतोदात्तमाद्युदात्तंच रक्षोयातूनांषष्ठीबहुवचनांताभ्यांरक्षस्शब्दयातुशब्दाभ्यांहननकरणीभूत इत्यर्थे
यत्स्यात् रक्षस्येतिरक्षसांहननी एवंयातव्याहविष्यमिति हविषेहिताहविष्यातस्याःप्रशंसनमित्यर्थः यस्येतिलोपेकृतेहलोयमामितियलोपः मा
याणामस्य पूर्वस्त्रापवादः तद्वानासाम् मत्वंतप्रकृतिकात्प्रथमांताडुपधानकरणीभूतमंत्रार्थकात्इष्टकारूपेसंबंधिनियत्स्यात् मतोश्चलुक् वर्च
स्वानितिवर्चस्शब्दोस्त्यस्मिन्नसौवर्चस्वान्सचदेवस्तस्यामविनुरित्यादिकः उपधीयंतेनेनेत्युपधानः अथकथंसृष्टीरुपदधातिप्राणभृतउपदधातीति
सृष्ट्याःप्राणभृत्याइतिहिप्राप्नोति सत्यंसृष्ट्यादिशब्दानां तद्वन्मंत्रोपधेयास्विष्टकासुवाणत्प्रयोगः ननुतद्धितांतमेतदित्य वधेहि पूर्वोत्तरमीमांसयो
स्तुतद्धितपरतयाप्रतीयमानाप्रथाः भक्त्यागाल्व्येयः अश्विमानण् अश्विमच्छब्दात्केऽर्थेणस्यात्यतोपवादः मतोर्लुक् आश्विनीरिति अश्विनूशब्द
ब्दवान्मंत्रउपधानोयासांताइत्यर्थः मूर्द्धन्वतीरिति अनोनुडितिनुडागमः अग्रेदमवधेयम् सूत्रेवयस्यासिवत्यनुपपन्नं तद्वानासामितियत्प्रत्ययस्यछंद

स्येवविहितत्वात् एवंचछंदोवत्सूत्राणीति भाष्यकारेष्टेरिदमेवज्ञापकं अथवासामान्यापेक्षंज्ञापकंछांदसाअपिक्वचिद्भाषायां भवंतीति तेनानुपस्थि
तमरिपंथिभिः पार्थिवैरित्यादिसिद्धं यथासंख्यमिति वृत्तिकारस्तुपलव्वचेतिसूत्रेऽभजत् पूर्वैः कृतं मत्वर्थइतिनिष्टत्तं चात्वइति वृत्तिकाराः पलत्तुना
नुवर्त्तते एतदपि पूर्वत्रयोगविभागस्यफलमितितेषांमतं पलवावितिभाष्यपाठेतुपलव्व्यनुवर्त्ततां तथाचपूर्वैराणाइत्यपिरूपंबोध्यंपूर्व्याइत्याद्युदात्तत्वं
च सहस्रेणासमितइतिपाठांतरं मतौचैत् पः सहस्राभ्यांविनीनौइत्यस्यापवादः सोममर्हंतियः कथंतर्हिप्रीतास्मिनेसोम्येतिरघुः छंदोधिकारात् उच्या
ते सोमइवसोम्य। शाखादित्वाद्यः तत्रसाधुरितियद्वा सौम्येत्यादिवृद्धिपाठेतुस्वार्थेष्यत्र मयेच आगतविकारावयवप्रकृतामयडर्थाः यथायोगंपं
चमीषष्ठीप्रथमाःसमर्थविभक्तयः शिवशम् भाषायांतुशंतातिप्रभृतीनांप्रयोगश्चिंत्यइत्याहुः इतिचतुर्थः त्वावतइति त्वमिवत्वावान् यस्य प्रत्य
योत्तरपदयोश्चेतित्वादेशः आसर्वनाम्नइत्यात्वं एतेनमावतइतिव्याख्यातं सादन्यमिति अन्येषामपीति दीर्घः छंदसिघस् सकारः सितिचेति पद
त्वार्थः तेनभत्वाभावाद्गुणोन नचैवंपक्षेइकोसवर्णाइतिशाकलापत्तिः छंदसिदृष्टस्येवानुविधेयत्वात् वार्त्तिककृतासिन्नित्यसमासयोर्नेतिन
निषेधाच्च उपसर्गाइहधातुशब्देनधातुवाच्याक्रियालक्ष्यतेसाअर्थःप्रयोजनंयस्यसाधनस्यतस्मिन्नित्यर्थः तदाह धात्वर्थविशिष्टइति छंदसि
पपर्यवस्थातृशब्दात्स्वार्थेइनिप्रत्ययः अवस्थातृशब्दस्यपंथपरइत्यादेशोपिचनिपात्यते अष्ट्रावीति अशेष्ठन् अष्ट्रादंष्ट्राकरिष्ठइति तुरिष्ठेमेयः।
स्वितिलोपः इतिपंचमः स्पर्द्धेलिंडीति स्पर्द्धसंघर्षे द्विर्वचनं अकारलोपः रेफस्यसंप्रसारणंचनिपात्यते अस्पर्द्धेथामितिभाषायांप्रकृत्यांतः अयंपाठः
षाष्ठभाष्यानुगुणः शाकलसूत्रेह्रस्वश्चेतिच कारेणप्रकृत्येत्यनुकृष्यतइतिभाष्यदर्शनात् इकोगुणवृद्धीइतिसूत्रेतुनांतःपादमितिपाठःपुरस्कृतः अय
मपिषाष्ठभाष्येस्पष्टः अस्मिंश्चपक्षेएङःपदांतादतीतिपूर्वरूपंनिषिध्यते तस्मिंश्चनिषिद्धेएचोयवायावइत्यपिनभवति बाधकेनिषिद्धेबाध्यमपि।
कचिन्नेनितिस्वीकारात् पादश्चेहनश्लोकस्य वाछंदसीत्यतोमंडूकप्लुत्याछंदसीत्यस्यानुवृत्तेः तदाह अत्काद्येति एङः पदांतादतीतिसूत्रादेङइतिपंचम्यां

तमनुवृत्तंप्रथमयाविपरिणम्यतइत्याह एङ्प्रकृत्येति अंतःपादंकिमिति ऋचीत्येवकिंनोक्तमितिप्रश्नः एतेचैतीत्यत्रपूर्वपदस्यांतेएङ् अकारस्तुप
रपादस्यादौ अतोनिमित्तनिमित्तिनोःपादमध्यस्थत्वंनास्ति अव्यात् अवरस्परो आशीर्लिङ् अवथादितिपंचम्यंतं अवक्रमुरिति अवपूर्वस्यक्र
मेर्लिटिसिछंदसिचेतिद्वित्वाभावः क्वचित्तु अवचक्रमुरितिपठ्यते तदयुक्तंलक्ष्यविरोधात् अन्नतेति वृङ् वृञो मंत्रेघसेतिच्लेर्लुकिरूपस्य अदादेशेप
स अवस्यवइति अवेरसुन् ततःकयच् क्याच्छंदसीत्युःस्यश्छंदसि स्यदःप्रथमांतस्यानुकरणं ह्रस्वात् कथंतर्हि महिक्षेत्रंपुरुश्चंद्रंविविद्वान् पृथु
श्चंद्रमसेचर्षणिप्राः अधिश्चंद्रंबृहत्पृथुइति नह्यत्रोत्तरपदमस्तिउदात्तद्वयदर्शनात् पदकारैर्विभज्यैवपाठाच्च सत्यंबाहुलकात्समाधेयंप्रातिशाख्ये
तुविशिष्यविहितं पुरुश्चधिपूर्वेषुशकारउपजायते ह्रस्वेचपूर्वपद्यांतेचंद्रशब्देपरेन्नणइति अंतरेतिमध्येइत्यर्थः तथ्यचाभक्तः शकारइतिभा
क्पाणिनीयेतुटित्वात्त्रिंगादागमएव सचचंद्रशब्दस्यउभयनिर्देशेपंचमीनिर्देशोवलीयानितिसिद्धांतात् पितरापूर्वपदस्य अराङादेशोनिपा
त्यते उत्तरपदेतुसुपांसुलुगित्यादिनाविभक्तेराकारादेशः ऋतोङिसर्वनामस्थानयोरितिगुणः सध मासधस्यविभक्तिकोनिर्देशः सहमोघंतिर्देवाअ
स्मिन्नितिसधमादोयज्ञः मदोनुपसर्गइत्यपिप्राप्ते अजब्भ्यांस्त्रीखलनाइतितद्बाधकेलुटिहलश्चेतिघञ् सूत्रेमादेत्यकारउच्चारणार्थः तेनमादय
न्तः क्विवंतस्यमादितियद्रूपंतत्रापिभवति आत्वावृहंतोहरयोयुजानाअर्वागिंद्रसधमादोवहंतु साम्नोरतिनितृतीयमिति भूरिचक्रेतिमंत्रेहिसाल्हे
त्याद्युदात्तंपठ्यतेतद्बाध्येचशत्रूणामभिभवितेतिव्याख्यातं हविस्त्वंतोदात्तंस्यात् क्तप्रत्ययांतात्वापितुस्वरदोषोऽर्थासंगतिश्चस्यात् तस्मात्तृन्नंतत्वे
वयुक्तेतिभावः सूत्रेइतिशब्दःप्रकारार्थे तेननिष्ठायामपिनिपातनंबोध्यं अषाल्होअग्नेवृषभः अषाल्हमुग्रंसहमानं अषाल्हंयुत्सुपृतनासु अ
षाल्हायसहमानायेत्यादि यत्तुहरदत्तेनसूत्रेसाढेइत्यंतमेवेतिनिर्णीयदीर्घोनभ्यपिलक्ष्यंयद्यस्तितदाअन्यतरस्त्रेछित्वादृतरदितिशब्देनसंग्रा
ह्यमितिवर्णितंतत्रयदीतिसंदिग्धोक्तिरुक्तालक्ष्यानुरोधेनप्रयुक्ता यद्यपिवृत्तिकारास्थितरूपमित्युक्तंतत्स्वव्याख्यायाभिप्रायेणकथंचिन्नेयं प्रमादए

वेतितुहादन्तः उदात्तप्रयोगनिर्वाहार्थं वद्धचप्रातिशाख्यस्थं प्रमेयमाह अचोरिति अस्य आचार्यस्य ऊष्मणा संप्रयुक्तः स ल्हकारतामेतीत्यन्वयः स्थानि
वदादेशोपि सोष्मेति भावः ओषधेश्च न चकृदिकारादिति ङीषागतार्थता अतो दान्ततापत्तेः इष्यते त्वाद्युदात्तः लघावन्ते द्वयोश्चेति फिट्सूत्रात् कं चिद्
घइतिस्वरूपग्रहणं नन्तरस्तमपोः छंदसि घशब्दस्यैव दीर्घदर्शनात् उतवेति भार्यायाभ्रातास्यालः ततः पंचमी श्छन्देतेति तस्तनस्तनथनाश्चेति तवा
देशः पित्वान्न ङित्वं उरुष्याणइति उरुष्येति कंड्वादियगंतो रक्षणार्थकः सेर्हिः अतो हेरिति लुक् इकः सुनीति निपातस्य ग्रहणं तस्य च नकार इहैव वि
शेषणार्थः न च निपातस्य चेति सूत्रे णगतार्थता तत्रातङ्स्यनुवृत्तेरिति भावः वस्तुतस्तु मास्त्वनुवृत्तिः माचेदं सूत्रं न चातिप्रसंगः अतङ्स्यनुवृत्तावपि
अधते विष्वं अधत्तमिद् तमिन्वेव समताइत्यादावतिप्रसंगाद्बाहुलकेन समाधानस्य चेहापि सुलभत्वादिति दिक् चक्रेति मध्यमपुरुषबहुवचनं
शमिता इहमेत्रङ्स्यनुवर्त्ततइति काशिका अत एव शमपिते त्यर्थइति विवरणं संगच्छते जनिष्टाइति इह अडागमो न. माङ्योगेप्यडागममुल्लहरति।
मावइति वः पुष्माकं क्षात्रे भार्यायां परेषां वीयोणि उत्तानि माभूवन्नित्यर्थः वपेः कर्मणि लुङ् व्यत्ययेन परस्मैपदं एतच्च काशिकानुरोधेनोदाहृतं।
अध्ययनं तु वा पुरित्येव दृश्यते माङ्ग्युट् तु उदाहरणान्तरमन्वेषणीयं तनिपत्योः छंदसि किं वितेनिरे पेतिमघसि भसोः हलादावजादौ चक्कितिः।
अनयोरुपधालोपइष्टः अतः अचीत्याकृष्टं दृत्तिकारणस्त्रे चकारः प्रक्षिप्तो न त्वसावार्षः तथा च वार्तिकं हल्ग्रहणमनर्थकमन्यत्रापिदर्शनादि।
तिसग्धिरिति अदेः क्तिन् बहुलं छंदसीति घस्लादेशः उपधालोपे कृते झलोझलीति सलोपः धत्वं जश्त्वं समानस्य सभावः बब्धामिति भसेर्लोट् ताम्
श्लुः परं नित्यमप्युपधालोपं बाधित्वा बाहुलकात्प्रथमं द्वित्वं ततउपधालोपइत्यादि अजादौ अग्निर्वेनानिवप्सान्ति अभ्यासदीर्घश्चेति तुजादित्वादि।
तिभावः मशब्दस्येति तस्यासिद्धत्वाद्यस्येति लोपो न अकृत्सार्वेति दीर्घस्तु अंगवृत्तपरिभाषयानेति भावः पद्यामकारमात्रस्य लोपः ततोयस्येतिलोपेकृ
ते प्रत्ययाकारस्य श्रवणं॥ ॥इतिषष्ठः॥ ॥अदृश्रमिति बाहुलकादेव अदृशोङीति गुणो नेत्येके भाष्ये तु गुणं वारयितुं दृशेरग्वक्तव्यइत्युक्तं व्यत्ययेन

प्रथमपुरुष बहुवचनस्थाने उत्तमपुरुषैकवचनं बाहुलच्छे शाखांतरेतु अदब्धन्नित्येव पठ्यत इति माधवः त्कापिच्छं अपि शब्दाद्व्यवपि सच समासेयद्यपि
पूर्वैर्णीवसिद्धः तथाप्यसमासेऽनेनप्राप्यते एतदर्थमेवह्यपि शब्दः अन्यथावाछंदसीत्येवब्रूयात् तथाचछंदोनुविदधानाः कल्पसूत्रकाराः प्रयुंजते आ।
ज्येनाशिराणीअज्येति याज्ञवल्क्यश्चाह एवंविनायकंपूज्येतिसुपांसु पंथाइतिव्यत्ययोबहुलमित्येवसिद्धमिदम् उक्तंहिनत्रसुप्तिङुपग्रहेत्यादि तस्यैवत्वयं
प्रपंचः पूर्वसवर्णइति ईकारः प्रमाणात् आंतरतम्यात् ततः सवर्णदीर्घः अचोमसि वीरब्रह्मवाहोपादेवविश्वतात्वामहांतमितिवद्रूज्ञाः अत्रयानादिति
अम आत् नविभक्तौतुस्माः पुष्पास्वस्मभ्यमितिप्राप्तइति यत्तुकाशिकायामुक्तंयूयंवयमितिप्राप्तइति सोयंमहान्प्रमादः तथाहि नयुष्मेइतिअ[illegible]त्रेअ
स्याश्वमेधनाम्नोराज्ञोदानंस्तूयते सुरथाआतिथिग्वेस्वभोशूराःसे आश्वमेधेसुपेशसः इत्युपक्रमात् वाजमित्यन्ननाम अन्नदानेनयेसर्वेषांबंधवः तेषां
संबोधनंहेवाजबंधवः युष्मेयुष्मासु अधिइतिसप्तम्यर्थानुवादी विभक्त्यर्थेव्ययीभावस्तुयद्यपिनित्यसमासस्तथापिबाहुलकादिहन निनित्सुअननिं
दनेच्छाशीलोपिनिंदतेर्नलोपः सनइडभावश्चबाहुलकात् मर्त्यः अवद्यंनधारयतिभ वदनुसंधानमात्रेणैव निष्पापत्वादितिभावः निनित्सुर्यीत्सुत्वा
किमुतनिंदन्नितिगम्यते सहिपुण्यश्लोकानांनामग्रहणस्तुतरांशुद्धइतिभावः द्वितीयमंत्रेपिदेवताप्रार्थ्यते हेइंद्राबृहस्पती अस्मभ्यं रयिंधत्तमितिदधाति
दर्शनार्थः नचास्मिन्मंत्रद्वयेयूयंवयमित्यस्यकश्चिदुक्तिसंभवोस्ति किंचजसः शेइतिपक्षेयूयंवयोजसीतिकेनवारणीयं बाहुलकादितिचेत् सोयमस्था
नेसंरंभः एतेनकाशिकानुगामिनः प्राचोपिग्रंथः प्रत्युक्ताः ताअनुष्ठ्येति ताःवंक्रीः षड्विंशतिरस्यवंक्रयइतिहिमंत्रः [illegible]इदमस्थिगुप्तेपेपठितं नन्वनुपूर्वा
त्तिष्ठतेः आतश्चोपसर्गेइत्यङंबाधित्वाण्यागापपत्तौभावः इतिक्तिनाभाव्यमितिचेन् सत्यं पूर्वंपरेतिसूत्रेव्यवस्थायाममितिनिर्देशादङपिभविष्यतिसामा
न्यापेक्षज्ञापकाश्रयणात् तदेतद्ध्वनयति व्यवस्थावदिति बाहुनेतिप्राप्तेइति यत्तुकाशिकायांप्रबाहुनेतिप्राप्तइत्युक्तंप्राचाचानुसृतंतत्सर्वंसमासभ्रमाव
हत्वाद्धेयं प्रेतिहिनसमस्तंपृथक्स्वरदर्शनात् प[illegible]पलमानत्वाच्च अतएवाख्यातान्वयीतिध्येयं एतेनप्रबाहुशब्दात्ततीयेतिव्याचक्षाणाः।

न्यासकारः प्रत्युक्तः स्वप्नयेति अपाचोऽकारः सुपिंषितिदीर्घनिवृत्त्यर्थः मिबादेशास्येतिनतुद्वितीयैकवचनस्यछंदसिदृष्टानुविधानादितिभावः प्रामा
दिकीतिलस्यैवकारपाठस्यनिर्विवादत्वाद्वेदभाष्येपिप्रकृतसूत्रस्यमलोपमात्रपरतोक्तेश्चेतिभावः कृणुतादिति धिन्विकृण्व्योरचेति उप्रत्ययः सु
नोतनेति पित्त्वेसतिङित्वाभावाद्गुणः दधातनेति ङित्वाभावाच्छ्राभ्यस्तयोरातइत्यालोपोन जुषध्वमिति काशिकायांप्राचोग्रंथेचजुषतेतिप्रामादि
कमितिभावः आज्जसे जसेरितिपूर्वाचार्यानुरोधेननिर्देशः श्रीग्राम. श्रीणामिति वामीतिनदीत्वविकल्पाद्रूपद्वयंप्राप्तमितिप्राचः तच्चिंत्यंछंदसि
दृष्टस्यनुटः सिद्धेः अभावस्यचापादयितुमशक्यत्वात् तस्माद्व्यर्थमेवेतितत्त्वं सूताश्च ग्रामण्यश्चेतिइतरेतरयोगद्वंद्वः कीदृङिति क्विन्प्रत्ययस्य
कुरितिनकारस्यङकारः स्ववनिति अवतेरसुन् सुष्ठुवोयस्येतिविग्रहः तुधातुःसौत्रोवृद्ध्यर्थः ततोऽसुन् स्वंतवोवृद्धिर्यस्येतिविग्रहः तनुश्रीतितरतेः
क्विन् उत्वंतस्यद्विर्वचनेचीतिस्थानिवद्भावात् ह्वइत्यस्यद्वित्वं उरदत्वं हुह्वरेः आगंतुनाइकारेणगुणोनचनिर्देशइत्याहुः अतएवज्ञापकात्धातु
निर्देशोऽकिदिकारइत्यपिसुवचं सोमे इन्द्रुणाविति ह्रुइत्यादेशस्याभावोपिबोध्यः अष्टादशेति स्प्तमितेः पाठपक्षेत्वेकोनविंशतिः चत्तोइति चेत्तशेव्हा
द्धापिउत्रासहन्नाद्गुणः निपातेनसहएकीकृत्यच्छेदस्तुपदकाराणांसंप्रदायसिद्धः भूपामोइतिमंत्रेभूपामइतियथा अश्वस्याविशस्तेति अन्येषामपी
तिदीर्घः बभूथा ववर्थः क्रादिसूत्रेणेडभावेसिद्धेनिगमएवेतिनियमार्थंनिपातनं तदेतदाहभाषायांतुबवरिथेति सर्वमाइति अस्तेर्लुङ्तिप् ईडभावे
अपृक्तत्वाद्धल्ङ्यादिलोपः रुत्वविसर्गौसंहितायांतुभोभगोरितियत्वंलोपःशाकल्यस्येतियलोपः नछंदसिइहयदिआनंतर्योदीत्वमात्रंप्रतिषिध्येततत
र्हिअकृत्सार्वेतिदीर्घः स्यात् अपवादाभावेपुनरुत्सर्गस्थितेः अतआहईत्वदीर्घोनेति क्वचियदुक्तंतन्नेतिव्याख्यानादितिभावः अत्रचज्ञापकमनु
पदमेववक्ष्यति दुष्ठीयतीतिप्रकृतिमात्रेतात्पर्यं उप्रत्ययसमानार्थेनतृनादुष्ठीपितेत्सादिवाबोध्यं देवसुननुदेवांजिगातीतिप्रत्युदाहरणमंगद्वय।
विकलं यजुषिकाठकइत्यंशद्वयस्यापितत्राभावादित्याशंक्याह वह्वृचानामस्तीति तत्रेदंदृष्टमितिभावः काठकइतिकिंयजुर्वेदेपिशाखांतरमात्रे

माभूत् अत्र सुम्नयुरिदमस्तिकव्यध्व कविः अध्वर एतनाएषामंसस्य लोपः स्यात् क्वचिदिति छंदसि विषये मृगय्वादिगणेऽप्यध्वर्युशब्दः पठ्यते तद्वसुस्यंतरं वोध्यं
वसुधितिमिति वसूनां धातारं प्रदातारमित्यर्थ इति वेदभाष्यं समुषद्भिरिति वसंतीत्युषसः सहवासिनः तैः संभूयेत्यर्थः वेदभाष्ये तूषद्भिर्ज्वलद्भिः रश्मिभिः उ
षसहे लटः शत्रादेशे शपि प्राप्ते व्यत्ययेन श इत्युक्तं तदुपायांतरं वोध्यं नकवतेरिति अनुदात्तस्यार्थ उपन्यासः कृषेश्छंलोके तु चरीकृष्यते कृषीवलाः आघा
त्वयश्रति वृङः शपः श्लुः अभ्यासस्य दीर्घः परस्मैपदं च निपात्यते तस्यैव यङ्लुकि रुगभावमात्रमितिवा तच्चपक्षे माभूदित्येतदर्थं दर्दर्त्तीति रुक् निपातितः
दर्दर्षीत्यत्र तु यङ्लुक् अनेन किंचिन्निपात्यं किंतु श्लावेव धारयतेस्तु सिलुक् श्लुः आद्यभ्यासदीर्घः इतरत्र रुगागमश्च निपात्यते ॥इति सप्तमः॥ ॥प्रसमु
पोदः पादपूरणे किं प्रेदेवं देव्या धिया छंदसीरः कथं तर्हि कृणुतं नो अध्वरं श्रुष्टिमंतं यो अद्भिमां उदनिमां इयर्त्तीति छंदसि सर्वे विधयो विकल्प्यंते इत्यदोषः
असमंवत इति असिशब्दान्मतुप् छंदस्यपि दृश्यत इत्यनङ् नुट् असिद्धत्वात् रुत्वेन लोपः भूतपूर्वगत्या नुट् ननु तस्यैव वत्वप्रसंगः वत्वं प्रत्यसिद्धत्वात्
यदि तु पूर्वांतो नुट् क्रियेत णत्वं न स्यात् तस्मान्नुडेवोचितः नन्वेवमवग्रहे दोषः स्यात् अस्मान्निति णांतस्यावग्रहः [illegible] असेः सकारांतमवग्रहीतुमु
चितमिति चेत् सत्यं न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्तनीयं तस्माद्यथालक्षणं पदं कर्त्तव्यमिति महाभाष्ये स्थितं किंच
देवयंतः ईपिवांसमित्यादौ पदत्वं विनापि बहुलमवग्रहः क्रियते पूर्वेभिरग्निनेत्यादौ सत्यपि पदत्वेन क्रियत इति भागे [illegible] भूरिदावत्तर इति आतो मनि
न्निति वनिप् अत्रावग्रहः प्राग्वत् रथीतर इति रथशब्दान्मत्वर्थे इनिः तदंतात्तरप् नकारलोपे कृते ईकारः यदि तु नलोपापवादो नकारस्य स्थाने ई द्वि
धीयेत तदा तस्यासिद्धत्वात्सवर्णदीर्घो न लभ्येत एतेन नकारस्य ईकारादेशे सति सवर्णदीर्घत्वा [illegible] मिति इह तु पदकारा इ
त्यंतमवगृह्णंति अन्येषामपीति संहितायां दीर्घ इति तदाशयः उंदेर्नम्पूर्वस्येति यथापनुदविदं [illegible] छंदसि पाक्षिकमपि नत्वं
माभूदिति निपातनाश्रयणं सर्वविकल्पानां छंद [illegible] स्थिततया विपरीतापादनस्यासंभवात् अनुत्तमस्मै [illegible] यात विषीरि।

उ.
म. वै. त्यादिमंत्रेषुनत्वाभावस्यैवदृश्यमानत्वात् यदितुह्रस्वत्वमपिदृश्येततर्हितस्य[illegible]कादिनापिसमर्थनीयत्वात् तथापिभाजायामनुन्नमितिनत्व
११२ स्यनित्यत्वंनिपातनस्यफलमित्याहुः अनुत्तमितियत्तच्छंदस्येवेतिव्याख्यानादितिभावः स्वरानेरितिज्वरत्वरेत्यूठ् तुर्वीत्यस्येति राल्लोपः स्पृड्स्येति उ
त्वरपरत्वात्गुणापरइत्येवसिद्धं कार्यकालपक्षाश्रयणेनपरिभाषाणामसिद्धप्रकरणेपिप्रवृत्तेः उभयथेतिव्याचष्ट हर्वेति निसेरुत्वेप्राप्तेपक्षेरेफा।
देशमिदं अग्नः शब्दईषदर्थे अग्नरत्नमितः भुवश्च महाव्याहृतिग्रहणं[illegible]पदोक्तपरिभाषया अनित्यत्वज्ञापनार्थतेनकापयतीत्यादौयुक्
सिध्यति मतुवे अनुबंधपरित्यागेनसकारांतस्यवसुइत्यस्यमतुनासहद्वंद्वः अल्पाच्तरस्यापिसोत्रः परनिपातः मरुत्वइतिज्ञत्रइतिवत्वंतसोमत्वर्थइति
भत्वं हरिवेसिदिनमितिसंयोगांतलोपोरुत्वेसिद्धेवर्क्तव्य इतिवचनाद्दशिचेत्युत्वं प्रसंगादाहदाश्वानिति अनुबंधस्येति अतएववनोरचेतिसूत्रेपि।
सामान्यग्रहणमुक्तंइदंतुचिंत्यं उक्तरीत्याहश्चश्रीहिकालयोरितिसूत्रेसामान्यग्रहणस्यनिर्बाधत्वेजहातेःककारः सामान्यग्रहणनिर्वाहार्थइतिप्राचां
ग्रंथाः कथंसंगच्छंतइतिकिंच ककारस्यफलमपिचिंत्यं यद्यपिपङ्लुकिदीर्घोकितइतिदीर्घस्याप्रवृत्तिः कित्वसामर्थ्यादित्युक्तेसासंभवतितथा।
पिप्राचीनग्रंथैः सहस्वस्येविसंवादोदुर्वारइतिदिक् देवाश्छेति अनुपदंवक्ष्यमाणेनानोटीतिसूत्रेणानुनासिकः तत्सत्वाख्यानपक्षेतुअत्रानुनासिकइ
तिसूत्रेणेतिविवेकः नेहेति एतेनमहान्हिसइतिवद्धानांपाठोव्याख्यातः आकरेतुमहांहीत्युदाहृतं तच्चाख्यांतरेअन्वेषणीयं एवंचेति विकल्पस्यैव
व्यवस्थिततयाप्रकृतसूत्रत्यागेनमहत्त्राघवं सूत्रारंभेतुव्यत्ययोपिशरणीकरणीयइतिमहान्क्लेशइतिभावः छंद विकल्पव्यवस्थयैवसिद्धेऽप्रेत्या।
दिकंस्पष्टार्थमितितत्वं एवमुत्तरसूत्राण्यपि दिवस्पृथिव्याइति अत्रपरिःसर्वतोभावे सहेः चकारेणोक्तसमुच्चयार्थइत्याशयेनाहचादिति ऋतीषा
हमिति ऋति शब्दस्यान्येषामपीतिदीर्घः इत्यष्टमः साधारणप्रकृतिप्रत्ययसमासतिङंतविषयकतयापंचभिः प्रकरणैरुदात्तादिस्वराण्युत्पिपाद राम.
यिषुः साधारणस्वरांस्तावदाह अनुदात्तमिति एकवर्जमिति द्वितीयायांचेतिणमुल् ननुतत्रपरीप्सायामित्यनुवर्ततइतिचेत्सत्यं इहाप्यस्तिपरीप्सा ११२

थाहि यत्रोदात्तादिर्विधीयते तत्र तत्समकालमेव शिष्टमनुदात्तं कर्त्तव्यं न विलंबितव्यमिति एतच्च द्वितीयायां चेति सूत्रे हरदत्तादिभिरुक्तं यद्वा परीप्सायामि।
ति प्रासंगिकं एतच्चात्रैव सूत्रे हरदत्तादिग्रंथे स्पष्टं परिभाषेयमिति अधिकारत्वेनु यद्यपि षाष्ठस्वरेन कश्चिद्दोषस्तथापि स्थलांतरवर्त्तिषु दोष एव आद्युदात्त
श्चेत्येवमादिषु हि अस्यानुपस्थाना च्छेषनिघातो न लभ्येत किंच एकवर्जमिति व्यर्थं स्यात् तत्तत्सूत्रविधेयानां वचनसामर्थ्यादेव निघाताप्रवृत्तेरिति
भावः परिभाषाया लिंगापेक्षायामाह स्वरविधीति एकवर्जमित्यनेन हि अनुदात्तस्य वर्जनं व्यर्थं अतः परिशेषादुदात्तस्वरितावेव वर्ज्येते इति तद्विधावे
वास्योपस्थानमिति भावः तमेकमचमिति एकग्रहणं तत्र विधीयमानस्योपलक्षणं तेन तवैचां तश्च युगपदित्यादौ द्वयोर्वर्जनं इंद्राबृहस्पती इत्यत्र देव
ताद्वंद्वे चेति सूत्रेण पदद्वयस्यापि प्रकृतिस्वरे विधेये त्रयाणां वर्जनं बृहसति शब्दो हि वानस्पत्यादित्वात् द्व्युदात्त इति बोध्यं गोपायतमिति गुपू इत्यस्य
धातोरित्यंतोदात्तः ततआयप्रत्ययः प्रत्ययस्वरेणाद्युदात्तः ततो धातुत्वे पकाराकार उदात्तः स च प्रागुक्तयोरुदात्तयोः सतोः पश्चात्प्रवृत्तत्वात्सतिशि
ष्टः अतो बलवान् तस्य शब्वकारेण पित्वादनुदात्तेन सह एकादेश उदात्तेनोदात्तः थस्तस्य तु सार्वधातुकस्वरेणानुदात्तः तस्य उदात्तादनुदात्तस्येति स्वरि
तः स्यादेतत् तमिति स्वरितमाश्रित्य शेषनिघातोस्तु न च सन्निपातपरिभाषया निर्वाहः तस्या अनित्यत्वेन स्वरविधावप्रवृत्तेः अन्यथांतोदात्तादुत्तरप
दादन्यतरस्यां ह्रस्वनुड्भ्यां मतुविंत्यादिभिरपि स्वरे कृते शेषनिघातो न प्रवर्त्तेतेति बहुव्याकुलीस्यात् किंच अग्ने [illegible] सीत्यादौ स्य प्रत्ययादीनां निघा
तः केन वार्यते न हि तत्र सन्निपातपरिभाषाया उक्तिसंभवोस्ति अपि च सर्वे वा एव वश्यतीत्यत्र एकादेश उदात्तेनोदात्तः इति कृते हकाराकारो निहन्येत ।
एवमुदात्तस्वरितयोर्य [illegible] इति स्वरिते [illegible] जातवेदस मित्यत्राग्निशब्दस्यैकारो निहन्येतेति चेत् अत्रोच्यते यथोद्देशपक्षाश्रयणेनेयं परिभाषा त्रिपाद्यां
न प्रवर्त्तते न्यत्तत्तित्स्वं [illegible] इति सूत्रे हज्ज्ञापकं परिभाषांतराणि तु कार्यकालपक्षाश्रयात्प्रवर्त्तंत एव अतो न कश्चिदस्ति दोषः सतिशिष्टेति एतच्च
न्यायसिद्धं तथाहि यथोद्देशपक्षे [illegible] या अप्यस्या उदात्तस्वरितविधिभिः सहवाक्यैकवाक्यतास्त्येव ततश्च [illegible] सर्वीयस्येव ।

उ·

म·वै· यत्र चरमप्राप्तिस्तदेकवाक्यतान्नर्थानियालक्षस्यमवस्थाप्यते अतएवौपगवत्वस्यप्रत्ययेत्वमस्येचुत्रा कुर्याधुदान्तत्वंतप्रवर्तमानस्वरस्यैवप्र

११३ थमप्रवृत्तिबाधेनद्वितीयप्रवृत्त्यालस्यपरिनिष्ठापयतीतिदिक् अन्यत्रेति अत्रचज्ञापकंतासेःपरस्यलसार्वधातुकस्यनिघातविधानं अन्यथाल

कारमात्रापेक्षत्वादंतरंगत्वेनचतिवादिषुकृतेषुक्रियमाणस्यतासेःस्वरस्यसतिशिष्टत्वात्केपिनिघातेनैवसिद्धेरनर्थकंतत्स्यात् गणीतइति अतोदा

त्तंपदं अत्रलसार्वधातुकनिघातोनास्ति अदुपदेशेतितपरकरणात् आप्रत्ययस्यादंतत्वाभावात् तिङः तिङ इतिनिघातस्तुनभवतियद्वृत्तान्नित्यमि

तिनिषेधात् सह्रिव्यवहितेपिप्रवर्ततइतिवक्ष्यतेइहचसहोतार्यस्यरोदसीइतिपूर्वचरणेयद्वृत्तमस्तीतिदिक् देवीमिति पचादिषुदेवडितिटित्करणा

द्विड्डेतिङीपु चौउदात्तनिवृत्तीति कृदुत्तरपदप्रकृतिस्वरेणउदात्तस्यचसकारस्याचइतिलोपेसति अनुदात्तस्यचेतिसूत्रेणोदात्तःप्राप्तःतस्यायम

पवादइत्यर्थः इमम्मइतिमेशब्दास्यत्वमाश्रित्यगंगेप्रभृतीनांत्रयाणामनुदात्तःसचपदपाठेस्पष्टएवसंहितायांतुस्वरितात्संहितायामितिवक्ष्यमा

णाप्रचयापरनामधेयाएकश्रुतिःप्रवर्त्तते नामंत्रितेसामान्यवचनपदंव्याचष्टे विशेष्यमिति विशेष्यसमर्पकमित्यर्थः अग्नेत्रातरिति अग्निरिहवि

शेष्यःत्राणकर्त्रीतितुविशेषणं अग्नेभ्रातःसहस्कृतेतिमंत्रेतुप्युविश्वेतिविशेष्यत्वेनविवक्षितं अतोऽग्नेइत्यस्य अविद्यमानवद्भावाभावात् भ्रात

रित्यस्यानिघातः एवंतनउत्तरेषामितिबोध्यं देवीःषडिति अत्रदेवीरित्यामंत्रितंनाविद्यमानवत् तेनषडित्यस्यनिघातःअव्ययीभावस्यत्विति एत

च्चाव्ययीभावश्चेतिसंज्ञासूत्रेभाष्येस्पष्टं अभ्यभीतिउपसर्गाश्चाभिवर्जमित्युक्तेरभिशब्दोऽतउदात्तः तस्यनित्यवीप्सयोरितिद्वित्वं अनुदात्तंचेतिप

रस्यानुदात्तत्वं यणिकृतेउदात्तयणःपरत्वात्स्वरितः खलपूशब्दःकृदुत्तरपदप्रकृतिस्वरेणांतोदात्तः ततःसप्तम्येकवचनस्यउदात्तयणोहलपूर्वादि

तिप्राप्तस्योदात्तस्यनोङ्धात्वोरितिनिषेधः ततोनेनस्वरितः तस्ययणिततःपरस्य आशाशब्दाकारस्यानेनैवस्वरितः आशाशब्दोद्यंतोदात्तःआशा राम·

या अदिगाख्याचेदितिफिट्सूत्रात् असेति आशाशब्दप्रथमाकारस्यानिकस्येत्यर्थः शेषेति शाशब्दस्यनिघातोनेत्यर्थःस्यादेतत् यणादेशंप्रति ११२

स्वरितस्यासिद्धत्वात्स्यानिन्येव यण्प्रवृत्तः यथा ओजिढदिस्य [illegible] हित्वं प्रवर्त्तते न तु ढशब्देन च स्वरितयणः परस्येत्याश्रयणात्सिद्धत्वशंक्य अ
तिप्रसंगात् उदात्तादनुदात्तस्य स्वरित इत्यनेन यत्र क्रियते तत्रापि असिद्धत्वं न स्यात् न चेष्टापत्तिः लक्ष्यविरोधात् प्रत्यग्निरुषसामग्रमख्यत् इत्यादौ
स्वरितादर्शनात् न च नोदात्तस्वरितोदयमिति निषेधः शंक्यः अनंतरस्येति न्यायेनोदात्तादनुदात्तस्येति यत्र प्राप्तिः तन्मात्रस्य निषेधात् अन्यथा ख
लप्याशा न्य१ अग्निपाह्य १ स्मान् इत्यादावपि निषेधापत्तेः तस्मादिह समाधानांतरमेव वाच्यमिति चेत् अत्राहुर्भाष्यकाराः योगविभागः कर्त्तव्यः उ
दात्तयणः परस्यानुदात्तस्य स्वरितः स्यात् ततः स्वरितयणः इह पूर्वमनुवर्त्तते उदात्तयण इत्येवं योभिनिर्दिष्टः स्वरितस्तद्यणः परस्येत्यर्थः एवं चास्यैवाश्र
यात्सिद्धत्वं नान्यस्य यद्वा स्वरितग्रहणं न करिष्यते खलप्याशेत्यादावपि उदात्तयणः परत्वादेव सिद्धत्वात् न च स्वरितयणा व्यवधानं शंक्यं स्वरविधौ
व्यंजनस्याविद्यमानवद्भावादिति यत्तु काशिकायामुक्तं व्यंजनस्य ह्यविद्यमानवद्भावो न लक्ष्यः इह तु स्थानिवद्भावाद् जेवनं च स्वरविधौ तन्निषेधः स्वरदी
र्घयलोपेषु लोपाजादेश एवेति सिद्धांतात् तस्मात्स्वरितग्रहणं न करिष्यत इत्यसंगतं योगविभागपक्षः परमवशिष्यते सोपि न उदात्तादनुदात्तस्येति यः स्वरितः तत्स्था
निको यणः परस्यापि स्वरितत्वदर्शनात् पश्यंतहितेवितीये यास्तेविश्वाः समिधः संत्यग्ने इति तस्माद्भाष्यस्थं पक्षद्वयमपि वैमंगच्छत इति सोयं वृत्तिकृतो महा
न्व्यामोहः भाष्योक्तपक्षद्वयस्यापि सदोषत्वात् तथाहि योगविभागपक्षे संत्यग्ने इत्यत्र नानुपपत्तिः सकारएकारमाश्रित्य उदात्तादनुदात्तस्येत्येवाग्निशब्दा
कारस्य स्वरितसिद्धेः न च स्थानिवद्भावाद्व्यवधानं पूर्वस्माद्विधाविति पंचमीसमासस्य प्रत्याख्यानात् ईकारेपि वानिष्ठायां सेटीति ज्ञापकेनानित्यत्वात् सा
र्वत्रिकत्वाभ्युपगमेपि पूर्वत्रासिद्धीयेतदभावात् अत एव प्रत्यग्निरित्यादौ स्वरितत्वं न प्रवर्त्तते नोदात्तस्वरितेत्यादिना निषेधात् यदि हि संत्यग्न इत्यत्र प्रकृ
तसूत्रं प्रवर्त्तेत तर्हि निरवकाशत्वात् [illegible] प्रत्यग्निरित्यत्रापि तस्य प्रवृत्तिं को वारयेत् एवं स्वरितग्रहणप्रत्याख्यानपक्षेपि [illegible] पूर्वत्रासि
द्धीयेन स्थानिवदित्यस्य [illegible] निरवकाशत्वादिति मा [illegible] मुक्ता [illegible] [illegible] स्वरित।

उ·

म·वै· पणाः स्वरितत्वे उदाहरणद्वयं वदन्नयथाश्रुतं स्त्रित्रिभिर्मर्यमात्रेडयन् स्वरमंजरीकारः प्रत्युक्तः लोपाजादेश एव न स्यान्नित्वादिति नियमो हि स्वरविधौ नेति प्रतिपदो

११४ क्तस्यैव निषेधस्य न तु पूर्वत्रासिद्धीयत्वप्रयुक्तस्यापि एकादेश उदात्तेनोदात्तः उदात्तयोरेव स्थानित्वे आंतरतम्यादेव सिद्धं अन्यतरस्यानुदात्तत्वे स्वरितत्वे

वा सिद्धं तु असंपातर्यादिति न्यायेन आंतरतम्यात्स्वरिते प्राप्ते विधिरयमिति ध्वनयन्नुदाहरणद्वयं वोश्वा इत्यादि अत्र वइस्य नुदात्तं बहुवचनस्य वसू न

सावित्यत्रानुदात्तं सर्वमपादादावित्यधिकारात् अश्वशब्द आद्युदात्तः अशेः क्वनिप्युस्यादित्वात् हेति किमोत् नित्स्वरितं अवरशब्दः स्वांगशिटामि

त्याद्युदात्तः स्यादेतत् कावरमित्युदाहरणमयुक्तं एकादेश उदात्तेनोदात्त इति सूत्रे पूर्वसूत्रादनुदात्तस्य स्यानुवृत्तेः काशिकायामुक्तत्वात् तस्यादित इति सू

त्रे स्वरितोदात्तार्थश्चेति वार्त्तिकस्य तत्रस्थभाष्यकैयटादीनां च तथैव स्वरसादिति चेत् सत्यं इह सर्वप्राचां ग्रंथा अभ्युच्चयमात्रपरतया कथंचिन्नेयाः वस्तुत

स्तु अनुदात्तग्रहणं नानुवर्त्तत एव निष्फलत्वात् लक्ष्यविरोधाच्च कावरमित्यादौ बह्वृचानामुदात्तपाठस्य निर्विवादत्वात् तैत्तिरीयाणामपि याज्यैवेनमेतया

प्याययती सत्राङ् प्रश्लेषेढितीयास्वरस्योदात्तत्वात् अतएव बह्वृचप्रातिशाख्ये उदात्तवत्येकीभाव उदात्तं संध्यमक्षरं अनुदात्तोदये पुनः स्वरितं स्वरितोप

धे इति श्लोके पूर्वार्द्धे अनुदात्तग्रहणं न कृतं किंतूत्तरत्रैव तस्य पूर्वान्वयभ्रमं वारयितुं पुनः शब्दः प्रयुक्तः शौनकीये स्वराष्टकेपि एकादिष्टमुदात्तेन तत्तमेव नये

त्स्वरमित्युक्तमिति दिक् इकारयोरिति ह्रस्वयोरेवेत्यर्थः अस्य श्लोक इस्यत्र तु ईयत इति दीर्घस्य प्रवेशान्न स्वरितः इयं च बह्वृचानां व्यवस्थोक्ता अन्येषामपि त

दीयप्रातिशाख्यानुसारेण बोध्या नोदात्तउदय शब्दः परशब्देन समानार्थः प्रातिशाख्येषु प्रसिद्धः लाघवार्थं परशब्दे प्रयोक्तव्ये मंगलार्थमुदयशब्दः प्र

युक्तः तथा च भाष्यं मंगलादीनि मंगलमध्यानि मंगलांतानि च शास्त्राणि प्रथंत इत्यादि एवं च वृद्धिरित्यादौ शिवशमिति मध्ये स्वरितोदयमिति चांते या

णिनीये मंगलं कृतं यद्यपि न त्रृद्वयं त्वत्का गार्ग्यादीनामेवेति नियमः स्वाख्यातुं शक्यते तथापि गार्ग्यादीनामुदात्तपरमेवेति विपरीतनियमशंकां वारयि राम·

तुं नत्रृद्वयं तन्त्रभावः आगच्छ भो इति अत्र माणवकशब्दस्य टेः प्लुतो वैकल्पिकत्वान्न कृतः पक्षे सोपि बोध्यः स चोदात्तः प्लुत उदात्त इत्यधिकारात् एकश्रुति ११४

ताभ्यामवयवभेदेनवाक्येसमुच्चिताभ्यांदूरात्संबोधनेयो [illegible] विभाषा अत्रतंत्रेणाद्दसावाअच्छंदसीतिनञ्प्रश्लिष्यभाषायामपिऐच्छिकोविकल्पो
बोध्यः तथाचदांडिनायनादिसूत्रेभाष्यंएकश्रुतिर्हिस्वरसर्वनाम्नेत्यादि अत [illegible] याभियुक्तानांविरुद्धस्वरकतत्पुरुषबहुव्रीह्याश्रयणेनश्लिष्टकाव्यादि
निर्माणंसंगच्छते पस्पशांतेश्वेतोधावति अलंबुसानांयातेति [illegible] वाक्यमितिभाष्यंच तथाचकाव्यप्रकाशेवेदइवलोकेस्वरेणविशेषाध्यवसायहे
तुरित्युक्तं एकश्रुत्साव्यवहारादितितस्याशयः किमर्थंतर्हिहृस्वसुप्तोत्तममितिप्रक्रम्यविभाषाभाषायामितिसूत्रितमितिचेत् त्रैस्वर्येणप्रक्रमेप्राप्तिः।
कानुदात्तलाभायेतिगृहाणवेतिप्रकृतेविभाषाग्रहणंकुर्वन्सूत्रकारोपितंत्रादिकमभिप्रैति एतेनभाषायांस्वरानुरोधोनास्त्येवेतिभ्राम्यंतःपरास्ताः स्व
रविधिषुछंदोधिकाराभावात् पृष्ठस्यच वाभाषायामितिफिट्सूत्रस्यहृस्वसुप्तोत्तमं विभाषाभाषायामितिषाष्ठस्य एवंविधानामन्येषामपिनिर्विषय
त्वापत्तेश्च किमर्थंतर्हिवैदिकप्रक्रियायांस्वरव्युत्पादनंप्रक्रांतमितिचेत् वेदेतस्यावश्यकत्वात् नतुलोकेसर्वथानुपयोगादितिगृहाणइमंमेइतिनतु
मइतिस्वरितस्यविधायकंत्रिपादीस्थत्वादसिद्धंस्यात् नचस्वरितादित्याश्रयात्सिद्धत्वं कुवःसुम्नेत्यादौचरितार्थत्वादितिचेन्नतस्यादितइत्यारभ्यनवहू
त्याःस्वस्थानादुत्कृष्यशास्त्रांतेभाष्यवार्त्तिकयोर्निवेशितत्वात् नसुब्रह्मण्यायामितिसूत्रेस्वरितस्यत [illegible] तिवदत्ताएतत्कांडोत्कर्षस्यज्ञापितत्वाच्च
नचसुब्रह्मण्यायामितिसिद्धःस्वरितोस्तीतिवाच्यंतत्रएकादेशउदात्तेनेतिसूत्रप्रवृत्तेर [illegible] कत्वात् तत्र [illegible] नुदात्तग्रहणंनानुवर्त्ततइत्यवोचाम प्राचांरी
त्यातुदेवब्रह्मणोरनुदात्तइतिसूत्रंज्ञापकमितिदिक् सन्नतरइति सन्नोनुदात्तःतदाह अनु [illegible] त्यादिति इतिसाधारणस्वरप्रकरणंप्रथमम् प्रकृ
तिर्द्विधाधातुःप्रातिपदिकंच तत्रधातुस्वरमाह धातोरिति अदाद्यंतर्गणइति आगणां [illegible] निभान [illegible] नामादि [illegible] आदिरित्यनुवर्त्तमानेपुनः।
रादिग्रहणंनित्यार्थं अचीतिकिमद्यात् अनिटिकिंजस्थिथ अनुदात्तेच वहुव्रीहिरयंतेनमाहिस्म [illegible] इत्यादौलोपएणादेशयोःकृत
योरपिआद्युदात्तःसिध्यतीत्याशयेना [illegible] मत्रीति भीह्री प्रत्ययेइत्येववक्तव्येपूर्वग्रहणंज्ञापयतिमोवर्ये [illegible] ज्ञापकेचमत

द्रूपं सामान्यापेक्षं विशेषापेक्षं चेति आद्ये ञ्नित्यादिर्नित्यमित्यादावपि तदंतसप्तम्येव । द्वितीये तु यत्र तदंतग्रहणमस्ति तत्रोभाभ्यां फलभेदः तत्रैव तदंतसप्तमीभी
द्धीसत्र हि पूर्वग्रहणाभावे तदंतस्य कार्यित्वे प्रत्ययांतानां भ्यादीनामलोंत्यस्य भवन्ननुदात्तः प्रत्ययांतस्य स्यात् सप्तम्यर्थपुरस्कारे तु पितमपहाय भ्यादीना
मेवोदात्तः स्यादिति स्पष्टः फलभेदः उपोत्तममिति चान्यतरस्यामित्यत्राप्येवमेव ञ्नित्यादिर्नित्यं पथिमथोः सर्वनामस्थाने इत्यादौ तु नास्ति फलभेदः तदंत
ग्रहणे सत्यसति च प्रकृतेरादेरेवोदात्तत्वात् अतस्तत्र परसप्तम्येवेति दिक् लोलूयं लोलूयमिति लोः इयुदात्तः लूइति स्वरितः ततश्चत्वारः प्रचयाः लि
त्स्वर इति अत्राम्रेडितांतर्गतस्य लूशब्दस्योदात्तः न च तस्मिन्कर्तव्ये लोपस्य स्थानिवद्भावः शंक्यः स्वरविधौ तन्निषेधात् शेषनिघातः अचः कर्तृयकि
इह कीर्यतं इत्यादौ इत्त्वरपरत्वे च सति अयं स्वर इष्टः तन्निर्वाहार्थं तास्यनुदात्तेत्सूत्रे समासैकदेशोप्युपदेशशब्द इहानुवर्त्यते सप्तम्या च विपरिणम्य
ते तदाह उपदेशे जंतानामिति नन्वेवं एकं द्वादशधा जज्ञे इत्यादावविवांतर्भूतण्यर्थात्कर्मकर्तृविषयाज्जनेर्लटि जायते स्वयमेवेत्यत्र एष स्वरो न स्यादिति
चेन्नैवं य इति विषयसप्तमीमाश्रित्य प्रत्ययोत्पत्तेः प्रागेवात्वप्रवृत्तेरित्याहुः स्तूयत इति आदिमध्योपर्यायेणोदात्तौ माहिचीकरतामिति अदुपदेशा
त्सत्वेन लसार्वधातुकानुदात्तत्वे कृते चङः एव स्वरे प्राप्ते पक्षे धात्वकार उदात्तः उपोत्तमग्रहणानुवर्त्तनाद्द्वयोर्न माहिदधतं इति धातुस्वराः अथ प्राति
पदिकस्वराः ते च प्रायेण कृत्तद्धितप्रत्ययबलेनैव ज्ञेयाः उणादिषु तूणादिप्रत्ययैः अव्युत्पत्तिपक्षे पि फिट्सूत्रैः क्वचित्तु विशिष्यविधानादिति विवेकः अ
त एव कर्मण्यणिति सूत्रे मांसशब्दस्य न विषयस्येति फिट्स्वरमाशंक्य मनेर्दीर्घश्चेत्यौणादिकसप्रत्ययांतत्वादंतोदात्तता कैयटेनोक्ता मांसमेकः पिं।
शतीत्यादौ लक्ष्यमपि तथैव यत्तु आज्यशब्दव्युत्पादनावसरे कैयटेन न विषयस्येति संचारितं तत्प्रौढिवादमात्रं स्वरनिर्वाहस्तु एपत्यक्षं परित्यज्य आङ्पू
र्वात्स्यावितिपक्षस्य सिद्धांतितत्वादेवेति दिक् कर्षात्वतः ञ्नित्यादिर्नित्यमित्यस्यापवादः स्थानिवत्त्वादिति स्वरविधौ नेति निषेधस्तु नास्ति लोपाजादेश ।
पूर्वेतिनियमात् झल्युपोत्तमं षड्त्रिचतुर्भ्यो हलादिरित्यस्यापवादः सर्वस्य सुपि सर्वशब्द उंज्यादिष्वंतोदात्तो निपातितः सर्वस्य विकारः सार्व इत्यत्र अनुदात्तादिश्च

तिकसुवंतलक्षणोऽनुपथा स्यादिति श्रवणं तु सर्वत्राद्युदात्तस्यैव प्रत्ययलक्षणेनापि सर्वस्वरस्येष्यमाणत्वात् पथिमथोः पथिमथिशब्दावुणादिष्विनि
प्रत्ययांतौ वृत्त्यादितौ गमेरिनिरित्यधिकारे मंथः पथस्थ चेति सूत्रितत्वात् तत्रप्रत्ययस्वरेणांतोदात्ते प्राप्ते विधिरयं स्वेत्सपद इति क्षिनिवासगत्योः अस्मादधि
करणे घः निवासे किं व्याधेः क्षयः क्षिक्षये एरजंतः जयोश्च इति जयतेर्घः करणं किं जयोऽन्यत्र णानां भावे एरच् वृषादीनां च वृषु सेचने इगुपधलक्षणः क
आकृतिगण इति फिट्सूत्रेषु ग्रामादीनां चेति सूत्रितं ग्रामादिरप्याकृतिगणः एवं चाविहितलक्षणस्याद्युदात्तस्य वृषादीत्वं ग्रामादित्वं वा बोध्यं अंतोदात्त
स्य नुडादित्वं घृतादित्वं चेति दिक् एवं च द्वाभ्यामेव सूत्राभ्यां सर्वसिद्धौ इतरं सूत्रद्वयम प्रणायनं कर्तृभेदान्नदोषायेति बोध्यं आशितः कर्ता कर्तृवाचीति
सकर्मकादप्यशेः कर्तरि क्तः उपधादीर्घश्चानेनैव सूत्रेण निपात्यत इति भाष्ये स्थितं अत एव कृषन्निति मंत्रस्य वेदभाष्ये कृषन्कृषिं कुर्वन् फालः कृषीवलं
भोक्तारं करोतीति व्याख्यातं वृत्तिकारस्तु अशेर्णड् पूर्वादविवक्षितकर्मत्वेनाकर्मकत्वात् कर्तरि क्तः तत्र थाथघञिति प्राप्तः स्वरोऽनेन बाध्यत इत्याह तच्चिंत्यं अविव
क्षितकर्मकेभ्योऽपि कर्तरि क्ते दत्तवान्पक्ववानित्यर्थे दत्तः पक्व इत्यापत्तेः आशितंगुस्य वग्रहापत्तेश्च अपरस्त्वाह कर्तरि तनेन भूतपूर्वगत्या अशेः कर्ता णौ कर्मभू
त एव विवक्षितः तथा च पंपत्ता कर्मण्येवायं क्त इति जुष्टार्पिते जुषी प्रीतिसेवनयोः श्वीदितो निष्ठायामितीट् प्रतिषेधः अर्तेर्णिच् अर्तिह्रीति पुक् नकेवलं गता
र्थत्वमात्रं किंतु आरभ्यमाणोऽस्मिन्सूत्रे दोषोऽप्यनिष्टः अर्पिताः षष्टिरित्यादिना युष्मदस्मदो ङ [illegible] मंत्रे शंकानिरासार्थं ईडवंद पूर्वसूत्रे वृ
नुबंधकस्याग्रहणात् एपदं तेषु तिस्वर एव प्राप्ते वचनं विभाषा वेणु शब्दो नित्स्वरेणादिस्समाद्युदात्तः प्राप्तः स्थोऽणुरित्यनुवर्तमाने अजिवृरीभ्यो निच्चेति वृ
त्यादितत्वात् इंधानशब्दोऽपदिचानशंतः तदादित्वादंतोदात्तः अप्पशानजंतः तर्हि लसार्वधातुकानुदात्तत्वे कृते [illegible] मध्योदात्तः स्रसोः ।
स्त्रोपइति श्रमोकारस्य उद नस्य लोपात् सर्वधातु [illegible] अप्राप्तमाद्युदात्तत्वं पक्षे विधीयते अपः पचाद्यजंतादिति कुह [illegible] समासः [illegible] चौणादि
काबदंतौ क्रथ हिंसायां मतः [illegible] शब्दरूपे [illegible] यानपुंसकस्यादित्य स्यविशेषणं के चित्तु सूत्रे पूर्वे शब्दे पुंल्लिंग [illegible] न एव पठंति [illegible] नानुरथिको ।

नघांमनुप्रमतौवह्वचोनजिरादीनां शरादीनांचेतिदीर्घः अहीवतीति संज्ञायामितिवत्वं उत्तरोग्रंथः स्पष्टार्थः क्वचित्तु विशेषउच्यते द्वितीयपादे तृणधा।
न्यानां तिलाइति यत्तु अलाबूतिलोमेति रजसिकटज्विधोहरदत्तेनोक्तं तिलशब्दो घृतादित्वादंतोदात्तइति तच्चिंत्यं तिलाश्चमइत्यत्राद्युदात्तस्यैव पठ्यमा
नत्वात् प्राणिनां कुपूर्वं यत्तु कुपूर्वाणामिति पाठमुपन्यस्य कवर्गादे पूर्वे तन्मध्ये आदिरिति न्यासकारहरदत्तौ तस्य समूहइति सूत्रे प्रोचतुः तच्चिंत्यं सर्वे।
नामत्वेन सुटि सति कुपूर्वेषामिति प्रयोगापत्तेः सौत्रत्वं वा शरणीकर्त्तव्यं लघावंतेइहादिशब्दो नसंबध्यते तेनानादेरपि गुरोरुदात्तः अतएव वृषाकपीति शब्द
स्यगुरुरुदात्तइति वृषाकप्यग्नीति सूत्रे वृत्त्यादिग्रंथेषु विभावितं नच गुरूणां मध्ये य आदिरिति सर्थोस्त्विति वाच्यं अन्यतोङीषिति सूत्रे सारंगकल्माषशब्दो ल
घावंतइत्यादिना मध्योदात्तावितिहरदत्तादिग्रंथविरोधात् कल्याणइति पर्यायेणादिमध्यावुदात्तौ तृतीयपादे द्वे शादीनां शाकानां इदं च सूत्रं संप्रोदश्चक
टजिति सूत्रे सर्षपतैलमिति भाष्योदाहरणव्याख्यानावसरे सर्षपशब्दस्य शादीनां शाकानामित्याद्युदात्तत्वे प्राप्ते परत्वादयं द्वितीयं प्रागीषाद्स्यनुवर्त्तमा
नेपांतानां च गुर्वादीनामिति मध्योदात्तत्वं भवतीति कैयटग्रंथपर्यालोचनया दंत्यादीति प्रतिभाति चतुर्थपादे उपसर्गाश्चाभिवर्जं इहनामिरित्येवमु
क्तं इतरेषां पूर्वेणसिद्धत्वात् वस्तुतस्तु तदपि मास्तु एवमादिषु अभेः सुपठत्वात् आत्वेति मंत्रे उपसर्गाश्चाभिवर्जमिति वचनात् प्रातिपदिकांतोदात्त
त्वमित्युक्तामानोमत्ता अभिह्रुवन्निति मंत्रे एवमादीनामंतइतिवदता वेदभाष्यकृताध्वनितमेतत् यथेति पादांते यत्तु स्वरमंजरीकृता पुराजोवगृभो।
यथाभ्राजतो अग्नयो यथाइत्युपन्यस्य लित्स्वरमाशंक्य आव्यपिके प्रसिद्धिमात्रेणात्र सर्वानुदात्तत्वमित्युक्तं तदेतत्सूत्रादर्शनप्रयुक्तं फिट्सूत्रेषु तृ
तीयः पादः इतिप्रकृतिस्वरविषयकं द्वितीयं प्रकरणं अथ प्रत्ययस्वराः कर्त्तव्यमिति तव्यप्रत्ययः तव्यतस्तु तित्वात्स्वरितो वक्ष्यते ननु तव्यस्यापि आद्यु
दात्ते शेषनिघाते कृते उदात्तादनुदात्तस्येति स्वरितो भवत्येवेति चेत् सत्यं किंत्वयमसिद्धः तित्स्वरस्तु सिद्ध इति शेषनिघातप्रवृत्त्यप्रवृत्तिभ्यां महान्।
फले विशेषः तव्यतस्तित्वमेव च शेषनिघातपरिभाषायाः याथोद्देशपक्षे वृत्तौ ज्ञापकमिति ध्येयं पुच्छतीति पुच्छप्रमादे अन्यके इति अकृचू ततः परा।

स्वेरुदात्तः एवंपकेतकयित्सत्रापि अकचश्चित्त्वमेवचचितःसप्रकृतेरिसुक्तेऽर्थेलिंगं अन्यथातस्यैकात्स्वादनर्थकंतत्स्यात् कौंजायनाञ्ज्यतिकुंजस्यापत्यानि
वह्वनिगोत्रेकुंजादिभ्यश्च्फञ् व्रातच्फञोरस्त्रियामितिञ्यः ञ्यादयस्तद्राजाः वहुत्वेलुक् इह च्फञश्चकारोव्रातच्फञोरितिविशेषणोच्चरितार्थः ञकारोवृद्धौ
ततश्चचित्स्वरंवाधित्वापरत्वात्ञित्स्वरःप्राप्तःसोनेनवाध्यते तिसृभ्यो अर्थगतंवहुत्वंशब्देआरोप्यवहुवचननिर्देशः अंतोदात्तस्यत्रिशब्दस्यादेशस्तिसृ
शब्दोपितथातस्याचिरऋतइतिकृतेउदात्तस्वरितयोर्यणइतिजसःस्वरितत्वंप्राप्तमनेनवाध्यते अंतोदात्तनिसशब्दःस्वर्यतेतेनाधिकारगतिर्भवतीत्या
शयेनाह नित्याधिकारेइति अनित्यसमासे किं अग्निचिता उपपदसमासः कृदुत्तरपदप्रकृतिस्वरेणचिच्छब्द उदात्तः अधिकारग्रहणं किं विग्रहाभा
वमात्रेणयोनित्यसमासस्तत्रपर्युदासोमाभूत् अवाचा सुवाचाव्राह्मणेन वहुव्रीहौनञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं अत्रविभक्तेर्वैकल्पिकउदात्तोभवत्येव
दधीचइतिदध्यंचतिदध्यङ् तस्यऋत्विगादिनाक्विन् शसःपरिग्रहार्थमितिशसादिरित्येवतुनोक्तंनपुंसकेशसिमाभूत् सुटिचयथास्यादिति ऊडीतिउपा
धाभूतऊठ्ग्रह्यतेनत्वंसइत्यर्थः पंचमीनिर्देशादंतस्यैवग्रहणेप्राप्तेवचनं माभ्यामिति पूर्वार्द्धेचैवकारशब्देनोक्तयोरिहइदमापरामर्शेप्यन्वादेशोस्त्येव
अन्वादेशश्चकथितानुकथनमात्रंनत्विदमाकथितस्येदमैवानुकथनमितिभाष्योक्तेः नन्वेवमपिसावेकाचइतिस्वरःप्राप्नोति नचेहांतोदात्तादित्य
स्यानुवृत्तिसामर्थ्यात्सोपिनप्रवर्त्तनइतिवाच्यं शसोव्यावृत्त्यासामर्थ्योपक्षयात् नंहिशसिसावेकाचइतिप्राप्नोति इष्यतेचतत्रानुदात्तएव यदीमेनाँउ
शतोअभ्यवर्षीत् हनामैनाँइतित्वष्टापदव्रवीत् अन्यैरेनान्कन्याइन [illegible]भिःस्यात् इत्यादौतथैवपाठात् तस्मादाभ्यामित्यादेरन्वादेशेकथंसर्वा
नुदात्ततेतिचेत् उच्यते ऊडिदमिति [illegible] वर्त्ततेपदादि [illegible] णार्थं अतस्त्रिंशपर्यंताःषडेवगृह्यंतेनतुततःपरेपितेषामनेकाच्त्वा
त् तेनग्रीवायांवद्धोअपिकक्ष्यआसनि [illegible] निक्षियंतमित्यत्र आसन्[illegible] मध्योदात्तंअन्यथांतोदात्तंस्यात् नचांतोदात्तात्परत्वमेवेह
विभक्तेर्दुर्लभमितिवाच्यं स्थानांतरतम्येनादेशानामप्यंतोदात्तत्वात् आस्यशब्दस्यप्यदंतत्वात्स्वरेणास्वरितांत त्वेपिपद्दन्नोमासित्यादिसूत्रेप

दाद्यादेशानामंतोदात्तत्वा निपातनाश्रयणात् एवं स्थिते शसि एनादेशस्यापि एकाज्ग्रहणेनैव वारितत्वादंतोदात्तग्रहणस्य सामर्थ्यं निर्वाधं तेनाभ्यामित्सा
दौ सर्वानुदात्तता सुस्थेति यद्वा सावेकाच इति सूत्रे अंतोदात्तादित्यपकृष्यतां तथा च अशादेशे कृते प्रसंग एव नास्तीति दिक् अष्टनो अष्टन्शब्दो घृता
दित्वादंतोदात्तः तेनोत्तरार्थतयानुवर्त्तमानस्यातोदात्तादित्यस्येहापि नानन्वयः मंडूकप्लुतिर्वा सुदीर्घ्रा त्किं अष्टभिः इह झल्युपोत्तममिति स्वरः शतु
र अशासंत्वा विदुषी त्यस्मिन्नहन् यस्यैवं विदुषोग्निहोत्रं जुह्वति अत्र वस्वादेशस्य स्थानिवद्भावेन शतृत्वात्ततः परयोर्नदीविभक्त्योरुदात्तः प्राप्तः
स नेष्यते तथा च स्थानिवत्सूत्रे वार्त्तिकं कृता स्वरे च वस्वादेशे इति निषेधः पठितः उदात्तयणो उदात्तस्वरितयोरिति स्वरिते प्राप्ते आरंभः ह्रस्व अप्सु एवं
तद् इति छंदस्यपि दृश्यत इत्यनङ् अनो नुडिति नुट् पूर्वेन नकारस्य लोपः नेष्यत इति ह्रस्वप्राप्तावितिभाष्योक्तेरिति भावः रेवानिति रयिरस्यास्तीति म
तुप् रयेर्मतौ बहुलमिति संप्रसारणं पूर्वरूपत्वे आद्गुणः ततो ह्रस्वाभावाद् वचनं नामन्य अग्नीनामित्यादौ परत्वान्नित्यत्वाच्च दीर्घे कृते ह्रस्वाभावान्नेदं।
स्यात् वचनं तु तिसृणां चतसृणामित्यादौ सावकाशमत आह मतुपीति प्रथमां तमनुवृत्तं सप्तम्या विपरिणम्यत इति भावः षट्त्रिहलादिः किं चतसृः
पश्य नगोश्वन् इहानंतरस्य प्रतिषेधासंभवात् सर्वस्यैव षाष्ठिकस्वरस्यायं प्रतिषेध इत्याह प्रागुक्तमिति एवं च वीरवत्तममित्यत्र ह्रस्वनुड्भ्यां मतुविति न
भवति यत्तु स्वरमंजर्यां तृतीयादिविभक्तेरुदात्तत्वं न भवतीति नगोश्वन् सूत्रे विवृत्तं तदनेन प्रत्युक्तं लक्ष्यविरोधात् उदात्तनिवृत्तिस्वरस्य तु प्रतिषेधो
नेष्यते देवीकुमारीत्यादीनामंतोदात्तत्वस्य भाष्ये तत्र तत्र दर्शितत्वात् वेदेपि दर्शनाच्च तन्निर्वाहार्थं नगोश्वन्निति सूत्रे अनुदात्तस्य चेत्येतदितरेषामे
वानुवृत्त्या निषेध्यसंकोचो व्याख्येयः अनुदात्तस्येत्यंशो वाक्यभेदेन पुनर्विधानार्थ इति वा व्याख्येयं शुनश्चिच्छेपमिति अत्र चिदिति पदं संहितापा।
ठे वा हुलकात् शुनःशेपशब्दस्य मध्ये प्रक्षिप्यते उक्तं च प्रातिशाख्ये शुनश्चिच्छेपं निदितं नराशंसं पूषणं नराशंसं दैव्यं चेत्यनानुपूर्व्यं संहिताइति राम·
इदकाले तु शुनःशेपं चित् इति पठ्यते शेपपुच्छलांगूलेषु शुन इत्यलुक् वनस्पत्यादित्वादुभयपदप्रकृतिस्वरः प्रथमैकेति न त्विह सावेकाच इत्यत्र। ११७

वसुपो ग्रहणं तत्र यन्तदोः स्त्रियामवर्णान्तत्वेपि लिंगान्तरे एकारान्तत्वादिति भावः एङ्राजा परमराजा अङि संचतेः क्विवंतस्य सनकारस्य ग्रहणं विषयावधारणार्थम्
यत्र न लोपो नास्ति तत्रैव प्रतिषेधो यथा स्यात् प्रांचा प्राञ्चा गतौ तु विभक्त्युदात्तः स्यादेव प्राचा प्राचे कुङ् क्विन्नंत एव कुंचा परमकुंचा कृत् करोतिः कृतंतनिर्वा क्वि
वंतः यत्त्विह काशिकायां सुगुना सुगुभ्यामित्युदाहृतं स अतो दात्तादुत्तरपदादिति प्राप्तः प्रतिषिध्यत इत्युक्तं तद्भाष्यवार्त्तिकविरुद्धं स्थानिवत्सूत्रशेषे हि गोः पूर्वणि
त्वात्त्वस्वरेष्विति वार्त्तिके तद्भाष्ये च स्वरे कर्त्तव्ये निषेद्धव्ये वा गोशब्दस्यादेशो न स्थानिवदिति निर्णीतं सुभिरिति सावेकाच इति ऊडिदमिति वा प्राप्तः स्वरो निषिध्य
ते नृच अत्र झलादिति प्राचां रीत्या झलि स्यस्यानुवृत्तिमाश्रित्योक्तं वस्तुतस्तु झलिति नानुवर्त्तते तेन यए क इनर्यपों सीत्यत्र नरी त्यस्याद्युदात्तत्वं संगच्छते एवं
सति दिवो झलिति सूत्रमपि शक्यमकर्तुं तथाहि इत्थं सूत्र्यतां अष्टनो दीर्घात् दिवोजादिः शतुरनुमो नदी चेति किं चैवं ऊडिदमिति सूत्रे दिवो ग्रहणं मास्त्विति
अपरं लाघवं यत्तु हरदत्तेन न गोश्वन्निति सूत्रे नरीत्यस्यांतोदात्तत्वमुक्तं दिवो झलिति सूत्रे च झल्ग्रहणस्यात्यन्तावश्यकत्वमुक्तं तदुभयं चिंत्यं संतित्वरितं ऋ
न इत् उदोच्येति सूत्रद्वयेपि ओदिति सूत्रे च तकार उच्चारणार्थः अतो नेदं प्रवर्त्तते विस्तरः शब्दकौस्तुभे बोध्यः तास्यनु ता स्यादीनां समाहारद्वंद्वः उपदिश्यत इ।
त्युपदेशः ङिदिति कर्मधारयः इत्संज्ञक ङकारेण च उपदिश्यमानस्य विशेषणात्तदंतविधिः कर्त्तेति लुट् आत्मनेपदप्रथमस्य डारौरसः तासिः एकवचने उ
दात्तनिवृत्तिस्वरेपि इतरयोः फले विशेषः ङित इति अस्याप्युपदेशविशेषणत्वान्नेह शृणुतं जागृतुर्हवं सुनुत आचधावतः अत्र श्नुः अतिदेशेन ङित् नन्वनु
बंधानामनेकांतत्वात् चक्षिङोपि कथं ङांतत्वमिति चेत् विशेषणानां सामर्थ्याद् द्विष्याति अथवा ङिदंशे तत्त्वस्य बाधे मत्वर्थमात्रं लक्ष्यते चनस्यनमिति चनो।
न्नम् तदात्मन इच्छत इत्यर्थः क्यच् लोट् थस सत्तं शप् सचानुबंधस्यानेकांतत्वादनुपदेशः चित्स्वरोपीति परत्वादिति भावः हत इति अनुदात्तोपदेशेति न लोपे
कृत्ते हंतिरदंतो न तूपदेशे थलि च आदिर्णमुलीति सूत्रादन्यतरस्यामित्यनुवर्त्तमाने वा ग्रहणं कार्यिविकल्पार्थं सत् आदेरपि कार्यं प्रापयतीत्याह आदेर्वेति
त्रयाणामप्येषामुदात्तो भवन् पर्यायेणैव न तु युगपत् अतश्चैतवैयुगपदित्यादौ युगपद्ग्रहणात् लिंगात् एवं स्थिते अन्यतरस्यामित्यनुवृत्तेः फलमाह यदैति

उ.

म.वे. सेयीतिकिं यथाथ इङ्ग्रहणं तु यदा इडागमस्तदा तस्योदात्तार्थं स्यात् ततश्च यथा लुलविथे स्यादौ चतुर्णामुदात्तत्वेपि यथिथे सत्त्रयाणां भवति एवमिडभावे

११८ पि स्यात् आहवनीय इति बाहुलकादधिकरणेऽनीयर् प्रीणनार्थात्क्रमेणि वा ततो गतिसमासे कृदुत्तरपदप्रकृतिस्वरः इनिप्रत्ययस्वरप्रकरणं तृतीयं

पञ्चश्रियमिति षष्ठीतत्पुरुषः श्रीशब्दस्योदात्ते कृते आतरतम्यादिकारेऽप्युदात्तः चित्रेति श्रूयत इति श्रवः कीर्तिः चित्रं श्रवो यस्य चित्रश्रवाः ततस्तमपृ

समपाद इति समशब्दः त्वत्वसमसिमेत्यनुच्चानीति फिट्सूत्रेणानुदात्तः हरदत्तस्त्वाह सुञोडमविति पादशब्दो वृषादित्वादाद्युदात्तः मंदयत्सखमि।

तिमदिस्तुतिमोदमदस्वप्नकांतिगतिषु एयंताच्छत्रादेशस्तत्स्य छंदस्युभयथेत्यार्द्धधातुकत्वेन शवभावाद्दुपदेशादिति निघातो न अतप्र सया

द्युदात्तत्वमेव णेरनिटीति णिलोपस्तु न तं प्रति सार्वधातुकत्वाश्रयणात् नचवैपरीत्यं मापादनीयं छंदसि दृष्टानुविधानात् इत्थं मंदयच्छब्दोंऽतोदात्तः।

तत्पुरुष इति स्यादेतत् परमंकारकं परमकारकं परमकारकेण परमकारके इत्यत्रातिप्रसंगः द्वितीयातृतीयासप्तम्यंतपूर्वपदत्वात् नहि विशेषणसमा

सः प्रथमांतानामेवेति नियमोऽस्ति स्यमकृदुक्तत्वात् सत्यं लक्षणप्रतिपदोक्तपरिभाषया तृतीयादिशब्दोच्चारणपूर्वकं विहितस्यैव समासस्येह ग्रहणान्नो

क्तदोषः अव्यये इति निपातत्वादेव सिद्धे न ग्रहणं परस्यापि बाधनार्थं तेन अकरणिरित्यादौ कृत्स्वरेण अव्ययीस्त्राप्येवं किंच आतिलइत्यत्र नि स।

भ्यो जस इति सतिशिष्टोपि विभक्तिस्वरेण नञ्स्वरेण बाध्यते अपि च अचत्वारः अनड्वाह इत्यत्र सतिशिष्टोपि आम उदात्तो बाध्यते इति बोध्यं कुग्रहणं तु

चादिषु पाठाभावात् वस्तुतस्तु चादिष्वेव कुः पाठ्यः इह तु न पाठ्यः एवं चाव्ययत्वमपि तस्य सिध्यति स्नात्वेति मयूरव्यंसकादिरयं नन्वेवं तत्रैवांतोदात्तत्वे

निपात्यतामिति चेत् मैवं सामिकृतं स्वयंधौतमित्यादिवारणायेह परिगणनस्यावश्यकत्वात् सदृशप्रतिरूपयोः ननु पित्रा सदृश इति विग्रहे तृतीया।

तं पूर्वपदं तत्र तत्पुरुषे तुल्यार्थेत्येव सिद्धं नच तुल्यार्थयोगे षष्ठ्या अपि विहितत्वेन षष्ठीसमासार्थमिदमिति वाच्यं तत्रानभिधानात्षष्ठीसमासो नेत्यपि राम.

लुक्चत्वादिति चेत् मैवं अलुक्समासानुरोधेन षष्ठीसमासस्वीकारस्यावश्यकत्वात् तद्यथा दास्याः सदृशः वृषल्याः सदृशः षष्ठ्या आक्रोशे इत्यलुक्। ११८

दासीवृषलीशब्दयोरंतोदात्तयोर्हृदात्तपणोहस्पूर्वादिति विभक्तिरुदात्ता नसाहस्यमिति यत्र हि प्रतियोगिवि. षेषसमर्पणार्थं पूर्वपदं तत्रैव साहस्यस्य समासा
र्थतेति साहश्यग्रहणसामर्थ्यादाश्रीयत इति भावः गृहपतिरिति गेहेक इति कप्रत्ययस्वरेण गृहशब्दोंतोदात्तः पंचारत्निरिति पंचारत्नयः प्रमाणमस्येति
तद्धितार्थे द्विगुः प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लोपः संख्याद्द्वहराजन्यवहुवचनेति पूर्वसूत्रात् द्वंद्व इत्यनुवर्त्तते कात्तकुभूमिः तत्र जाताः कुजा तान्या
तिकुजपः कृतस्य कुजपस्य चापत्य मित्यर्थे ऋष्यणांतावेतौ कुरुगार्हद्द्वहपणपकंवलांताः सप्तसमासाः तत्रादितो द्वयोः षष्ठ्याः सौत्रो लुक् इतरेषां पंचानां ष
ष्ठ्याः स्थाने प्रथमैकवचनं दासीभाराणामिति वहुवचननिर्देशादाद्यर्थो वगम्यते तत्राह एषामिति कुरूणां गार्हपतं कुरुशब्दोऽन्तोदात्तः कृग्रोरुच्चेति उप
सर्यांतत्वात् रिक्तगुर्वादयः कर्मधारयाः श्रीर्यस्यास्ति तत् श्लीलं सिध्मादेराकृतिगणत्वाल्लच् कृपो रो ल इत्यत्र कपिलकादीनामुपसंख्यानात् लत्वं नश्ली
लेति नञ्समासे आद्युदात्तोऽश्लीलशब्दः अश्लीला चासौ दृढरूपा च ला वण्यरहितापि कुञ्जत्वादिरहित त्वात् संस्थानमात्रेण दृढेत्यर्थः पारेवडवेव निपा।
तनादिवार्थे समासः विभक्त्यलोपश्च पारशब्दो घृतादिः तिलशब्दान्मत्वर्थीय इनिः पृषोदरादित्वात्तिशब्दस्य द्विर्वचनं तितिलिनोपसंख्यानात्तद्धित इति
टिलोपः तैतिलानां कद्रूः परमशब्दोऽव्ययपण्येति यदंतत्वादाद्युदात्तः न च द्वितीयाकृत्सा इत्येव सिद्धमिति वाच्यं प्रतिपदोक्तत्वस्य तुल्यत्वात् अजात्येति स
मासे तत्प्रवृत्तेः इह तु विशेषणं विशेष्येणेति समासः ननु अजात्येति प्रतिषेधसामर्थ्यात् दुर्लभाविति चेत् अत्राहुः अजात्येति न जातिप्रतिषेधार्थं किं
तु न्यायप्रसिद्धार्थानुवादमात्रं न चानुवादस्य सर्वथा नैष्फल्यं गुणक्रियावाचिनामनियमेन पूर्वनिपातप्रसंगे क्तांतस्य पूर्वनिपातार्थं सूत्रमिति व्युत्पादने।
न चरितार्थत्वात् दास्याः भारो दासीभारः यूपदार्विति यूपशब्द आद्युदात्तः कुयुभ्यां चेत्यत्र निदित्यनुवृत्तेः स्वोतास इति स्वयाऊताः रक्षिताः स्वोतासः
मत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशे दकारलोपश्छांदसः अवतेः क्तः ज्वरत्वरेत्यूठ् एत्येधत्यूठ्स्विति वृद्धिः इडागमस्य चाभावश्छांदसः पूर्वपदप्रकृ
तिस्वरे कृते एकादेश उदात्तेनोदात्तः ततः स्वरितप्रचयो गतिरनंतरः गतिशब्दः क्तिजंतः ननु क्तिन्नंतः अनंतर इति पुल्लिंगनिर्देशात् निपातनाद्वानुनासि

कलोपः पुरोहित इति अत्र समासांतोदात्तत्वे अव्ययपूर्वपदप्रकृतिस्वरत्वं कृत्स्वरः थाथादिस्वर इत्येतेषु प्राप्तेषु पूर्वपदप्रकृतिस्वरोऽनेन विधीयते पूर्वपदं चेहांतोदात्तं
पूर्वाधरावराणामसीति असिप्रत्ययस्वरेण अनंतर इति किं अभ्युद्धृतः इह हृतशब्दस्य उच्छब्देन समासे पुरोहितमित्यत्रेव गतिस्वरेणाद्युदात्त उद्धृतशब्दः
तस्य पुनरभिशब्देन समासः तत्र च कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया उद्धृतशब्दः क्तांत उत्तरपदं एवं स्थिते समासांतोदात्तत्वे।
प्राप्ते तदपवादे कृत्स्वरे तदपवादस्य थाथादिस्वरः प्राप्तः तमपोद्याभेर्गतिस्वरः स्यात्सोऽनंतरग्रहणेन वार्यते नन्वनंतरग्रहणेनापि दुर्वारोऽसौ कृद्ग्रहणपरिभाषा।
या उद्धृतशब्दस्य क्तांतत्वे अभेस्तदानंतर्यस्य सत्वादिति चेत् मैवं अनंतरग्रहणसामर्थ्याद्धि धातोरनंतरो यो गतिराश्रीयते अभिश्चानंतर्ये इति नन्वेवं माभू
दभेः स्वर इष्टसिद्धिस्तु कथं अभ्युद्धृतशब्दे हि उच्छब्दस्य स्वर इष्यते संसृष्टं धनमुभयं समाकृतमिति मंत्रे समाकृतशब्दे आङः स्वरदर्शनात् न चासौ प्रकृ
तसूत्रेण सिध्यति प्रथमसमासे तत्प्रवृत्तावपि द्वितीयसमासे थाथादिस्वरस्य प्राप्ते रुक्तत्वात् न च तं बाधित्वा गतिस्वरः प्रवर्त्तत इति वाच्यं द्वितीयसमासे उ
दः पूर्वपदत्वाभावात् अत्रोच्यते धातोरनंतर इति व्याख्यानादेव पूर्वपदत्वं विनापि स्वरोऽयं प्रवर्त्तते न हि तत्प्रकृतिभूतं धातुं प्रति पूर्वपदत्वं गतेः संभवति।
तस्मादभ्युद्धृतं समाकृतमित्यादि तावत्सुस्थं इदं त्ववशिष्यते उक्तरीत्या दूरादागत इत्यादौ कारकपूर्वेऽपि गतिस्वरः स्यात् इष्यते थाथादिस्वरः तदर्थं कारकाद्द
त्तश्रुतयोरिति सूत्रे कारकादिति योगो विभज्यते कृद्ग्रहणं गतिग्रहणं चानुवर्त्तते कारकात्परं क्तांतं सगतिकमुत्तरपदमंतोदात्तं स्यादित्यर्थः तत्र दूरादागत इत्यादौ था।
थादिसूत्रेणैव सिद्धत्वात् दूरादागत इत्यादौ गतिरनंतर इत्यस्य बाधनार्थमेवेदं सूत्रमिति दिक् तादौ च नितिकृत्यतौ इत्यस्यार्थः तथाहि गतेरयं स्वरो विधीयते।
गतिसंज्ञा च धातुमाक्षिपति स च प्रत्ययविशिष्ट एव प्रयोगार्हः प्रत्ययश्चेह परिशेषात् कृदेवेति चेत् सत्यं कृद्ग्रहणं कृत्संज्ञाप्रवृत्तिकालोपलक्षणं तेन कृदु
पदेशे तादित्वलाभात् प्रलपिता इत्यादि सिध्यति स्वरप्रवृत्तिवेलायां तादित्वाभावेऽपि पूर्वं तत्सत्वात् आदिग्रहणं तु शक्यमकर्त्तुं यस्मिन्विधिरित्येव सिद्धेः
अंताविति किं आगंतुः स्यादेतत् अंताविति पर्युदासः क्तिन एवोचितः न विधेः अस्य सुष्टुतिं सुहवां सुष्टुती हुवे वृष्ट्ये चोदत्सुक्षितिं यात्तेरोके सुमतयः इत्या

दे[illegible]स्वरादर्शनादिति चेत् मैवं उदाहृतप्रयोगेषु उपायांतरस्यैवानुसर्त्तव्यत्वात् न ह्यतावितिपर्युदासमात्रेण तन्निर्वाहः कृदुत्तरपदप्रकृतिस्वरेण धातोरु
दा[illegible]पत्तेः अंतोदात्ततायाश्च तत्रेष्टत्वात् किंच अ तावितिनिञः पर्युदासे प्रभृतौ संगतिमित्यादौ गतिस्वरेण न सिध्येत् तस्मात्तु नञ एवायं पर्युदास इति स्थि
ते चातर्हि सुष्टुते गतिरिति चेत् शृणु सोत्र करणीभूतायाः स्त्वः साध्वसिध्युन्तीतिवत् कर्तृत्वविवक्षा यांक्तिजंतमिदं न तु क्तिन्नंतम् यत्तु केचित् मनु
क्तिन्व्याख्याते इत्यादिना अंतोदात्तत्वमित्याहुस्तन्न तत्र कारकादित्यस्य वृत्तिकृतानुवर्त्तितत्वात् प्रभृतावित्यादिसिद्धये तदनुवृत्तेन्योप्यत्वाच्चेति दिक्।
नवे च कृत्स्वरापवादोयं अंतउदात्त इति यद्यपि उदात्तग्रहणं नानुवर्त्तते तथापि गतिः प्रकृत्या भवतीत्युक्ते उदात्तो बुद्धिमारोहतीत्यर्थ एवांतस्य भवतीति
भावः प्रसंच इति कृदुत्तरपदप्रकृतिस्वरः परत्वादिति चुस्वरस्यावकाशः साकट्रीची अस्यावकाशः पेपरांचः उभयप्रसंगे परत्वादयमित्यर्थः ननु चुस्वरः स
ति शिष्टः भसंज्ञायामल्लोपे च कृते प्राप्तत्वात् सत्यं नायं विप्रतिषेधः किंतर्हि इष्टिरेवेति हरदत्तः चौरनिगंतौ चतावप्रत्यय इति वार्त्तिकग्रंथोपीष्टिप
रतयैव व्याख्येय इति तदाशयः इहापि मूलेपरत्वादित्यस्येष्टत्वादित्यर्थः न्यङ्[illegible]उदात्तस्वरितयोर्यण इति स्वरितः दिवोदासायेति दिवश्च दासे इति षा
ष्ठ्या अलुक् नञो जरमरमित्रमृताः नञ्सुभ्यामित्यस्यापवादः जरणं जरः ऋदोरप् मरणं मरः अस्मादेव निपातनादप् त्रिमिदा स्नेहने क्तः मित्रं मृडेन
पुंसके भावे क्तः सूत्रे तु शब्दपरत्वान्नपुंसकत्वं अमित्रमिति मध्योदात्तोयं एतेन अमित्रस्य यथ यामन्युमिंद्रा इत्यादि व्याख्यातं अमेर्द्विषतीति इत्रच्
प्रत्यये तु अंतोदात्त उक्तः नन्वत्र तत्पुरुषत्वादाद्युदात्तोपि न चतस्य परवल्लिंगता पुंसि भूम्यामित्रच्छत्रमेघाः पुंसीति लिंगानुशासनसूत्रात् एवं चेश्वरीशाकल्या
दिशब्दवदमित्रशब्दोपि त्रिविधः यत्तु द्विषोऽमित्रे इति सूत्रे हरदत्तेनोक्तं द्वयमुक्तं क्लीवत्वमाद्युदात्तत्वं च स्यादिति तदापातत एवेत्यवधेयं सोमेमनूच
असूचमनसौ सुकर्माण इत्यादि यद्यपि आद्युदात्तं छन्दसीत्यनेन सिद्धमिदं तथापि सुप्रथिमेत्यादिवृजर्थम् छन्दोर्थं च सूत्रमिति बोध्यं गतिकारको
पपदात्कृत् इह शितेर्नित्याबह्वज्बहुव्रीहावभसदिति पूर्वसूत्रस्य बहुव्रीहिग्रहणं नानुवर्त्तते स्वरितत्वात् किंतु व्यवहितमपि तत्पुरुषग्रहणं तत्पुरुषे शा

उ॰
म॰वे॰ लायांनपुंसकइतिसूत्रादनुवर्त्ततइत्याह नत्सुरुषेइति मकारकइतिकुगतीतिसमासः तित्स्वरेणोत्तरपदमाद्युदात्तं नृवाहसेति न्दन्वहत्तइतिविग्रहः वसे।
१२० णिदितिसूत्राण्णिदित्यनुवृत्तेः असुनोणित्त्वादुपधावृद्धिः नित्स्वरेणोत्तरपदमाद्युदात्तम् उच्चैः कारमितिणमुल्विधावुच्चैरित्युपपदम् इहक्रन्दहणा।
माकरप्रसारव्यातं तथाचवार्त्तिकंगत्यादिभ्यः प्रकृतिस्वरत्वेक्रन्दहणानर्थक्यमन्यस्योत्तरपदस्याभावादिति तत्रेदंविचार्यते तिङन्तसमासेऽयंस्वरोभ
वतिनवेति आद्येयः शंवरंशंबं न्वविंदत् योजातःपर्युभूषतइत्यादिप्रयोगाणांसौष्ठवेपि यत्रारयोदेवयंतोयुगानिविततन्वतेइत्यत्रश्रूयमाणमंतोदा
त्तत्वंनसंगच्छतेक्रन्दहणंकुर्वतासूत्रकृताविरोधश्च सहेतियोगंविभज्यंतत्पुरुषसंज्ञातः प्रागेवतिङ् समासंक्रुवतोभाष्यकृतोपिप्रतिकूलमिदमिति
दोषत्रयं द्वितीयेतुसमासांतोदात्तत्वेनर्बिततन्वतइत्यस्यसिद्धावपि अन्वविंदत् पर्यभूषदित्यादावुत्तरपदाद्युदात्तत्वं नसिद्ध्येत् क्रन्दहणंप्रत्याचक्षा
णेनतत्पुरुषाधिकारेतिङ्समासंविदधताकात्यायनेनविरोधश्चेतिद्वौदोषौ किंचकैय्यटहरदत्तादयोप्यत्र उत्तरपदप्रकृतिस्वरस्यवार्त्तामप्यकृत्वास
मासांतोदात्तत्वमात्रंभवतिनवेतिसंदिग्धमेवव्यवजह्रुः तथाचसहसुपेत्यत्रकैय्यटः अनुव्यचलदित्यत्रसमासमुक्त्वाशाकलप्रतिषेधंतत्फलम।
भिधायसमासांतोदात्तत्वंतुनभवतितिङ्ङतिङइतिनिघातेनवाधितत्वादितिकेचिदाहुरित्युक्त्वाएवंसतिअनुप्राविशदितिउदाहरणंभाष्योक्तंनिष्फ
लंस्यात् तस्मात्सतिशिष्टत्वात्समासांतोदात्तत्वेनभाव्यमित्यपरेइत्युक्त्वातत्रतिङएकत्वस्योक्तत्वात्प्रातिपदिकत्वेपिसुवनुत्पत्तिरित्युक्त्वाअन्येत्विसु।
पक्रम्पवचनग्रहणादुक्तेप्येकत्वेसोरुत्पत्तिंहल्ङ्यादिलोपंचाभिधायतदुपष्टंभार्थं अतएवैकपद्यादामनुप्राविशदेवदत्तेत्याम एकांतरमामंत्रितं।
मितिनिघातप्रतिषेधःसंज्ञायाःप्रयोजनमस्त्येवेतितिङ्ङनिघातवादिनआहुरित्युपसंजहार हरदत्तोप्येवंकैय्यटोक्तिमात्रमन्ववादीत् एवंहिवद
ताकिंपरत्वान्निघातः उतसतिशिष्टत्वात्समासांतोदात्तइतिनावधारितं तदपिअनुव्यचलदित्यादौयथातथास्तुयोंजातइत्यादौतुयहृत्तान्नित्यमितिनि रम
घातेनिषिद्धेसमासांतोदात्तत्वंकेनवार्यतां किंचद्वितीयपक्षेअत्यायाहिशश्वतोवयंतेइत्यत्रआङउदात्तःकथंनिर्वाह्यः अपिचयुधेयदिष्णान आयु १२०

धोन्ट्घायमाणोनिरिणतीसत्रनिशब्दोनिहन्यते वितन्वतइत्यत्रविशब्दश्चेतितावन्निर्विवादसमासांतोदात्तत्वं तु रिणतीसत्रन तन्वतइत्यत्रतुभवती ।
तिविषमंदुरूपपादमितिमहत्संकटं अत्रेदंतत्वं वार्त्तिकमतेतावत्सुयएवपक्षः कुद्गृहणस्यप्रत्याख्यानात् तत्पुरुषत्वाभ्युपगमाच्च वितन्वतइत्यत्र ।
तु विचक्षादित्वादंतोदात्तत्वकल्पं अस्यायाहीत्यत्रतु तिङ्ङतिङः इति निघाते आङ्समासः उत्तरपदस्योदात्तशून्यतयागतिस्वराभावादव्ययपूर्व
पदप्रकृतिस्वरेणाद्युदात्तः ततोऽतिशब्देनसमासेकृतेकुद्गृहणप्रत्याख्यानात् उत्तरपदप्रकृतिस्वरेणेष्टसिद्धिः निरिणतीत्यत्रतु यच्छन्दयोगेनिघा
तनिषेधात्पूर्ववदेवेष्टसिद्धं भाष्यमतेतु तत्पुरुषत्वाभावात्गतिस्वरस्याव्ययपूर्वपदप्रकृतिस्वरस्य चाभावेसमासांतोदात्तत्वेनैव वितन्वतइतिसि
द्धं अन्वर्विंदन्निरिणतीत्यादौ उत्तरपदप्रकृतिस्वरत्वं तु बाहुलकात्समाधेयं नित्येक्रीडेत्यत्रनित्यमितियोगंविभज्यलक्ष्यानुरोधेनक्वचित्तत्पुरुषता
वास्वीकर्त्तव्या अतएवोदात्तवतेत्यस्यभाष्ये द्विः पाठः संगच्छते अप्रसूतीरणशचीभिः उपप्रेतकुशिकाइत्यादौतुसमासोनकृतः गतिर्गताविति तु सर्वे
विधीनांछंदसिविकल्पान्नकृतं अपादादावित्यधिकारादितिदिक् दृहच्छन्द इति अंतोदात्तोह्ययं सो इंद्रकतुर्हितेदृहन् इत्यादौतथादर्शनात् तनून
पादितितनूशब्दोंतोदात्तः तस्येवाद्युदात्तत्वंनिपात्यते तनूनपादुच्यतेगर्भआसुरः इत्यादौतथादर्शनात् तनूनपीसद्यक्रतस्येत्यत्रतु षाष्ठआमंत्रि
तस्वरेवोध्यः नराशंसं शंसंतीतिनराशंसः नरयेः अस्मादप् शंसतेर्घञ् नोत्तरपदे हरटथिव्यादिपर्ययसोत्रेऽपप्रतिस्वरविधौव्यंजनमविद्यमानवदि ।
ति तेनाभिमीलइत्यादौस्वरितः सिध्यति घाथघञ् आवसथः प्रभेदः दूराद्भूतः प्रत्ययः प्रलयः प्रलविवित्रं प्रयवः पुराश्चिति तृतीयातत्पुरुषेतुतृतीया
कर्मणीति सूत्रेण कर्मणिक्तांतेउत्तरपदेतृतीयांतस्य पूर्वपदस्यप्रकृतिस्वरः स्यादिति भावः बहोर्नवत्पूर्वदेशः बहुमृलः इहनञोजरसेतदनिदिश्यतेप
रादिश्छंदसिबहुलं उरूक्षयेतिउरुणाबहूनाक्षयो क्षयोनिवासइत्याद्युदात्तः क्षयशब्दः समासस्यांतोदात्तत्वंवाधित्वाद्युत्तरपदप्रकृतिस्वरेण ।
त्तरपदाद्युदात्तत्वंप्राप्तंतत्थाथादिस्वरेणवाधितं अतोबाहुलकेनोत्तरपदाद्युदात्तत्वमितिवेदभाष्येस्थितं एतच्चक्षिनिवासगत्योरितिधातोर्वा हु ।

उ॰
म॰वै॰ लकादधिकरणे एरजिति माधवेनोक्तं वस्तुतस्तु घप्रत्ययांतः क्षयशब्द इति हरदत्तोक्तरीत्याथाथादिस्वरस्येहाप्राप्त्या कृदुत्तरपदप्रकृतिस्वरेणैवेदं सिद्धं पसदि
१२१ श्वेत्यस्योदाहरणं तु चोदयित्री सूनृतानामिति बोध्यं ऊनपरिहाणे चुरादिष्वदंतः णिच् क्विप् सुतरामूनयत्सप्रियमिति सून प्रियं तच्च तदृतं च सूनृतं
अयस्मयादीनीति भत्वान्नलोपो न मुष्टिहत्ययेति मुष्ट्याहननं मुष्टिहत्याहतस्त्वचेति सुवंत उपपदे क्यप् कृदुत्तरपदप्रकृतिस्वरोऽत्र प्राप्तः त्रिचक्र
इति बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरः प्राप्तः विश्वायुरिति विश्वमायुर्यस्मिन् धन इति बहुव्रीहिः विश्वशब्दः क्वन्प्रत्ययांतः पूर्वपदप्रकृतिस्वरेणा
द्युदात्तत्वमिह प्राप्तं इति समासस्वरस्यैकारणम् तिङ् तिङः अतिङः किं पचति भवति पाको भवतीत्यर्थः वस्तुतस्तु अतिङ्ग्रहणं व्यर्थं समानवाक्याधिकार
स्य वार्त्तिकोक्तस्यावश्यकत्वात् निपातैर्यदि सादीनां यत्रे संतानां द्वंद्वे तृतीयायाः सौत्रो लुक् न तु युक्तशब्देन समासः निपातैरिति विशेषणस्यानन्वया
पत्तेः यद्यद्यर्थे च हंतौ च विचारे यदि चेच्चणः हंत हर्षेऽनुकंपायां वाक्यारंभविषादयोः कच्चित्प्रश्नेऽनिषेधे प्रशंसायां कुवित्स्मृतः यत्र साधारे तत्र मूले के
चिदुदाहृताः अन्येऽप्यूह्याः यथा हंत करोति कथं तर्हि हंताहं पृथिवीमिमां निदधानीह वेह वा अत्र दधानीति तिङः तस्य निघातनिषेधः प्राप्नोति सत्यं वा
हुलकान्निघातः एतेन हंतो नु किमाससे इति व्याख्यानं हंतो इत्यखंड निपातो वा बोध्यः तथैव पदकारैः पाठात् नेच्चेच्छब्दौ तु निपातसमाहारात्मकौ नेद्देव
मा पुनर्जग्मुर्देवाः अन्यस्य नाभिगच्छति अत्र नच्चाभ्यां विच्छिद्य चेच्छब्दस्य पदकाले पाठात् चणिति चेदर्थ एव णित् समुच्चयादौ त्वणित् इंद्रश्च
मृलयाति नः इंद्रश्चेदस्मान्सुखयेदित्यर्थः त्वं च सोम नो वशो जीवातुं न मरामहे हे सोम त्वं चेन्नो जीवातु वशः उश्याः कामयेथा इत्यर्थः निपातैः किं यत्कु
जति शकटं एतीति यत् इणः शतरि इणो यणिति यण् ननु प्रतिपदोक्तत्वाद्यथादिभिः साहचर्याच्च निपात एव ग्रहीष्यते सत्यं ज्ञापनार्थमिदं अत्र
प्रकरणे उक्तरीत्या संकोचो नेति तेन यावद्यथाभ्यामिति सूत्रे यत्तच्छेभ्य इतिवत्त्वं तोऽपि यावच्छब्दो गृह्यते तथा च प्रयुज्यते तावदुग्रो राधो अस्मभ्यं राधस्त्वया वत्तो राम॰
१२१

तभ्यो अरदोगणाना अत्रारदइसद्स्वरेणाद्युदात्तं युक्तग्र[illegible] न्विते माभूत् यत्रक्वचतेमनोदस्संदधस उत्तरं इह पत्रे स्सोत्तरमिस्सनेन सास्सात्सं
वेधः इध्यधारणे अनुदात्तेत् भोस्यस इति अदुपदेशात्परत्वात्सेइ स्य निघातः मध्योदात्तं [illegible] किंदृष्टं च इह जात्वपूर्वमिति पूर्वसूत्रात्पूर्वग्रहणमनुवर्त्तते
तद्याचष्टे अविद्यमानेति तेनेह न देवदत्तः किंचित्पचति ना[illegible]तियदिह तस्साध्विभिरित्यर्थः अन्तरवाक्ययोरिति दिवो वा पार्थिवादधि इंद्रं महो वा रजसः इत्येत
योरित्यर्थः इंद्रं प्रतिष्ठाति धनदानं अधीमहे आधिक्ये न[illegible]यामहे वैदिकनिघंटेया ज्ञाकर्मसु ईमहे इति पाठात् कस्मात् लोकादित्याकांक्षायामाह द्युलो
कात् पार्थिवाद्वा दिवो वा महो [illegible] महतः प्रौढात् रजसो लोकात् अंतरिक्षलोकाद् इति मंत्रार्थः ननु श्रुतस्यैव तिङ तस्योत्तरत्रानुषंगस्तत्कथं प्राथम्यमिति।
चेत् अनुषक्तस्याप्यौपाधिकभेदं पुरस्कृत्य प्राथम्याश्रयणे न निघातनिषेधस्य छंदसि बहुशो दृष्टत्वात् एतच्चैह एवं मंत्रे नियमेन मुष्टिहत्ययेति मंत्रे च वे
दभाष्ये स्पष्टतरं इंद्र वाजेष्विति अवतीति तिङ [illegible]स्येह निघातः निघाताभावस्य तूदाहरणांतरं बोध्यं यद्दत्ताय हृत्तास[illegible] अन्यवधाने शक्नुनेहापेक्ष्यते तेन यो
जात एव पर्यभूषत् इत्यादौ निघातनिषेधः सिध्यति अत्र प्रमाणं तु पूजनात्पूजितमिति सूत्रे पूजितग्रहणं तथाहि पूजनात्पूजितमनुदात्तमिति सूत्रेण का
ष्ठाध्यापकः दारुणाध्यापकः परमाध्यापकः इत्यादौ अनुदात्तता [illegible] तत्र काष्ठादिभ्य इति वार्तिकं वृत्तिकृता सूत्रावयवत्वेन पठितं उदाहरणेषु मयूर
व्यंसकादित्वात्समास इति वृत्तिमतं असमासे एव क्रियाविशेषणीभूतानां दारुणादीनां मलोपे [illegible] वार्त्तिकयोः स्वरसः कैयटाद
यो प्येवं उभयथापि पूजनादिस्यैव पूजितपरिग्रहे सिद्धे पूजितग्रहणमनंतर[illegible] सर्वं सत् ज्ञापयति इह [illegible] मो निर्देशे व्यानंतर्येनाश्रीयत इति

भ.वा. इतितिङ्स्वरनिरूपणप्रकरणंपंचमं संहितायांत्विति तयोर्भावविसंहितायामिति सूत्रे संहिताग्रहणस्य आकडारसमासेऽधिकृतत्वात् स्वरितविधे
१२२ र्लुनवंतर्भूतत्वात्सिद्धिभावः नन्वसंहितायां कालव्यवायादेवस्वरितो न भविष्यतिनत्किमुक्तेन संहिताधिकारेणेति चेन्न मैवं संहिताधिकारबहिर्भूतानां का
लव्यवायेऽपि प्रवृत्तिज्ञापयितुं तदारंभात् तेनायाविष्णू इत्यत्राविष्णू इत्यादावग्रहेऽपि आनउदयः पदविभागेऽपि वसुसादयः अग्ने ईळे इत्यत्र पदविभा
गेऽपि निघातश्च सिध्यति संहिताधिकारस्यानुपणादिकं स्वरितप्रचयादिकं च नेति विवेकः नन्वेवं पुरः हितमिति अवग्रहे हि शब्दस्य स्वरितत्वं वक्तव्यं।। प
च्यमानं न सिध्येदिति चेत् मैवं तदीयप्रातिशाख्ये विशिष्य विधानात् उक्तं हि यथासंधीयमानानामनेको भवतां स्वरः उपदिष्टं तथा विद्यादक्षराणामव रामः
ग्रह इति नन्वेवमुपगंतवे अन्वेतवा इत्यादीनामवग्रहे उत्तरखंडाद्यवर्णस्य प्रचयः स्यादिति चेत् पद्यादीस्तुद्युदात्तानामसंहितवदुत्तराणिनितिविशेषवच। १२२

नातं एवंरत्नेभातमं अलसलाभवंतीरिसादीनांक्रमकाले इतिशब्देतरभागेमचयोनप्रवर्त्तते परिग्रहेत्वनार्षानात्तनवैकाक्षरीकृतात् परेषांन्यासमा
चारं व्यालिखौ चेत्त्वयैपराविति वचनात् इत्थमन्यत्रापिमुनित्रयवचांसितत्तस्मातिशाख्यानितद्याख्यात गिरोनिरुक्तादिग्रंथांश्चपर्यालोच्यतत्त्वं।
निर्णेयं तदाह यथाशास्त्रमुन्नेयमिति अखंडमपियत्सर्वेक्षतच्छिन्नपरंपरं अशेषशास्त्रसंवेद्यमस्मरंतदुपास्महे १ सिद्धांतकौमुदीव्याख्यासेयंप्रौ
ढमनोरमा भट्टोजिदीक्षितकृतिर्मूर्त्याङि भवतातुष्टये २ इतिपदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेःसूनुनाभट्टोजिदीक्षितेनरचितायांप्रौढमनोरमायामु
त्तरार्द्धंसमाप्तम् ।। शुभमस्तु श्रीसंवत् १९२९ मीं फाल्गुनकृष्णपंचम्याम् ।।५।। चंद्रवासरे ।।


॥ इतिप्रौढमनोरमोत्तरार्द्धः समाप्तः ॥